CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 743

Title Śivagītā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 743 Subject: Puranic lit.

Title: Śivagītā

Author: Keladi Venkatādri Nāyaka. Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 10" by 5·8" Extent: 136 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —

॥श्रीगणेशायनमः॥ ॥अद्वैतसमर्थनेपटुमतैर्यस्यप्रतापंसहृतःकृत्वार्थैक्य
रुचिंसदाविदधतेस्वकेषणानेदिनः॥यत्रद्रव्येषुगुणेषुकर्मसुतथाजातो
विशेषेषुसमवेढाःहतयोथतैःसहनिजंसंबंधमुद्भूस्यते॥१॥यद्दीप्तांश्रव
धि ४ णातिंहतवतःकल्पद्रुमस्यानवत्वकंपत्तंननरस्तथासमनवछेषस्यगां
बिभ्रतः॥शाकेकेस्याद्धिमिषासमस्तदिविषसौनागयन्नोपावहोव्यक्तःछि
द्रनरःपरस्यमिषतोदातानकामानपि॥२॥यत्कीर्तिंकलहंसकंदचव
नोकृत्वामदयोवत्तामात्मदिःसंततंविदधतेत्वज्ञानरैर्मधराः॥
कृत्वादेवगुरुर्मनीमसमनायद्वैवरीजातैयतेसोयंश्रीकलंदीशावेंक
दि टनुर्बर्वर्त्तिसार्वोपरि॥३॥शिवः॥

॥ श्रीगणेशाय नमः ॥ सोयं पद्मपुराणस्थां षोडशाध्यनिर्मितां । शीवगीतां शीवप्रीत्यै
विवेचयति सादरं ॥१॥ सूत उवाचेति । ऋषीन्प्रती तिशेषः । अथेति मयउत्तमाधिकारिणो अथ
बुभुत्सया पृच्छंती तिनिर्णयानंतरं अतः तेषामनुग्रहणीयत्वात् । नव दुःखस्य सांसारिकस कल
दुःखस्य नेषजं । निवृत्त्युपायं मद्देशस्यानुग्रहात् वक्तरिष्ठोतृप्रश्चउपावस्तासंप्रवक्ष्यामि ।
संगृह्य अनेकासूपनिषत्सु विप्रकीर्णमिमेयं एकी कृत्य प्रकर्षेण वैद्यलघुत्वरूपतारूपे ११५
ण वक्ष्यामी तिसंबंधः । ननु सकल दुःखनिवृत्तिः किं शरीरे सत्येव नास्मिन्निवृत्ते वा । नाद्यः ।

॥ सूत उवाच ॥ अथातः संप्रवक्ष्यामि शुद्धकैवल्यमुक्तिदं । अनुग्रहान्महेशस्य नव
दुःखस्य नेषजं ॥१॥ ॥

स५ न ह वै शरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीत्यादिश्रुतिविरोधात् । न द्वितीयः । सुखस्यापि
ना हान्यापत्त्या तुल्यायव्ययत्वेनापुरुषार्थत्वापत्तेरित्याशंक्य नेषजं विशिनष्टि । शुद्धेत्यादिना । केवल्यं व १
स्य भावः । कैवल्यं निष्प्रपंचस्वरूपमात्रेणावस्थानं । तदेव मुक्तिः । शुद्धानिर्दोषा पूर्णानंदस्वरूपत्वेन
तुल्यायव्ययत्वरूपदोषेण कां तया केवल्यरूपा मुक्तिर्मां ददातिन तथा न तां । तथा च शरीरादेरपि
निवर्तनात् पूर्णानंदस्य वा वस्थानान्न कोपि दोष इति भावः ॥४
त्याव यवेतिना

दुःखस्य नेषजं वक्ष्यामीत्युक्तं ९

४ किं तदित्यपेक्षायां ज्ञानमेवेत्याह । न कर्मणामिति । मर्त्यो मरणधर्मा मनुष्यः कर्मणां यज्ञादीनां अनु
ष्ठानैः कैवल्यं न लभते । तथा दानैः तपसापि कृच्छ्रचांद्रायणादिरूपेण न लभते । तेषां स्वर्गादिफलकत्वा
त् निष्कामतयानुष्ठितानामपि चित्तशुद्धिफलकत्वात् । विविदिषावाक्ये यज्ञेनापि ज्ञानवि
विदिषान्यतरस्यैव तत्फलत्वान्नाध्यवसाया इति भावः । किं तु केवलं निरपेक्षेण ज्ञानेन अ दूर
प्रतिबद्धब्रह्मसाक्षात्कारेण कैवल्यं लभते । तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्य

॥ न कर्मणामनुष्ठानैर्न दानैस्तपसापि वा । कैवल्यं लभते मर्त्यः किं तु ज्ञा
नेन केवलं ॥२॥ रामाय दंडकारण्ये पार्वतीपतिना पुरा । या प्रोक्ता शिवगी
ताख्या गुह्याद्गुह्यतमा हि सा ॥३॥ ॥

तेय नायेति श्रुतेरिति भावः ॥२॥ तादृशब्रह्मज्ञानस्य शब्दैकसाध्यत्वात् या शिवगीतारूपमुपनिष
द्वाक्यमेव तदुपायस्तयोपदिशिष्यन् प्रथमं तत्प्रशंसामाह । रामायेति । पुरा पूर्वं दंडकारण्ये पा
र्वतीपतिना या शिवगीताख्या उपनिषत् रामाय प्रोक्ता सा गुह्यादपि गुह्यतमेत्यन्वयः । अ
त्र रामायेत्यनेन श्रोतृगौरवं पार्वतीपतिनेति वक्तृगौरवं चोक्तं । अत एव गुह्यतमा अत्यंतर
हस्य भूतेत्यर्थः ॥३॥

यस्या इति। सा प्रसिद्धा मुक्तिः नृणां यस्याः शिवगीतायाः स्मरणमात्रेण तदर्थध्यानमात्रेण
भवति। ननु तत्राउक्तं किंचिदुपसंहर्तुं यतनीयमित्यर्थः। नेयं ब्रह्मलोकावाप्तिरूपा गौणी मुक्तिः
किंतु परममुक्तिरेवेत्याशयेन विशिनष्टि ध्रुवेति। इदानीं संप्रदायशुद्धिं सूचयितुं गुरुपर्वं पराम्
दा पुरेत्यादिना सार्द्धश्लोकेन। पुरा पूर्वं स्कंदेन सनत्कुमाराय सा शिवगीता अभिहिता उक्तेत्यर्थः।
॥४॥ सनत्कुमारस्तु व्यासाय तां उवाच मुनिसत्तमाः श्रेष्ठा इति संबोधनेन। तादृशीं शिवगीतां

॥ यस्याः स्मरणमात्रेण नृणां मुक्तिर्ध्रुवा भवेत्। पुरा सनत्कुमाराय स्कंदेनाभिहि
ता हि सा ॥४॥ सनत्कुमारः प्रोवाच व्यासाय मुनिसत्तमाः। मह्यं कृपातिरेकेण प्रददौ
बादरायणः ॥५॥ उक्तं च तेन कस्मैचिन्न दातव्यमिदं त्वया। सूत उवाच। अन्यथा देवाः
क्षुभ्यंति च शपंति च ॥५॥ ॥

श्रोतुमधिकारिणः कृतार्थमुमिति ध्वनयति। तामेव शिवगीतां बादरायणो व्यासः कृपातिरेकेण द
यातिशयेन मह्यं प्रददौ। अत्र कृपातिरेकेणेत्यनेन त्वयास्मिन्विद्यायां वीर्यवत्तरत्वं ध्वनयति ॥५॥ उक्तं चे २
ति। तेन व्यासेन न कस्मैचन शिवगीतां देयेत्येव। किंतु अन्यदपि किंचिदुक्तमिति भावः। किंभूतं न देयं क
स्मैचिदिति। इदं शिवगीतारहस्यं कस्मैचित् अनधिकारिणे न दातव्यं अन्यथा अनधिकारिभ्योपि
दाने क्रियमाणे देवा इंद्रादयः क्षुभ्यंति क्षोभयुक्ता भवंति। किंच शपंति। दातारं अध्येतारं चेति शेषः ॥६॥

अथेति। कस्मैचिदिदं न वक्तव्यमिति व्यासोक्तेरनंतरं मया बादरायणः पृष्टः। कीदृशः सः भगवा
न्। उत्पत्तिं च विनाशं च भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानितीत्युक्तलक्ष
णयत्पृष्टं तदाह। भगवन्निति। देवताः किं प्रति क्षुभ्यंति शपंति चेति। निरपराधेषु कथं क्षोभ इ
ति प्रश्नाशयः ॥७॥ निरपराधतामेव विवृणोति। तासामिति। तासां देवतानां अत्र मनुष्येभ्यः स्त
त्वज्ञाने दत्ते सति का हानिः न कापीत्यर्थः। यया कार्यहान्या क्षुभ्यंति तद्वदेति भावः। अथ

॥ अथ पृष्टो मया विप्रा भगवान् बादरायणः। भगवन् देवताः सर्वाः किं क्षुभ्यंति शपंति च ॥७॥
॥ तासां सत्रास्ति का हानिर्या क्षुभ्यंति देवताः। पाराशर्योऽथ मामाह यत्पृष्टं शृणु वत्स तत् ॥८॥
॥ नित्याग्निहोत्रिणो विप्राः संति ये गृहमेधिनः। त एव सर्वफलदाः सुराणां कामधेनवः ॥९॥

पूर्वोक्तप्रश्नानंतरं पाराशर्यो व्यासो मां प्रत्याह। हे वत्स सत्कृपापात्रो। स्वस्य तत्वज्ञाने जातेपि लोकोप
रा कार्थं पृच्छसीति भावः। यत्पृष्टं तच्छृणु। प्रश्नोत्तरयोः समानविषयत्वात्। अन्यथा आम्रप्रश्ने कोवि
दारोत्तरं स्यादिति भावः ॥८॥ ते देवाह। नित्येति। नित्यं यदग्निहोत्रं तदनुष्ठातारः। ये विप्रा गृहमेधिनो
गृहस्थाः पंचमहायज्ञमात्रानुष्ठातारोपि इति भावः। त एव सुराणां सर्वफलदाः। कामधेनवः कामधे
नुकल्याः ॥९॥ श्रीरामाय ॥

तद्देवोपपादयति। भक्ष्यमिति। सुपर्वणां देवानां भक्ष्यभोज्यादि यदिष्टं तत्सर्वं श्रमोक्तेन पद्धतिमे
तद्विधापुरोडाशादिना दिविजन्यते प्राप्यते॥२०॥ ननु वैकल्पिकेन साधनांतरेण देवानामिष्टं
सेत्स्यतीत्याशंक्याह। नान्यदस्तीति। अन्यत्तदिष्टसंहविर्भिन्नं नास्त्येवं। तत्र किं तत्राह। दोग्ध्रीति॥

॥भक्ष्यं भोज्यं च पेयं च यद्यदिष्टं सुपर्वणां। श्रमोक्तेन हविषा तत्सर्वं जन्यते दिवि॥
८२ ॥२०॥ नान्यदस्ति सुरेशानामिष्टसिद्धिप्रदं भुवि। दोग्ध्री धेनुर्यथानीता दुःखदा गृहमे
धिनां॥२१॥ तथैवाज्ञानवान् विप्रो देवानां दुःखदो भवेत्॥ त्रिदशास्तेन विघ्नंति प्रवि
ष्टा हृद्यं त्रयेणां॥२२॥ ॥
त्रिविष्टपं
दोहनशीला दोग्ध्री ताच्छीलिकस्तृन्प्रत्ययः। धेनुर्गौः नीता अपहृता सती यथा गृहमेधिनां दुःख
दा भवति। तथैवाज्ञानवान् विप्रः इत्यपलक्षणं। क्षत्रियादिरपि देवानां दुःखदो भवेत्। तेन कारणेन त्रि ३
दशा देवाः त्रिविष्टपं मनुष्यलोकं प्रविष्टाः संतो विघ्नंति। तत्वज्ञानप्रतिबंधं कुर्वंतीत्यर्थः॥२२॥

ततः देवकृताद्विघ्नात् कस्यापि देहिनः। पुराणश्रवणादौ प्रवृत्तस्यापि शिवे न भक्तिर्न जायते॥ अश्रद्धा
मत्सरप्राबल्यादिनिमित्तभावः॥ तस्माद्देवकृतविघ्नात् अविदुषां पुराणादिश्रवणरहितानां तु भक्ति
र्नैव जायते॥ श्रवणादिमतामपीषद्भक्तिरस्ति श्रवणरहितानां तु भक्तिलेशोऽपि न भवतीत्यर्थः॥ ॥

ततो न जायते भक्तिः शिवे कस्यापि देहिनः। तस्मादविदुषां नैव जायते शूलपाणिनः॥२३॥
यथा कथंचिज्जातापि मध्ये विच्छिद्यते नृणां। जातं वापि शिवज्ञानं न विश्वासं भजत्यलं॥२४॥

शूलपाणेरिति वक्तव्ये शूलपाणिन इति रूपं छांदसं बोध्यं। तथा च सूत्रव्याख्यावितिसूत्रे महाभाष्येऽ
कं। छंदोवत्सूत्राः कुर्वंतीति॥ अस्ति च छंदसि लिंगव्यत्ययानुशासनं॥ सुप्तिङुपग्रहलिंगनराणां का
लहलच्स्वरकर्तृयङां च। व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिद्ध्यति बाहुलकेनेति वार्तिककारवचनात्। एवमग्रेऽपि बोध्यं॥ यद्वा॥ शूलपा
णिशब्दस्य बहुव्रीहिप्रयुक्तविशेष्यनिघ्नतासत्वात्सामान्येन पुंस्त्वमिति वा स्वरूपपदार्थकतारेण
वा समाधेयमिति दिक्॥२३॥

यथेति॥ यथाकथंचित्॥ अतिप्रयत्नात्॥ ज्ञानापि न मुक्तिः॥ मध्ये ज्ञाने सति पूर्वमेव विच्छिद्यते विच्छिन्ना
ति। नवयदि वा विच्छिन्ना सती ज्ञानमुत्पादयति तत्राप्याह॥ ज्ञानमिति॥ तथाज्ञानमपि ज्ञानं विश्वासं न जन
ति। अप्रामाण्यशंकया आस्कंधते इत्यर्थः॥ २४॥ यदीति॥ एवं प्राग्युक्तरीत्या देवताः अतिप्रबला इति।
तनूभृतां कुर्वताम् इति भावः। यदि विघ्नमाचरंति तर्हि तत्र दैवे विघ्ननिवारणे कस्य पौरुषं सामर्थ्यं न
ना व्रत
क्त्वियेन भवेत्॥ ॥२५॥
मुक्ति

कथयकं॥ यद्येवं देवता विघ्नमाचरंति तनूभृतां॥ पौरुषं तत्र कस्यास्ति येन मुक्तिर्भविष्यति॥ २५
सत्यं सत्तात्मज ब्रूहि तत्रोपायोस्ति वानवा॥ सूत उ॰॥ कोटिजन्मार्जितैः पुण्यैः शिवे भक्तिः प्रजायते
॥२६॥
सत्यमिति॥ सत्यमतिशयात्पुनः पुनः प्रश्नः॥ तत्र दैवकर्तृकविघ्ननिवारणे उपायोस्ति न वेति संशये सत्य
मुत्तरं ब्रूहीत्यर्थः॥ इदं प्राक्तनीयबहुतरसुकृतसंपत्त्या शिवे भक्तिः॥ ततः ईश्वरार्पणबुद्ध्या निष्कामक
र्मानुष्ठानं॥ ततश्चित्तशुद्धिः॥ ततो नित्यानित्यवस्तुविवेकः॥ ततो विषयसुखे ये दुःखबहुलत्वा ४
दिदोषदर्शनाद्वैराग्यं॥ ततः शमादिसंपत्॥ ततो मुमुक्षुत्वं ततो जिज्ञासा॥ ततः संन्यासः ततो गुरूप
सत्तिः॥ ततः श्रवणं ततो मननं ततो निदिध्यासनं ततो अप्रतिबद्धब्रह्मसाक्षात्कारः ततो यावत्प्रारब्धं

प्रजायते
जीवन्मुक्तिः॥ ततः परममुक्तिरिति। सिद्धांतसंमतः सोपानक्रमसदृशः क्रमः। एवं स्थिते प्रत्याहारन्या
येनात्र प्राथमिकसाधनं चरमफलभूतां मुक्तिं अनेक इतराण्यपि साधनानि तत्र तत्र प्रपंचयिष्यति
तान्यपि क्षेपसंख्यानि कोटिस्यादि॥ कोटिसंख्याकानि यानि जन्मानि तत्रार्जितैः पुण्यैः शिवे भ
क्तिर्जायते। अत्र कोटिसंख्याकानि जन्मानीति॥ मध्यमपदलोपी समासः दिक्संख्ये संज्ञायामिति
नियमेन समासांतरस्य दुर्लभत्वात् यथा चैन तथा द्विगोर्लुगनपत्य इति सूत्रे भाष्ये दोषः स्पष्टः॥ २६॥ ॥

ते
इष्टापूर्तानि कर्माणि तेनाचरति मानवः॥ शिवार्पणधिया कामान्परित्यज्य यथाविधि॥ २७॥
अनुग्रहात्तेन शंभोर्जायते सुदृढो नरः॥ ततो भीताः पलायंते विघ्नं हित्वा सुरेश्वराः॥ २८॥ जु
जायते तेन शुश्रूषा चरिते चंद्रमौलिनः॥ शृण्वतो जायते ज्ञानं ज्ञानादेव विमुच्यते॥ २९॥

॥इष्टेति॥ इष्टानि यागाः पूर्तानि तडागारामादीनि इष्टानि च पूर्तानि चेति द्वंद्वे अन्येषामपि दृ
श्यत इति दीर्घः॥ तेन तु शिवे भक्तेर्जनितत्वेन कामान्परित्यज्य शिवार्पणबुद्ध्या इष्टापूर्तानि कर्मा
ण्याचरतीत्यन्वयः॥ अनुग्रहादिति तेन शंभोरनुग्रहान्नरः सुदृढः शापानुग्रहसमर्थो जायत इ
त्यन्वयः तेन सुरेश्वराः शापाद्भीताः संतो विघ्नं हित्वा पलायंते॥ २८॥ जायत इति॥ ॥ ॥

तेन विघ्नविरहेण चंद्रमौलिनि श्वरिते शुश्रूषा श्रवणेच्छा जायते ततः शृण्वतः श्रवणं कुर्वतः क्रमेण
ज्ञानं जायते॥ ज्ञानादेव तु मुच्यते इति संबंधः॥ १९॥ बहुनेति॥ अत्र शिवभक्तिमाहात्म्यविषये बहु-
नोक्तेन किं प्रयोजनं संक्षेपेणैव वदामीति भावः॥ तथाहि॥ यस्य पुंसः शिवे दृढा भक्तिरस्ति सः महा-
पापानि ब्रह्महत्यादीनि पंच॥ अघानि दुःखानि व्यसनानि वा॥ अंहो दुःखव्यसनेष्वघमित्यमरः॥ पा-
पौघाः॥ उपपातकप्रकीर्णकादीनां संघाः तेषां त्रयाणां कोटिभिर्ग्रस्तोऽपि सन्॥ २०॥ संसारबंधनान्मुच्य-
ते॥ तस्मात्पूर्वोक्तात्पापकोटिग्रस्तादन्यो मूढधीः को वास्ति यः शिवभक्त्यापि न मुच्येतेति भावः॥ २१

बहुनात्र किमुक्तेन यस्य भक्तिः शिवे दृढा॥ महापापाघपापौघकोटिग्रस्तोऽपि मुच्यते॥ २०॥ संसा-
रबंधनात्तस्मादन्यः को वास्ति मूढधीः॥ २१॥ नियमाद्यस्तु कुर्वीत भक्तिं वा द्रोहमेव च॥ तस्यापि
चेत्प्रसन्नोऽसौ फलं यच्छति वांछितं॥ २२॥ ॥ ॥

नियमादिति॥ यः पुरुषो नियमेन भक्तिं द्रोहं वा कुर्वीत तस्यापि नियतस्मरणमात्रस्य भक्तिद्रोह-
योरुभयोरपि सत्त्वेन तावन्मात्रादसौ परमेश्वरः प्रसन्नश्चेत् प्रसीदति यदि तदा वांछितं यच्छति तथा च ५
द्रोहार्थमपि यस्य स्मरणं फलप्रदं तद्विषयिण्या भक्तेर्माहात्म्यं किं वक्तव्यमित्यर्थः॥ २२॥ छ ॥

स्यं

प्रदेयं वस्तु वक्तव्यं आत्मनियमतः परमेश्वरे तत्समर्पणमेव मुख्यमित्याशयेनाह॥ ऋद्धिमिति॥ ऋद्धिं किंचि-
न्माणिक्यादिनिर्मितं सिंहासनादि यावत् पुस्तकं अल्पं जलमेव वा प्रदद्यात्॥ नात्र वस्तुविशेष आग्रह
इति भावः॥ किंच समादाय सम्यक् भक्तिपूर्वकं गृहीत्वा नियमेन यो दद्यात् तस्मै भक्ताय असौ शिवः जगत्त्रयं प्रदत्ते
भक्तिमाहात्म्यात्॥ २३॥ तत्रापीति॥ तत्र पुस्तकस्य जलादेर्दानेऽपि असमर्थो यः॥ नियमेन नमस्कारं प्रद-
चः क्षिणं च करोति तस्मै शिवः [illegible] नयेदिति संबंधः॥ २४॥ प्रदक्षिणास्विति॥ यस्तु प्रदक्षिणास्वप्यशक्तः किंतु ग-
च्छन् समुपविष्टो वा सन् स्वांते हृदये शिवं चिंतयेत् तस्मा अभीष्टमर्थं शिवः प्रयच्छति॥ २५॥ ॥ ॥

ऋद्धिं किंचित्समादाय पुस्तकं जलमेव वा॥ यो दत्ते नियमेनासौ तस्मै दत्ते जगत्त्रयं॥ २३॥ तत्राप्यश-
क्तो नियमान्नमस्कारं प्रदक्षिणं॥ यः करोति महेशस्य तस्मै [illegible] नयेच्छिवः॥ २४॥ प्रदक्षिणा-
स्वशक्तोऽपि यः स्वांते चिंतयेच्छिवं॥ गच्छन् समुपविष्टो वा तस्याभीष्टं प्रयच्छति॥ २५॥ छ ॥

वस्तुतस्तु शिवपूजासामग्री नात्यंतक्लेशसाध्या किंतु सर्वत्र सुलभेत्याह॥ सार्धश्लोकेन चंदनमिति॥
बिल्ववृक्षस्य चंदनं॥ नेत्रं बहुमूल्यलभ्यं न लभ्यमेवेति भावः॥ वनजान्यपि पुष्पाणि॥ नत्र पुरुष-
कायक्लेशजानि॥ तादृशानि वनजान्येव फलानि वयस्य प्रीतिकराणि॥ वै इति निश्चये॥ २६॥ तस्य
शिवस्य सेवायां कर्तव्यायां भुवनत्रयेऽपि॥ दुष्करं दुःसंपादं किंचिदपि नास्ति तेन एवं विधाः साम-
ग्रीः सुसंपाद्येति भावः॥

नादृगोरीस्वनमनेकमकर्त्रिरिक्तस्मृतः ॥ मारुमानाथ्येष्वपिवेस्यर्थेदं दृशोतमृद्गिनोमनो ॥ २७ ॥ वन्येष्वपि परमेशितुर्यथा सन्निविलकामस्य ॥ वन्येषु पुष्पफलादिषु यादृशी प्रीतिर्वर्तते तादृशी याम्नजेष्वपि उत्तमे ष्वपि नास्त्येव ॥ तथा च परमप्रीतिपात्रं वन्यतत्त्वसुतरां सुलभमिति भावः ॥ ॥ २८ ॥ ॥

चंदनं बिल्वकाष्ठस्य पुष्पाणि वनजान्यपि ॥ फलानि तादृशान्येव यस्य प्रीतिकराणि वै ॥ २६ ॥ दुष्करं तस्य सेवायां किमस्ति भुवनत्रये ॥ वन्येषु यादृशी प्रीतिर्वर्तते परमेशितुः ॥ ॥ २७ ॥ उत्तमेष्वपि नास्त्येव यान्नजेष्वपि तादृशी ॥ २८ ॥ त्यक्त्वा तादृशं देवं यः सेवेतान्यदेवताम् ॥ स हि भागीरथीं त्यक्त्वा कांक्षते मृगतृष्णिकाम् ॥ २९ ॥ किंतु यस्यास्ति दुरितं कोटिजन्मसु संचितम् ॥ तस्य प्रकाश्यते नायं तथैव मोहांधचेतसः ॥ ३० ॥ ॥ ॥ ॥

परमार्थतोऽभेदेपि व्यावहारिकभेदमाश्रित्याह ॥ त्य ॥ क्त्वेति ॥ तादृशं भक्तिमात्रेण सुलभं तं देवं त्यक्त्वा अन्यदेवतां यः सेवेत सः भागीरथीं त्यक्त्वा मृगतृष्णिकां कांक्षते ॥ २९ ॥ ननु यदि परमेश्वर एवं सर्वस्य प्रभुः तर्हि तं सुकरं मुक्तिफलं च ॥ तर्हि तदनादरेण संसारे किमर्थं भ्राम्यंतीत्यत आह ॥ किंत्विति ॥ कोटिसंख्यैर्जन्मभिः सुष्ठु संचितं दुरितं यस्यास्ति तस्य मोहेनाज्ञानेनांधं विचारासमर्थं चेतो यस्य तथाभूतस्य त्वयं पूर्वोक्तोऽर्थो न प्रकाशते ॥ तेन संसारे भ्राम्यतीति भावः ॥ ॥ ३० ॥ ॥ ॥

भगवदुपासनायामपरमपि लोकार्थमस्तीत्याह नकालेति ॥ अन्येषु हि वैदिककर्मसु कालदेशस्थलानां नियमोऽस्ति ॥ तद्यथा ॥ अपराह्णे पिंडपितृयज्ञेन चरंतीत्यादिः कालनियमः ॥ ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि सादिहिदु नियमः ॥ अयमेव प्राचदेशानियमत्वेन विवक्षितः ॥ दिग्देशशब्दयोरेकधातुनिष्पन्नत्वात् ॥ यैलस्य पृथुपात्रं स्याद्यः प्राचीनप्रवणे वैश्वदेवेन यजेतेत्यादिः स्थलनियमः ॥ इत्युन्नतया ॥ किंतु यत्र भगवदुपासने कालनियमाः न संति ॥ देशस्य दिश इत्यर्थः ॥ स्थलस्य च नियमाः न संति ॥ तत्र समेषु पीठार्चाव ॥

॥ नकालनियमो यत्र न देशस्य स्थलस्य च ॥ ॥ ३१ ॥

क्षिवालुकाविवर्जितेशाद्वज्जलाश्रयादिभिः ॥ मनोनुकूले न तु चक्षुः पीडने गुहानिवातानाश्रयणे प्रयोजये दिति सुत्वादेशविशेषो विहित इत्याशंक्य एतस्मात्त्वेरपि चित्तैकाग्र्यनासंपादनमात्रे तात्पर्यं ॥ एवं दिङ्हार्थता लभ्यते ॥ एकाग्र्यस्य ध्यानोपयोगित्वादित्याशयेनाह ॥ ३१ ॥ यत्रास्येति ॥ अस्योपासकस्य चित्तं यत्र रमते एकाग्र्येन यतितत्र ॥ शिवस्य स्वात्मत्वेन ध्यानेन केवलं असौ उपासकः शिवसायुज्यमाप्नुयात् ॥ इदं चोत्तरमीमांसायां यत्रैकाग्र्यता तत्राविशेषादित्यधिकरणे स्पष्टं ॥ ३२ ॥ ननु भगवदुपासनं कथं सुकरं प्रभूणां दुराराध्यतायाः दृष्टत्वादर्शनादित्याशंक्य प्राकृतप्रभूणां न तथैव सर्वज्ञ

स्वरूपाणि धेहि त्वं दुराराध्यस्त्वं इत्याशयेन तयोर्वैजन्त्यं एवं सार्द्धद्वाभ्यां मुपपादयन् प्रागुक्तं प्रत्युत्थि
तिं तावदाह ॥ अनिरुद्धेति अस्यन्ते आयुःश्रियौ यस्य तथाभूतः भूतेशानां अंशभूतोऽधिपः ॥ अथ
वा भूतेशस्य शिवस्यांशभूताः स्वापेक्षया महाराजानस्तेऽधिपाः यस्य ॥ एवंरूपो यः पुमान् सत्
तदीये राज्ये अहं राजेत्यादिनं सर्वं शं दृष्टि ॥ उपकारकृद् दुरापास्त इति भावः ॥ ३३ ॥ ॥

नि २

य चास्य चित्तं रमते तत्र ध्यानेन केवलं ॥ स्वात्मत्वेन शिवस्यासौ शिवसायुज्यमाप्नुयात् ॥ ३२ ॥ अनि
रुद्धत्वनरायुःश्रीभूतेशांशाधिपोऽपि यः ॥ सत्तराजाहमस्मीति वादिनं हन्त्यान्वयं ॥ ३३ ॥ कर्त्तापि सर्वलो
कानामस्तुत्यैश्वर्यवानपि ॥ शिवः शिवोऽहमस्मीति वादिनं यं च कं च न ॥ ३४ ॥ आत्मना सह तादात्म्यभा
गिनं कुरुते भृशं ॥ धर्मार्थकाममोक्षाणां पारं यास्यथ येन वै ॥ मुनयस्तत्प्रवक्ष्यामि व्रतं पाशुपताभि
धम् ॥ ३५ ॥

॥ कर्त्तेति ॥ शिवस्तु सर्वलोकानां कर्त्तापि सन् अस्तुत्यं यदैश्वर्यं तद्वानपि सन् शिवोऽह
मिति वदंतं यं च कं च न जीवमात्रं आत्मना सह तादात्म्यभाजं कुरुते न तपेक्षते इत्यर्थः ॥ प्रकृतं स्तुद
शारीतिः सर्वेश्वरेण संचरणीये इति भावः ॥ ३४ ॥ अंतःकरणशुद्धावुपायांतरं प्रतिजानीते ॥ ॥
धर्मार्थेति ॥ हे मुनयः पाशुपताभिधं ॥ पशुपतेरिदमिति व्युत्पत्त्या पाशुपतसंज्ञकं तत्त्वतं प्रवक्ष्यामि
येन व्रतेन धर्मार्थकाममोक्षाणां पारं निष्पत्तिं यास्यथ गमिष्यथ ॥ ॥ ॥ ३५ ॥ ॥

हस्येति ॥ विगतं रजः पापं येषां ते विरजसः निष्पापाः ॥ विरजसः करोतीति विरजा ॥ तत्करोतीति ण्यंता
त्क्वाप् च ॥ णाविष्ठवदिति टिलोपः ॥ इति सर्वत्र विकारप्रभृतयः ॥ वस्तुतस्तु अकारांतो विरजः शब्दो
स्ति ॥ रजो यत्र तत्सा साईस्त्री पुष्प्यगुणधूलिषु इत्यमरकोशात् ॥ एतेनार्थः पादरजोपमा इत्यादि
व्याख्यानमित्युज्ज्वलदत्तः ॥ तादृशीं दीक्षां कृत्वा विभूतिं रुद्राक्षश्च धारयंतीत्येवंविधाः संतो वेद
साराख्यं शिवनामसहस्रकं जपंतः संतः तेन जपेन मर्त्यत्वं इतरसाधारणत्वं संत्यज्य सम्यक्

३९

कृत्वा तु विरजां दीक्षां भूतिरुद्राक्षधारिणः ॥ जपंतो वेदसाराख्यं शिवनामसहस्रकं ॥ ३६ ॥
संत्यज्यैतेन मर्त्यत्वं शैवीं तनुमवाप्स्यथ ॥ ३७ ॥ ततः प्रसन्नो भगवान् शंकरो लोकशंकरः ॥
भवतां दृश्यतामेत्य कैवल्यं वः प्रदास्यति ॥ ३८ ॥ रामाय दंडकारण्ये यत्प्रादात्कुंभसंभवः
॥ तत्सर्वं वः प्रवक्ष्यामि शृणुध्वं भक्तियोगतः ॥ ३९ ॥ ॥ ॥ ॥

क

त्स्का शैवीं शिवसाक्षात्कारे योग्यां तनुं शरीरं अवाप्स्यथ ॥ ३७ ॥ ततइति ॥ ततः शुद्धशरीरज्ञा
नानंतरं भगवान् शंकरः ॥ लोकस्य शं सुखं करोतीत्येवंरूपः न तु शब्दमात्रेण शंकर इत्यर्थः
॥ सोऽसौ भवतां दृश्यतां साक्षात्कारविषयतां एत्य प्राप्य वै युष्मभ्यं कैवल्यं परमं मुक्तिप्रकर्षं दा
स्यति ॥ ३८ ॥ रामायेति ॥ कुंभसंभवोऽगस्त्यः दंडकारण्ये रामाय यद्दीक्षादिकं प्राहात्तत्सर्वं वः युष्मभ्यं प्र
वक्ष्यामि यूयं भक्त्या युक्ताः संतः इति भक्तियोगिनः संतः शृणुध्वं शृणुत ॥ आत्मनेपदमार्षं ॥ ॥ ३९ ॥ ॥

॥ ॥इतिश्रीमद्विशुद्धाद्वैतसिद्धांतप्रतिष्ठापनैकधुरंधरश्रीकेजीदीवेंकटाद्रिनायकविरचिता
यांश्रीशिवगीताख्यायां प्रथमोऽध्यायः॥१॥ ॥ किमर्थमिति॥ अगं विंध्यपर्वतं स्त्यायति सं
हतं स्तब्धं करोतीति तथाभूतः अतिसमर्थस्तत्वाद्योऽगस्त्येन रामं प्रतिप्रसंगाव्यमानागमन इति भा
वः॥एवंभूतो रामचंद्रस्य सन्निधिं किमर्थमागतः॥कस्मै प्रयोजनायेति किमर्थं निमित्तकारणहेत्व
र्थेषु सर्वासां प्रायदर्शनमिति द्वितीया॥ किंच॥राघवं विरजां दीक्षां कथं कारयामास॥सर्वज्ञस्य अवा
प्तसकलकामस्य रामस्य दीक्षाद्युपदेशोऽसंभावित इति भावः॥ १॥ ॥ ॥ ॥

॥ ॥इतिश्रीपद्मपुराणे शिवगीतासूपनिषत्सु ब्रह्मविद्यायां प्रथमोऽध्यायः॥ ॥ ॥

॥ऋषयऊचुः॥ किमर्थमागतोगस्त्यो रामचंद्रस्य संनिधिं॥ कथं वा विरजां दीक्षां कारयामा
स राघवं॥ १ ॥ ॥ ॥ ॥

ततइति॥ततः दीक्षानंतरं रामः किं फलमाप्तवानतस्त्वं वक्तुमर्हसि॥२॥रावणेनेति॥जनकात्मजासी
ता रावणेन यदा सुतरां बलात्कारेण हृता तदा राघवो वियोगदुःखेन विलपन्नासेत्यन्वयः॥ आसेति ८
तिङंतप्रतिरूपकमव्ययं॥कारयामासेत्यादावनुप्रयोगसामर्थ्येन भूतावाप्रत्ययोऽप्रतिरूपस्य प्र
सिद्धिरिति दिक्॥३॥विलपन्नासेत्युक्तं तामवस्थामाह॥निर्निद्र इति निद्रारहितः अहंकारोऽभि

८

मानोऽस्य तद्रहित आहाररहितश्च सन् दिवानिशं विलपन्नासेति पूर्वेण संबंधः॥तस्य सानुजो ल
क्ष्मणसहितो रामः॥ प्राणान्मोक्तुमैच्छत्॥४॥लोपामुद्रेति॥लोपामुद्रापतिर्मुनिरगस्त्यः राम
स्य प्राणत्यागोद्यमं ज्ञात्वा तस्य रामस्य सन्निधिं समीपं आगमत्॥ आगमत् गतः॥ अथ संसार
स्य सारतां निःसारत्वं तं रामं प्रयोज्यकर्तारं बोधयामास॥५॥

ततः किमाप्तवान् रामः फलं तद्वक्तुमर्हसि॥२॥ सूत उवाच॥रावणेन यदा सीतापहृता
जनकात्मजा॥तदा वियोगदुःखेन विलपन्नास राघवः॥३॥ निर्निद्रो निरहंकारो निरा
हारो दिवानिशं॥ मोक्तुमैच्छत्ततः प्राणान्सानुजो रघुनंदनः॥४॥लोपामुद्रापतिर्ज्ञात्वा
तस्य सन्निधिमागमत्॥ अथ तं बोधयामास संसारासारतां मुनिः॥ ॥५॥ ॥

किमिति॥हे राजेंद्र राजश्रेष्ठ किं विषीदसि॥ ननु कार्थं विषीदामीति चेत्तत्राह॥ कांतेति॥ क
स्येयं कांतेति विचार्यतां प्राप्तकाले जोऽट्॥ नायं विरहदुःखं किं देहस्य अहो स्विदात्मनः॥ नाद्य
द्यसाह॥जड इति॥ अयं स्थूलो देहः जडः॥ इत्यर्थः॥ ननु यद्यपि चिद्भिन्नस्वरूपं जडं दे
हस्यास्ति तथापि देहोपिकाद्यनुपगतालवद्वृनानाश्रयत्वं न विध्यतीति चार्वाकमतेनाशं
पंप्राहाह॥ किमिति॥ किमपि न विजानाति यतः पांचभौतिकः पंचानां भूतानां विकारः॥

तथाच देहेंद्रियं नैकज्ञानाश्रयः। भूतत्वात् घटवत्। विपक्षे बाधकं च। देहस्यानुभवितृत्वे बाल्ये दृष्टस्य कौमारे स्मरणं न
स्यात्। कुमारशरीरयोः परिमाणभेदेन भेदात्। न ह्यन्येन दृष्टमन्यः स्मरतीत्युक्तं। अतिप्रसंगात्। न च
परिमाणभेदेपि द्रव्यैक्यमस्तीति वाच्यं। अवयवापचयं विना परिमाणभेदायोगात्। अवयवान्तरस्य चेद
समवायिकारणतारूपस्य वैशेषिकादिसंमतस्य द्व्यणुकादेर्नाशं विना निर्वाहात्। न च नष्टद्रव्यपूर्वानुभू
तिमात्रेण तदनुभूतं स्मर्यत इति वाच्यं। मातापितृभ्यामनुभूतस्य पुत्रेण स्मरणापत्तेः। यद्यपि देहात्म
वादी अनुमानप्रामाण्यं न सहते तथापि तं साधयित्वा प्रमाप्यांगकमिदं बोध्यं। एवं च नित्यत्वस्य प्रामा

अगस्त्य उवाच॥ किंविधीदृशिरात्मेंद्र कोवा कस्य विचार्यतां। स्कंद उवाच। किं न विज्ञानाति देहोयं पांचभौ
तिकः॥ ॥६॥ ॥ ॥

व० ॥६

स्यादपि न देहात्मकेवादच्छिन इति भाव। न च स्तुत द्विदेहातिरिक्तस्यात्मन एव दुःखादिकमित्याशंक्या
ह॥ निर्लेप इति॥ आत्मा न संजायते नैव च म्रियते नापि दुःखभाक्॥ इति संबंधः॥ तत्र दुःखाभावे हेतुः
निर्लेपः सच्चिदानंदविग्रह इति॥ न हि दुःखहेतुसंबंधाभावे केवलानंदस्य दुःखसंयुक्तमिति भावः॥
जननमरणाभावे हेतुमाह॥ परिपूर्ण इति। न ह्यपरिच्छिन्नस्योत्पादविनाशौ स्तः॥ परिच्छेदापन्तेरिति भा
वः॥७॥ निर्लेपितामेव विहृणोति सार्द्धश्लोकेन स्कर्येसाविति॥ अन्वयस्तु यद्यपीति शेषः यद्यपीति च॥ तथाचा
२

यमन्वयः यद्यपि सूर्यः सर्वलोकस्य चक्षुर्भूत्वा न चक्षुषा यत्नेन व्यवस्थितः। यद्वा। चक्षुरधिष्ठातृत्वाच्चक्षुः। तथा च
श्रुतिः॥ आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशदिति। तथापि चाक्षुषैर्दोषैः। परकामिन्यादिविषयकसाभिलाष
दर्शनादिरूपैर्यथा न लिप्यते तद्वत्सर्वभूतांतरात्मापि दुःखादंकारचिदाभासो पि दुःखैर्न लिप्यते न संबध्यत इ
ति। चक्षुर्दर्शने सत्त्वचक्षुषा स्वाहारचारक्लिवताक्रस्य सर्यकेदृतिये क्लिपितस्य भाव इति त्वमस्मयः स्फुरणवावबोध्या
॥ भावः ६ ॥८॥ ॥

निर्लेपः परिपूर्णश्च सच्चिदानंदविग्रहः॥ आत्मा संजायते नैव म्रियते च न दुःखभाक्॥७॥ सूर्योसौ
सर्वलोकस्य चक्षुर्भूत्वा व्यवस्थितः॥ तथापि चाक्षुषैर्दोषैर्न कदाचिद्विलिप्यते॥ ॥सर्वभूतांत
रात्मापि तद्वद्दुःखैर्न लिप्यते॥८॥

ननु पूर्वषष्ठश्लोके स्कंदः किमित्यादिना देहस्य ज्ञातृत्वं नास्तीत्युक्तं॥ तदनुपपन्नं। स्थूलोहं गौरोहं जाना
मित्याद्यनुभवविरोधादित्याशंक्य लिंगशरीरास्य जीवोपाधिप्रयुक्तोयमनुभव इत्यपरोक्षैतादृशानुभवा
नामादिति समाधानं विवक्षन् सिंहावलोकनन्यायेन अद्देहोस्यादिना सार्द्धश्लोकेन अयं देहोपि मुक्तोजीवो
जीवोपाधिभूतं लिंगशरीरं येन तेसेवं भूतः सन् मृतः सन्नित्यर्थः॥ वह्निनाकृत्वा काष्ठैः करणभूतैर्दह्यते
शिवाप्रभृतिभिर्वा भक्ष्यते॥ तथापि दह्यमानानां भक्ष्यमाणानां वा न जानाति॥ अतो मत्पिंडः ज
डात्मकश्च॥ एवं भूतस्य जडस्य विरहप्रयुक्ता व्यथा का॥ असंभवितेत्यर्थः॥ तदेवं शरीरस्यात्मनश्च

ति

दुःखं न संभवतीति स्थितं। ननु तर्ह्यहंकारस्य दुःखमस्त्विति चेन्न ॥ तस्यैवं मुनेरीदृशस्य नो दुःखमित्यादि
ना पूर्वपक्षं चार्यमुल्लं एवेदं समाधास्यतीति दिक्॥ १९॥ तदेवं कांता कस्य विचार्यतामित्यारभ्य
विरहे तस्य का व्यथेत्यंतेन शोचितादुर्निरूप इत्युक्तं॥ इदानीं शोच्योपि दुर्निरूप इति ज्ञानीते सुवर्ण
गौरीत्यादिभिः शृणुष्वावहितो नृपेत्यंतैः सार्धैस्त्रिभिः श्लोकैः। पंचेषुणा मदनेन शापितो वशीकृतः मू
र्खः स शोचिता याइति इत्थं मन्यते तस्या विवेकं वक्ष्यामि हे नृप अवहितः सन् शृणुष्व शृणु इत्यर्थं निय
॥ इति मन्यते इत्युक्ते तत्र इतीति कथमित्याकांक्षायामाह। सुवर्णेत्यादि सुवर्णमिव गौरी अथवा दूर्वायाः

॥ देहोपि मलपिंडोयं मुक्तजीवो जडात्मकः। दह्यते वह्निना काष्ठैः शिवाद्यैर्भक्ष्यते पि वा ॥ २०॥ तथापि
नैव जानाति विरहे तस्य का व्यथा ॥ २१॥ सुवर्णगौरी दूर्वायाः दलवच्छ्यामला पि वा ॥ पीनोत्तुंगस्त
नाभोगभुग्नसूक्ष्मविलग्नका ॥ २२॥ बृहन्नितंबजघना रक्तपादसरोरुहा। राकाचंद्रमुखी बिं
बप्रतिबिंबरदच्छदा॥ ॥ २३॥ ० ॥ ० ॥ ॥

लवच्छ्यामला। पीनयोः तुंगयोः स्तनयोराभोगेन विस्तारेण भुग्नं अवनतं सूक्ष्मं कृशं अवलग्नं मध्यं यस्याः
सा तथा। स्तनभारनम्रेत्यर्थः। मध्यमं चावलग्नं च मध्यो स्त्रीत्यमरः। विलग्नचेति पाठांतरमिति क्षीरस्वामी ॥
बृहन्नितंबजघनं यस्याः सा। पश्चान्नितंबः स्त्रीकट्याः क्लीबे तु जघनं पुर इत्यमरः। रक्ते लोहितवर्णे पादावेव
सरोरुहे यस्याः सा। राकाचंद्रमुखी पूर्णिमाचंद्र इव मुखं यस्याः सा। बिंबस्य बिंबीफलस्य प्रतिबिंबं सदृशः
ओष्ठो यस्याः सा ॥ २३॥

म. स्त्रीविलग्नेति पाठः क्षीरस्वामिकृतः॥

नयनद्वयेन र शं

नीलं यदिंदीवरं तस्य सदृशं नीलेंदीवरनीकामित्यस्वपदविग्रहः। मयूरव्यंसकादित्वात्स
मासो नित्यः। यथाचामरसिंहः। स्युरुत्तरपदे त्वमी। निभसंकाशनीकाशप्रतीकाशो
पमादय इति। तादृशेन शोभिता। मत्तकोकिलस्येव संलापो यस्याः मत्तद्विरदवद्गंतुं शीलं य
स्याः सा॥ १४॥ एवं विधा तस्य कांता पंचेषुशरेषु त्तमैरुत्कृष्टैः कटाक्षैर्मामनुगृह्णातीति यां म

॥ नीलेंदीवरनीकाशनयनद्वयशोभिता। मत्तकोकिलसंलापा मत्तद्विरदगामिनी॥
१४॥ कटाक्षैरनुगृह्णाति मां पंचेषुशरोत्तमैः। इति यां मन्यते मूर्खः स च पंचेषुशासि
तः॥ १५॥ ॥ तस्या विवेकं वक्ष्यामि शृणुष्वावहितो नृप॥ १५॥ न च स्त्री न पुमानेष नैव चायं
न पुंसकः। अमूर्तः पुरुषः पूर्णो द्रष्टा देही स जीवनः॥ १६॥

स एव तस्या विवेकं वक्ष्यामीति संबंधः॥ १५॥ सोयमस्य दुर्निरूपतामभिप्रेत्य तदीयं विवेचनं प्रतिजानीते
तदेवाह। न चेत्यादिना। एषः कटाक्षैरनुगृह्णातीति पूर्वोक्तो द्रष्टा पुरुषः परमात्मैव। स च न स्त्री न पुमान्ना
पि नपुंसकः। अत्र हेतुः अमूर्त इति। स्त्रीत्वपुंस्त्वादिकं हि अवयवसंस्थानविशेषापन्नं न च अमूर्ते तत्
संभवतीति भावः। ननु अहंकार एव द्रष्टेत्याशंक्याह। स जीवनः प्राणधारणवतोऽहंकारादेर्द्रष्टाय
नः पूर्णः अधिष्ठानतया सर्वत्रानुस्यूतः। तथा च सर्वानुस्यूते नैकेनैव सकलव्यवहारोपपत्तौ नानैकाश्रय
को

नुशरीरस्वं जीवोपाधिं शोचामीत्याशंक्याह। यास्त्वंगीति। मलपिंडात्मिका जडाया त्वयात्वं
गी मृदुर्बालेति शोच्यते सा तु कदापि न पश्यति शृणोति जिघ्रति वा। तथा च करचरणादिरयमनुग
ता तीसु किं व्याहृता॥ शोकश्च विफल इति भावः॥१७॥ हे राघव तस्यास्तन्वंग्यास्तनुः चर्ममात्रं न
तु ज्ञानादिशालि इति बुध्वा तिज स्वति तिज स्वेत्यर्थः॥ तिजेः क्षमायां सनिरूपं॥ दितं तु दातिस्रि
यात्ति विदित्यादाविव छंदसि वैकल्पिकत्वान्न भवति। क्वचित्तु बुध्वात्यज स्वेति पाठः॥ तत्राका
रप्रश्लेषः अति अतिशयेन अहत्वहते न च॥ अहत्वा प्रौसंधानतः संहननं दाढ्यमिति सीरदेवः।
संघातेन्च
॥ यात्वन्वंगी मृदुर्बाला मलपिंडात्मिका जडा॥ सा न पश्यति यत्किंचिन्न शृणोति न जि
घ्रति॥१७॥ चर्ममात्रं तनुस्तस्या बुध्वा तिज स्व राघव॥ या प्राणादधिका सैव हंत ते
स्यात् घृणास्पदं॥१८॥

पद्व्यत्यय आर्षः संहनने हेतुः। या प्राणादिति॥ अविचारदशायां या प्राणादप्यधिका सैव पूर्वो ११
क्तरीत्या विवेकिनस्तव घृणास्पदं जुगुप्सा विषयः स्यात्। तथा चोदासीनेन प्राणादप्यपि शोको नु चि
तः किमुत जुगुप्सितेऽर्थे इति भावः। जुगुप्सा करुणे घृणे इत्यमरः॥१८॥ ॥श्री॥ ॥

जायंत इति। देहिनो यदि जायंते तर्हि भूतेभ्यः असंगस्यात्मनः परिणामायोगात्॥ यदीत्यसं
दिग्धे संदेहवचनं यदि वेदाः प्रमाणमिति वत्॥ अत एव पांचभौतिकाः। ततो भूतकार्यत्वात् घटादि
वत्तेषां चेतनत्वेत्यर्थः। तेषु परिपूर्णोऽधिष्ठानतयानुस्यूत आ[illegible]तु यद्यस्मात्कारणादेकलः सना
तनश्च॥१९॥ केति। तत्र तथा मतौ कांता का कांतश्च कः। आत्मन एकत्वादिति भावः। देहादीनामपि भक्तां
तात्वादियुक्तमित्याह। सर्व एवेति। सर्वे एव देहेंद्रियादयः सहोदराः एकरूपाः। उडाभूतत्वात्माः

जायंते यदि भूतेभ्यो देहिनः पांचभौतिकाः॥ आत्मा यदेकलस्तेषु परिपूर्णः सनात
नः॥१९॥ का कांता तत्र कः कांतः सर्व एव सहोदराः॥ निर्मितायां गृहावल्यां तदवच्छिन्न
तां गतं॥ ॥ नभस्तस्यां सुदग्धायां न कांचित्क्षतिमृच्छति॥२०॥ तद्वदात्मापि देहेषु परिपूर्णः
सनातनः॥ हन्यमानेषु तेष्वेव स्वयं नैव विहन्यते॥२१॥
गृहावल्यां
पारमार्थिकधर्मायोग्या इत्यर्थः। न चात्मनस्तद्देहादिभंगे अधिष्ठानस्य काचित् क्षतिरित्याह। निर्मित
यां तस्यां तदवच्छिन्नतां गतं नभस्तस्यां दग्धायां सत्यां कांचिदपि क्षतिं नाशं छतिन प्राप्नोति। यथा
२०॥ तद्वद्देहेषु परिपूर्णः सनातन आत्मापि देहेषु हन्यमानेषु सत्सु स्वयं न विहन्यत एव। तदित्यं दे
हहन्यमानयोर्जडत्वाद्दशोच्यता। आत्मा तु निर्विकारत्वादशोच्य इति स्थितं॥२१॥ ॥श्री॥ ॥

हंतेति॥हननकर्त्ता हंता।स्वं ह्यात्मानं हंतुं मन्यते तथा हतः पुरुषो यद्यात्मानं हतं मन्यते तर्हि
तावुभावपि न विजानीतः भ्रांतावित्यर्थः।यतः अयमात्मा न हंति न हन्यते च।असंगत्वान्नित्यत्वा
च्चेति भावः॥२२॥अस्मादिति।हे नृप अस्मात्प्रागुक्तहेतोः अतिदुःखेन यः खेदः दैन्यं खिन्नदैन्येऽप्यपरि

हंता चेन्मन्यते हंतुं हतश्चेन्मन्यते हतं॥ तावुभौ न विजानीतो नायं हंति न हन्यते॥२२॥ अ
स्मान्नृपाति दुःखेन किं खेदस्यास्ति कारणं॥ स्वस्वरूपं विदित्वेदं दुःखं त्यक्त्वा सुखी भ
व॥२३॥ ॥श्रीराम उ॥ ॥मुने देहस्य नो दुःखं नैव चेत्परमात्मनः॥ सीतावियोगदुःखा
ग्निर्मां तस्मात्कुरुते भृशं॥२४॥ ॥

ध्यातेचेति धातोर्न वेद्यत्।तस्य कारणं किमस्ति न किमपीत्यर्थः।इदं प्रागुक्तं सच्चिदानंदरूपं विदित्वा
दुःखं च त्यक्त्वा सुखी भवेति फलितार्थोपसंहारः॥२३॥ उक्तरीत्या स्थूलशरीरस्य परमात्मनश्च दुःखनि
राकरणे प्रत्यक्षविरोधं शास्त्रोपदेशवैफल्यं चापि प्रेत्य पृच्छति त्रिभिः श्लोकैः।मुने देहस्येति देहस्य १२
निमननशीलस्य अस्मदीयसंशयछेदे समर्थस्त्वमिति भावः।देहस्य दुःखं नो इत्यंशोऽभ्युपगमः परमा
त्मनोपि नैव चेत् नर्हि सीतावियोगाज्जातं यत् दुःखं स एवाग्निर्मां कथं तस्मात्कुरुते॥२४॥ ॥

सदेति।योर्थो दुःखात्मकः सदानुभूयते स नास्तीति त्वयोक्तः।तत्र त्वदुक्तौ मे विश्वासः कथं जाय
तां प्रत्यक्षविरुद्धेर्थे शब्दस्याप्रसरादिति भावः॥२५॥अन्य इति॥शरीरात्मनोरज्ञत्वं॥ता
त्वयोक्तं।ताभ्यामन्यः कश्चिज्ज्ञातास्ति नास्ति वेति विकल्प्य द्वितीयं दूषयति।कोन्यो ज्ञातेति।यद्य
न्योपि नास्ति नर्हि सुखस्य दुःखस्यापि वा कोन्यो ज्ञाता तद्ब्रूहि।ननु नास्त्येवं ज्ञातेत्यत आह।येनेति।
जंतुः शरीरी तप्यते।तथा च ज्ञातुरपलापे प्रत्यक्षविरोधः।मोक्षशास्त्रानर्थक्यं च स्यादित्यर्थः।अना
त्मनो मोक्षानन्वयात्।द्वितीयेपि नेति भावः॥२६॥चिन्मात्रविषया चिन्मात्राधारा च त्रिगुणात्मिका

सदानुभूयते योर्थः स नास्तीति त्वयेरितः॥जायतां तत्र विश्वासः कथं मे मुनिपुंगव॥२५॥
अन्योस्ति नास्ति कोन्यो ज्ञाता येन जंतुः प्रतप्यते॥सुखस्य वापि दुःखस्य तद्ब्रूहि मुनिसत्त
म॥२६॥

अनादिरविद्या सैव माया।तस्यां तत्कार्ये अहंकारे वा प्रतिबिंबितं चैतन्यं जीवः स चाहंकारोपाधिक
प्रमातृत्वकर्तृत्वभोक्तृत्ववान्।अतो नानुभवविरोधः।शास्त्रवैफल्यं वा।यत्तु आत्मा ज्ञाता नेति प्रागुक्तं
तद्द्विविधं तत्र परमात्मानं ज्ञातेत्याशयेन जीवोपि बिंबात्मकः स्वसमानसत्ताकज्ञातृत्वाभावो नेत्याशये
न च।एवं च यद्यपि त्वयि विषमसत्ताकं ज्ञातृत्वमप्यस्ति तथापि तस्य शुक्तिरजतकल्पत्वात्तत् शोकः का
र्य इत्यभिप्रेत्य सकलवेदांतरहस्यमुपदिशत्यगस्त्यः।चतुर्दशभिः श्लोकैः॥दुर्ज्ञेयेति।शं सुखरूपोभ

वतितिष्ठतीति शंभुः शुद्धः पूर्णानंदः तस्येयं शांभवी। तन्मात्रविषया तदाधारा चेत्यर्थः। नृधातुः
स्त्विति वाची नृत्तनायामिति स्मरणात्। न चोत्पत्तिरेव सत्तेति भ्रमितव्यं। तन्नजानस्तत्र नवः इ
नि प्रथकृसूत्र प्रणयनात्। ततः कर्तरि कृदिति स्मरणात्कर्त्र्यर्थे मितद्वादिभ्यश्चेति डुप्रत्ययः। ताध
शी माया दुर्ज्ञेया। ज्ञोदा। क्षमा। अघटितघटनापटीयसीत्यर्थः। अत एव तया जगज्जीवजातं संमोह्य
ते आवरणविक्षिप्यते अधिष्ठानावरणपूर्वकमनिर्वचनीयवियदादि प्रदर्श्यत इति भावः। पारमा

॥अगस्त्य उ०॥ दुर्ज्ञेया शांभवी माया तया संमोह्यते जगत्॥ मायां तु प्रकृतिं विद्धि मायिनं तु
॥महेश्वरं॥२७॥ ॥

र्थिकत्वे अघटितं न घटयेत्॥ आवरणं चाघटितं॥ तथा हि। अस्ति प्रकाशत इति। व्यवहारयोग्येना
स्तीति व्यवहारयोग्यतारूपं तावात्मकमावरणं। अस्तीति व्यवहारयोग्यता। विरहरूपं वा। उ
नयथापि विरुद्धयोग्यतयो योग्यत्व तद्विरहयोर्युक्ता। विरहरूपं वा। उभयथापि विरुद्धयोर्युक्ति
स्वैकत्रायोगात् द्विषमसत्ताकता कल्प्या। तत्रास्तीति योग्यतायाः परमार्थिकत्वेनाधिष्ठानाभिन्न
त्वेपुत्तरदत्त प्रविष्टयोर्भावाभावयोर्मिथ्यात्वमेव वाच्यं। तच्छक्तिर्नियामिका च माया दृश्यैवे १३
ति। किंच। कार्यपरिणामिता पारमार्थिकस्य दुर्घटेति मिथ्यात्वमेव विद्धि। तापदादेः परिणामि

त्वीकर्तव्यं। तथा हि। सत उत्पत्तौ आत्माद्युत्पद्येत। असत उत्पत्तौ शशशृंगाद्यपि उत्पद्येत प्रागभावप्रति
योगिन उत्पत्तिरिति चेन्न। असतः प्रतियोगितानुपपत्तेः। प्रतियोगिता हि घटादिस्वरूपात्मिका तिपर
मतं। अस्तु वा अत्यंतोपाधिरूपापि तथैव प्रतियोगिता तथापि न निस्तारः। तद्वत्तैव शशशृंगा
गी देराद्युत्पत्तेः। सा शशशृंगं नास्तीति चेन्न किमनुत्पन्ने घटे नास्ति। ओमिति चेन्न। निःस्वरूपस्य
अधिकरणतानुपपत्तेः। तस्माच्छुक्तिरजतादिवन्मिथ्यैव सर्वकार्यं एवं च स्थितेः एक
बाध्यमुपादानं परिणाम्यपि मिथ्यैवेति नात्मा तथा किंतु विवर्ताधिष्ठानमात्रमात्मा ननु अज्ञा
नमेवावारकं विक्षेपकं च॥ शुक्त्यवच्छिन्नचैतन्यविषयकस्याज्ञानस्यैव तदावरणजनकता
या रजतोपादानतायाश्च दर्शनादिति चेन्न। तस्यैव मायाशब्देनाप्यभिधानात्॥ माया च विद्या च स्व
यमेव भवतीति श्रुतेः। यथा चैतत्तथा मायामयं रजतमिति पंचपादिका ग्रंथव्याख्यानाव
सरे विवरणकारैः प्रपंचितं। नन्वेवमपि मायाध्यक्षेण प्रकृतिः सूयते सचराचरमिति श्रवणा
त्किं त्वन्मायैव प्रकृतिरित्यत्र प्रकृतिरेवोपादानमस्तु इत्याशंक्य सापि स्वैवेत्याह। मायां त्विति।
सकलकार्यपरिणामित्वान्मायैव प्रकृतिरित्यर्थः॥ ननु मायाविद्ययोरभेदाज्जीववदीश्वरो
प्यज्ञः स्यादित्याशंक्याह। मायिनमिति। महेश्वरं तु मायिनं विद्याक्तत्वज्ञानिनमित्यर्थः। अ
यं भावः धर्मैकोपि आवरणविक्षेपशक्त्योर्भेदात्तत्पुरस्कारेण व्यवस्थयैवाविद्याशब्दो माया

शाबल्यप्रयुज्यते। विक्षेपमात्रदर्शिनऐंद्रजालिकस्यलोकेमायाविसेनव्यवहारात्॥ तेनव्यामो
हितानांतुअज्ञानित्वेनैवव्यवहारात्॥ तथाचबिंबप्रतिबिंबयोःपरमार्थतऐक्येप्यौपाधिकभेदा
दयथाश्यामत्वावदातत्वादिकंव्यवस्थयैवोपपद्यतेतथाबिंबभूतस्यईश्वरस्यानावृतस्व
रूपत्वान्नसंसारोनवाअज्ञत्वंप्रतिबिंबीभूतस्यजीवस्यतुआवरणंसंसारोअज्ञत्वंचे
तिव्यवस्था। अतएवनतंविदाथेत्यादिश्रुतयोयुष्माकमित्युक्तिःसंगच्छतइतिदिक्॥२७॥ ननुजी
वस्यतत्वोपाधिकभेदघटावच्छिन्नतदवच्छिन्नाकाशवत्प्रदेशभेदेनैवस्थितिर्वाच्या॥ त
थाचविपदाद्युपादानस्यब्रह्मणःप्रपंचेनुस्यूततयातत्रजीवस्यस्थितिर्नस्यादित्याशंक्याह॥

तस्यावयवभूतेनव्याप्तंसर्वमिदंजगत्॥ सत्यज्ञानात्मकोनंतोविभुरात्माम
हेश्वरः॥२८॥

स्य ते

तस्येति। तस्यपरमात्मनोवयवभूतेनावयवप्रायेणसर्वजीवेनेदंजगद्व्याप्तं। सत्यज्ञानात्म
कोअनंतईश्वरात्मापिविभुरव्यापकएवेत्यर्थः॥ अवच्छेदवादेहिप्रागुक्तदोषःस्यान्नतुप्रति
बिंबाकारेतत्वपगमाद्वेतिभावः। अतएवयथाह्ययंज्योतिरात्माविवस्वानित्यादिश्रुतयःप्र
तिबिंबदृष्टांतमाहुःसूत्रंच॥ अतएवोपमासूर्यकादिवदिति॥२८॥ ॥श्री॥ ॥ १४

पु:३

ननुजीवस्याव्यापकत्वेघटावच्छेदेनापिसुखादिभोगःस्यादित्याशंक्याह॥ तस्येति। जीवलोके
जीवोलोक्यतेऽस्मिन्निति तथाभूतेस्यदृष्टजीवोपाधावितियावत्प्राणिनांहृदयेएवतस्यांशःभो
क्तृत्वादिनास्थितः। यथान्यायनयेशरीरावच्छिन्नस्यैवभोक्तृत्वंतद्वदितिभावः। ननुअहंकारस्यका
र्यत्वात्तदवच्छिन्नःप्रमातापिसादिःस्यात्। तथाचकृतहानाकृताभ्यागमौस्यातामित्याशंक्याह
विस्फुलिंगाइति। यथावह्नेःकाष्ठयोगतोविस्फुलिंगाअग्निकणाःसूक्ष्मरूपेणप्राक्सन्तएवजायंते॥ २९॥
तद्वदनादिभिःप्रवाहानादिभिःकर्मभिःसंबद्धाअनादिर्याभावनासंस्कारस्तेनयुक्तामहेशि

॥ तस्यैवांशोजीवलोकेहृदयेप्राणिनांस्थितः॥ विस्फुलिंगायथावह्नेर्जायंतेकाष्ठयोग
॥ गतः॥२९॥ अनादिकर्मसंबंधास्तद्वदंशामहेशितुः॥ अनादिवासनायुक्ताःक्षेत्र
॥ ज्ञाइतिते स्मृताः॥३०॥

तुरंशाअंशोपाधयोऽहंकाराजायंतेतएवचदेहेनभोपाधित्वात्क्षेत्रज्ञाइतिस्मृताः॥
१५ अंतःकरणस्यस्थूलस्यैवसूक्ष्मान्यतररूपेणमोक्षमनुवृत्तेर्नोक्तदोषः। इतिभावः। तथाचसूत्राणि
पुंस्त्वादिवत्त्वस्यसतोभिव्यक्तियोगात्। सएवतुकर्मानुस्मृतिःशब्दविधिभ्यःतदैवोपतिःसंसार
व्यपदेशादित्यादीन्यमुमेवार्थंस्फुटीकुर्वंतीतिदिक्॥३०॥ ननुहृदयेप्राणिनांस्थितइत्यादि

ग्रंथेन अंतःकरणभोगोपाधितयोक्तं। तदनुपपन्नं ग्रंथांतरेषु पाध्यंतराणामेव श्रवणाच्च तथा हि। मन एव मनुष्याणां कारणं बंधमोक्षयोः। ईक्षेत विभ्रममिदं मनसो विलासमि त्यादौ मनस उपाधितया श्रुतं। तथा बुद्धेर्गुणेनात्मनो गुणेन चैव मित्यादौ बुद्धिः श्रुता। अन्य था। शोकहर्षभयक्रोधलोभमोहस्पृहादयः। अहंकारस्य दृश्यंते जन्ममृत्युश्च नात्मनः

॥मनो बुद्धिरहंकारश्चित्तं चेति चतुष्टयं॥ अंतःकरणमित्याहुस्तत्र ते प्रतिबिंबिताः ॥३१॥
जीवत्वं प्राप्नुयुः कर्मफलभोक्तार एव ते। ततो वैषयिकं तेषां सुखं वा दुःखमेव च॥३२॥

त्यादावहंकारः श्रुतः। सर्वश्चित्तविलासोयमित्यादौ चित्तं श्रुतं। तथा च किं विनिगमकमित्या शंक्याह। मन इति संकल्पविकल्पात्मकं मनः। निश्चयात्मिका बुद्धिः अभिमानात्मकोहंकारः विचारात्मकं चित्तं। इति वृत्तिविशेषवशादंतःकरणमेव चतुरवस्थं चतुर्धा व्यपदिश्यते अ तो न कश्चिद्विरोध इति भावः। नन्वहंकार एव भोक्ता न त्वात्मेति प्रतीयते। अहं भुंज्ये इत्यादि प्रत्यक्षेनो ऋद्ध्या नवगाहनात्। शोकहर्षेत्याद्युपक्रम्य अहंकारस्य दृश्यंते जन्ममृत्युश्च ना त्मन इति वचनाच्च। तत्कथमहंकारस्य भोगोपाधित्वमुक्तमित्याशंक्याह। तत्रेत्यादि तत्राहं कारे प्रतिबिंबिता स्वेकल्पितभेदेनानंता आत्मानः॥३१॥ जीवत्वं प्राप्नुयुः ते प्रतिबिंबाः कर्मफ २५

लभोक्तार एव। ननु सांख्यमत एवं औपनिषदे दर्शने जीवानां सर्वथा कर्तृत्वशून्यता। त था। सति मोक्षशास्त्रारंभवैयर्थ्यापत्तेरिति भावः। तथा च पारमर्षं सूत्रं। कर्ता शास्त्रार्थवत्वा दिति। नन्वेवं सति आत्मनो असंयुक्तत्वं पूर्वोक्तं विरुध्येतेत्याशंक्याह। तत इति। तेषां प्रतिबिंबे
बधि तन्यानां चैकं विषयसंबंधं प्रयुक्तं दुःखं वा तत्तः। तस्मात् अहंकाराख्यादुपाधेः भुक्त इत्यर्थः।
अयं भावः। अहंकारस्य अनौपाधिकं स्वसमानसत्ताकं कर्तृत्वं। आत्मनस्तु अहंकारोपाधिकं भुं

तएव भुंजते भोगायतनेस्मिन्नुशरीरके। स्थावरं जंगमं चेति द्विविधं वपुरुच्यते॥३३॥

मिन्न्यूनसत्ताकं कर्तृत्वं। अतो मिथ्यात्वघटकीस्वसमानसत्ताकं कर्तृत्वाभावस्यात्मनि सत्वात्तत्पूर्वोक्त भूत मकर्तृत्वं विरुध्यते। आरोपितेनारुणिम्ना स्वाभाविकस्य स्फटिकस्वच्छत्वस्यानपायात् इदं च यथा चत द्भोक्तव्यथेति सूत्रे स्फुटं॥३२॥ ननु यद्यहंकाराख्योपाधिर्दुःखप्रयोजकस्तर्हि देवदत्तीयाहंकारोपाधि नायज्ञदत्तादिजीवा अपि दुःखमनुभवेयुः न च यज्ञदत्तादिजीवास्तत्तदहंकारावच्छेदेनैव वर्तंते न तु देवदत्तीयाहंकारावच्छेदेनेति वाच्यं। तस्याचयवन्तेन व्याप्तं सर्वमिदं जगदिति श्लोके प्रतिबिंबानां व्यापकत्वस्य पूर्वमुक्तत्वादित्याशंक्याह। त एवेति य स्मिन्यस्मिन्नहंकारो योयः प्रतिबिंबस्तानदहंका रोपाधिकं। भोक्तृत्वं तत्तत्प्रतिबिंबस्यैव न त्वन्यस्य इतरव्यावृत्तस्य स्वप्रतिबिंबमात्रनिरूपितस्याविद्या

कसंबंधविशेषस्याहंकारेषु फलवत्वेन स्वीकारात्। तदयं मूलार्थः। तएव। येषु येष्वहंकारे
षुफलवत्वेन स्वीकारात्। तदयं मूलार्थः। तएव। येषु येष्वहंकारये प्रतिबिंबिता स्मरच। भुंजते। नाहं
कारेण भोगवंतो भवंति। नन्वेवमपि सुहृद्दर्शनादिकाले विषयदेशव्यापिन्याः अंतःकरणवृत्तेर
भ्युपगमात् सुहृच्छरीरस्यापि तद्दृष्टहंकारावच्छिन्नतया सुहृच्छरीरावच्छेदेन दुःखसुखाद्यापद्ये
तेत्याशंक्याह॥ भोगायतन इत्यादि॥ भोगायतनं भोगावच्छेदके अस्मिन्नाहंकाराभेदेनाध्यस्ते शरी
रके अनुकंपाविषयीभूते शरीरे न तु उदासीनशरीरेपीत्यर्थः। अनुकंपायामिति कन्। अयं भावः॥
सुहृच्छरीरे रापरोक्ष्यानुरोधाद्विनाचृत्तसाहितादात्म्यं यद्यप्यस्ति तथापि दूरस्थवनस्पत्या
दिवैकाध्यासोहंकारेण समं स्वशरीरस्यैव॥ अहं गौर इत्यादिप्रतीतेः। न तु सुहृदादिशरीरेण
समं सोस्ति। अयं घट इतिवदयं सुहृदिति तटस्थतयैव प्रतीतेः। तथाचाहंकाराभेदेनाध्यस्त
मेव शरीरं भोगसाधनं। तदाकूत्यार्ष्यकाराः। न चानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रिय
त इति। विज्ञानात्मवादिनां नैयायिकादीनामपि द्दोषैव गतिः॥ गौरोहमित्यादिभ्रमस्ते
षां मते अन्यथाख्यातिरूपः। अस्मन्मते त्वनिर्वचनीयख्यातिरित्यन्यदेतत्॥ नचतददृष्टा १६
रब्धत्वं नियामकं पुत्रादिशरीरस्यापि तथात्वात् प्रत्युपैति तन्मते भ्रमसंबंधस्यापि स
मवायैकेनाति प्रसक्तत्वात् सर्वेक्षातिप्रसंगो दुर्वार इति दिक्॥ सत्रात्मिच। अदृष्टानियमात्। अनि

र्वत्नेमन्येप्रपद्यंते शरीरित्वाय देहिनः। स्थाणुमन्येऽनुमन्यंते यथाकर्म यथाश्रुतम्॥ ३५॥ ॥

संध्यादिष्वपि चैवं। प्रदेशादिति चैत्रांतर्गवादित्यादीनि उक्तमर्थं द्रढयंतीति ग्रंथविस्तरभ
याद् उपरम्यते॥ अहंकाराभेदेनाध्यस्ते स्थूलशरीरे भोग इत्युक्तं। तत्प्रसंगात् स्थूलशरीराणा
मवांतरविभागमाह॥ स्थावरं चेति। स्थातुं शीलमस्येति स्थावरं संचाराक्षमं। तथाकुलविहि
तनिषिद्धमार्गैर्गच्छति जंगम्यते इति जंगमं। गत्यर्थत्वात् कौटिल्ये यङ्। तदंतात् पचाद्यच् इति वपुः स्थू
लशरीरं द्विविधं द्विःप्रकारमुच्यते॥ ३३॥ स्थावरा इति॥ तत्र तयोः स्थावरजंगमयोर्मध्ये ये स्थाव

स्थावरास्तत्र देहाः स्युः स्तम्बा गुल्मलतादयः॥ अंडजाः स्वेदजास्तद्वदुद्भिज्जा इति
केते गुल्मलतादयः। जंगमा नाम। अंडजा इति। अंडेषु जाता। अंडजाः पक्षिसर्पादयः। स्वेद जातामशकादयः॥
जंगमाः॥ ३४॥ ॥रा देहाः। ते स्तम्बाः लघुद्राः अतिमंदांतःसंज्ञाः स्युः उद्भिदंति भूमि

इत्युद्भिदः। तादृशाः संतो ये जायंते ते उद्भिज्जाः पिपीलिकादयः। उपलक्षणं चैतत् जरायुजा
मनुष्यमृगादयोपि बोध्याः॥ ३४॥ एवमुच्चावचान्देहानुक्त्वा तत्प्राप्तौ नियामकमाह॥ योनि
मिति। अन्ये एव वक्ष्यमाणेभ्यः स्थाण्वादिशरीरिभ्यो भिन्नाः पुण्यविशेषशालिनो देहिनः दे
हसंबंधयोग्याः प्रमातारः योनिं स्त्रीलिंगं शरीरित्वाय शरीरसंबंधार्थं प्रपद्यंते प्राप्नुवंति।
अन्ये च तु स्थाणुं स्थाणुप्रकृतिशरीरमनुसंयंति अत्र विनिगमकमाह यथाकर्म पापपु
ण्यानुसारेण। यथाश्रुतं। वेदशास्त्राद्यध्ययनजन्यसंस्कारानुसारेणेवेति॥ ३५॥ नन्वमीषां दे

हानांजोगाय तनत्वे त्रिनयनचतुर्भुजादिशरीरं परिग्रहीनवनोबिंबीन्तस्येश्वरस्यापिजोगः
स्यात्॥ कारणे सतिकार्यस्यावश्यकत्वादित्याशंक्याह॥ सुख्यहमिति। जीवएव सुख्यहं दुःख्यहं चै
त्यभिमन्यते। न तु बिंबीन्तोपि॥ अयंनावः शरीरमात्रे सत्यपि परमात्मनोनजोगः। कारणांत
रविरहात्॥ सामग्र्यधीनं हि कार्यं कतिपयमात्रकारणमात्रेणपादयितुं न शक्यते। कारणं चेहध
र्मधर्मावपि तौ च भगवति न विपद्येते॥ जीवे तु सुखदुःखादिसामग्र्यावर्त्तत इत्याशयेन तं विशि
नष्टि॥ निर्लेपोपीति॥ यद्यपि निर्लेपः समानसत्ताकसंगरहितः। तथा परं ज्योतिः स्वचिद्रूपः त

॥ सुख्यहं दुःख्यहं चेति जीव एवाभिमन्यते॥ निर्लेपोपि परंज्योतिर्मोहितः शंभुमायया॥
॥३६॥ कामक्रोधस्तथा लोभमदो मात्सर्यमेव च। मोहश्चेत्यरिषड्वर्गमहंकारगतं विदुः॥३७॥

थापि शंभुमायया मोहितः। तथा चावृतस्वरूपत्वात् दुःखं युक्तमिति भावः॥३६॥ आवृतस्वरूपे अहं
काराध्याससंभावाद् अहंकारधर्मसंबंधोप्युचित एवेत्याशयेनाह काममिति॥ ॥कामक्रोधलोभम
दमात्सर्यमोहाख्यं अरीणां षड्वर्गं षट्कं अहंकारगतं अहंकारनिष्ठं विदुः तद्वृत्तिविशेषात्मकत्वा ८
त्॥ तथा च श्रुतिः। कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे
ति॥३७॥ साहंकारस्य दुःखोपाधितामन्वयव्यतिरेकाभ्यां द्रढयति॥ स एवेति॥ ॥स्वप्नजाग्रदव

स्थयोर्जीवः स एव अहंकारोपहितः सन्नेव बध्यते दुःखादिभजते। सुषुप्तौ तु तदभावात्तस्यत
पाधिभूतस्याहंकारस्याभावात् स्वस्वरूपेणावस्थानात् जीवः शंकरतां बिंबसाम्यं दुःखराहित्यं गतः
तथा च श्रुतिः। स्वमपीतो भवतीति। सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेति। मि
३८॥ ननु तथापि जीवस्याहंकाराद्युपादानतया ब्रह्मणश्च वियदाद्युपादानतया सविकारता पत्ति
रित्याशंक्य परिणामित्वे हि एवं स्यात्। इह तु विवर्त्ताधिष्ठानतामात्रमित्याह स एवेति। स जीवः मायया

स एव बध्यते जीवः स्वप्नजाग्रदवस्थयोः। सुषुप्तौ तदभावाच्च जीवः शंकरतां गतः॥३८॥ स
एव मायया स्पृष्टः कारणं सुखदुःखयोः। शुक्तौ रजतवद्विश्वं मायया दृश्यते शिवे॥३९॥ ततो
विवेकज्ञानेन न कोप्यत्रास्ति दुःखभाक्। ततो विरम दुःखात्त्वं किं मुधा परितप्यसे॥४०॥

परिणामिन्या स्पृष्टः सन् सुखदुःखयोः कारणं अधिष्ठानमित्यर्थः। शिवे ब्रह्मणि विश्वं वियदादि
यद्दृश्यते तदपि मायया परिणामिन्या। उभयत्रापि दृष्टांतमाह शुक्तौ रजतवदिति। तद्विबाध्यत्वा
बाध्यत्वाभ्यां विवर्त्तपरिणामयोर्भेदः॥३९॥ ततइति। ततः आत्मनोसंगत्वादहंकारादेश्च वास्तवत्वाभावाद्वि
वेकपूर्वकेन ज्ञानेन अधिष्ठानसाक्षात्कारेण अत्र अस्यां अविद्यानिवृत्तौ सत्यां दुःखं भजत इ
ति दुःखभाक्। कोपि नास्ति। उपसंहरति तत इति तत उक्तहेतोस्त्वं दुःखाद्विरम मुधा किमिति परि ८ प्रबो. वि. मर्यं शोचसि॥४॥

नवदुक्तरीत्याजडस्यसर्वस्यमिथ्यात्वेप्यप्रतिबद्धाधिष्ठानसाक्षात्कारपर्यंतंअहंकारस्तद्धर्मोश्चदुः
खाद्योदुर्निवाराः किंचजीवन्मुक्तावस्थायामप्यवश्यंभोक्तव्यंप्रारब्धं।आपातज्ञानवतात्र्यवण
दिमात्रवतावामादृशेनकथंनभोक्तव्यं।तथाचशोकोपिकथंवाल्प्य इत्याशयेनश्रीरामउवाच॥
मुनेइति।हेमुनेत्वयामद्ग्रेयत्कथितंतत्सर्वंसत्यमेव।तथापिउज्वलं।भोगैकनाश्यत्वात्प्रबलंए
तत्भुज्यमानफलंप्रारब्धं।चतद्दृष्टवानत्मांनजहाति॥४१॥मत्तइति।मद्यंकर्त्तनष्टाधृत्वाऽवि

॥श्रीरामउवाच॥ ॥मुनेसर्वमिदंसत्यंयन्मद्ग्रेत्वयेरितं।तथापिनजहात्येतत्प्रारब्धा
॥दृष्टमुल्बणं॥४१॥मत्तंकुर्याद्यथामद्यंनष्टाविद्यमपिद्विजं।तद्वत्प्रारब्धभोगोपिनजहा
॥तिविवेकिनम्॥४२॥

द्या।निषिद्धाचरणादिविषयिणीदुर्बुद्धिर्यस्यतथाभूतमपितथाद्विजंउपनयनादिभिःसंस्कृतम
पियथामत्तंकुर्यात्तद्वत्प्रारब्धस्योपक्रांतफलस्यभोगोविवेकिनमपिअप्रतिबद्धसाक्षात् १८
कारवंतमपिनजहातिकिमुतईषद्ज्ञमादृशमितिलोकरीत्याउक्तिः॥४२॥ततइति।ततःदुःख
भोगपरिहारस्यपरोक्षज्ञानमात्रेणासंभवात्प्रतिबद्धापरोक्षेणचासंभवाद्बहुनाउक्तेनकिं
फलनकिंचिदित्यर्थः॥अतोदुःखापगमेउपायांतरंब्रूहीत्याशयेनदुःखमेवनिगमयति।प्रा

रब्धंशिवोहंकारश्चेति।त्रितयमपिमांअहोरात्रंबाधते॥तथाहि।नकेवलंप्रारब्धंफलति॥
जडत्वात्।फलमतउपपत्तेरित्याद्यधिकरणविरोधाच्च।नापिकेवलःशिवः वैषम्याद्याप
त्तेः।तथाचसूत्रं।वैषम्यनैर्घृण्येनसापेक्षत्वात्तथाहिदर्शयती॥अहंकारस्तुदुःखादिपरि
५ णामोपादानत्वादावश्यकः।ननुसदाशिवःस्मर्यतांसएवदुःखंदूरीकरिष्यतीत्यतआह॥स्मृत
इति॥स्मर्त्तुमारब्धइत्यर्थः॥आदिकर्मणिक्तःकर्त्तरिचेत्यादिकर्मणिकर्मार्थेक्तः तथाचायंभावः।

॥ततःकिंबहुनोक्तेनप्रारब्धंसशिवःस्मृतः।बाधतेमांदिवारात्रमहंकारोपितादृशः॥४३॥

बहुजन्माराधनेसत्येवविवेकादिक्रमेणमोक्षोलब्धुंशक्यते।नत्विदानींस्मरणारंभमात्रेणासं
सारांबुनिधितरणंशक्यं।बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यत इत्युक्तेरिति॥४३॥बाधतेमां
दिवारात्रमित्युक्तं।तत्रनकेवलंबाधामात्रं॥किंतुंजीवनमेवदुर्लभमित्याह॥अत्यंतेति॥अत्यं
तं।अतिशयेनपीडितः।संजातपीडोजीवःजीवोपाधीभूतंमदीयंलिंगंशरीरंस्थूलदेहंविमुंच
तिशीघ्रंत्यक्ष्यति।वर्त्तमानसामीप्येवर्त्तमानवद्वेतिभविष्यत्यपिवर्त्तमानसमीपेलट्प्रत्ययः
तस्माद्धेतोःजीवात्मयेजीवनस्थैर्यार्थंयउपायःसमर्थःक्रियतां।अध्येषणायांकर्मणिलोट्।अ
नेनउपायोपदेशेआलस्यंनविधेयमित्युक्तंभवति।अनेनेदमवधेयंबिंबीभूतस्यासंसारिण

एवमुमार्द्धविग्रहं त्रिलोचनं नीलार्धशरीरं। एवं चतुर्भुजं लक्ष्मीसहायमपि। तदुक्तं भागवते
सत्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते। स्थित्यादयो हरिविरिंचि
हरेति संज्ञाः श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युरिति। अत एव न शिवविष्णोरुत्कर्षाप
कर्षचिंतया मनः खेदनीयं ननु श्रुतिरेवोत्कर्षापकर्षौ ब्रवीति। ते देवा रुद्रमगमन् कोऽन्वा नित्ति
सोऽब्रवीत् अहमेकः प्रथममासं वर्त्तामि च न विष्यामि च॥ जनिते ह जनितो न विष्णोरित्यादौ रुद्रो
त्कर्षस्य विष्णोरपकर्षस्य च प्रतीतेः। तथा। नारायण एवाग्र आसीन्न ब्रह्मा न च शंकरः। इत्यादौ
गुक्तविपरीतप्रतीतेरिति चेन्न॥ न हि निंदान्यायेन [illegible] यस्यापि लीलाविग्रह विशेष प्रशंसाप

॥ अत्यंतपीडितो जीवः स्थूलदेहं विमुंचति॥ तस्माज्जीवाप्तये महदुपायः क्रियतां द्विज॥ ४४॥
॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु द्वितीयोऽध्यायः॥ ॥श्री॥ ॥ ॥

रत्वात्। अन्यथा परस्परविरोधेनोभयोरप्यप्रामाण्यापत्तेः। एवैव हि उदितानुदितहोमनिंदाश्रु
र्गतिः। एतेन शैववैष्णवपुराणस्य वचनान्यपि व्याख्यानि॥ एवं स्थिते रामकृष्णादयोपि त्वि १९
द्वदवतार इत्युपक्रम्यैव पुराणेषु तत्तच्चरित्रकीर्तनात्। मोहाद्विनाटनं तु गुरूपदेशादिमाहात्म्य
लोकान्प्रतिप्रकटयितुं वेदो वा प्रायदर्शनादिति न्यायेनोपक्रम्यप्राबल्यात्। अत एव श्रीलक्ष्म
स्य च गुरुः कुलवासः॥ ईशानकृष्णवपुषोत्पादि ग्रंथैः श्रीनृसिंहाश्रमा अपि दं स्फुटी चक्रुरितिदिं॥
भगवतए बलीलाविग्रहौ॥ देवताद्वयं नया ४

नमवती स्पर्धा॥ देववशादर्थबोधेनातेस्याह। हितमिति। यद्धितं तन्नरोचते। यथा मुमुक्षोः हितं
हितमरतास्य ९

॥ ॥ इति श्रीमद्विश्वाद्वैतसिद्धांतप्रतिष्ठापनैकधुरंधरश्रीकेवलदीवेंद्रकटादिनायकविरचि
तायां श्रीशिवगीताव्याख्यायां द्वितीयोऽध्यायः॥ ॥२॥ ॥ परमपुरुषार्थसाधने उपदिष्टेपि तद्वि
मुखः सन् वैषयिके एवासौ प्रवर्त्तत इति दृष्टान्तकेवलं त्वमेव एवं विधः किं तु लोकस्थितिरीदृग्विका
एवमेवेत्यगस्त्य आह॥ न गृह्णातीति॥ कामक्रोधादिभिः पीडितो रागी पथ्यं हितं वचः गुरूपदेशं न
गृह्णाति। तदर्थबोध्य एव तस्यैव भेषजं न रोचते। आशंकायां सन् वक्तव्य इति सनंतादुप्रत्ययः। अयंभा नः।

॥ अगस्त्य उवाच॥ ॥ न गृह्णाति वचः पथ्यं कामक्रोधादिपीडितः॥ हितं न रोचते तस्य मु
॥ मूर्षोरिव भेषजं॥ १॥ मध्ये समुद्रं यानीता सीता दैत्येन मायिना॥ आयास्यति नरश्रेष्ठ सा
॥ कथं तव सन्निधिं॥ २॥ ॥ ॥ उपदिश्यमानमपि हितं न गृह्णाति इति प्राक्तनानां स्थितिरस्त
तावत् त्वं तु पदिष्टरीत्या तत्त्वमेवानुसंधातुमर्हसीति॥ १॥ किं वा यदि लौकिकपुरुषार्थोप्यमना
यासेन लभ्येत तर्हि साध्येतापि॥ इह तु मोक्षसाधने तु महागायासस्ततोप्यायासः संजात इत्याह।
मध्ये समुद्रमिति। या सीता मायिना मायाविना तं तुच्छं मार्गगेण। व्रीह्यादित्वादिभिः दैत्येन नतु
नतु व्यादिना मध्ये समुद्रं समुद्रस्य मध्ये। अति दूरं अति दुर्गमं च देशं प्रतीति भावः। पारे मध्ये षष्ठ्या वे
त्यव्ययीभावः। एदंतत्वं च निपातनात् नीता बुद्धिपूर्वं प्रापिता। न तु यदृच्छयागता। हे नरश्रेष्ठेति।

त्तिसंबोधनं॥ न त्वं दैत्यो नापि त्वं मायावीति भावः॥ सा सीता तव सन्निधिं समिपं कथमायास्य
तीन कथंचिदित्यर्थः॥२॥ वध्यंत इति॥ यस्य द्वारि सर्वा अपि देवताः मर्कटयूथवत् वध्यंते॥ ॥
किंच॥ यस्य सुरांगनाश्चामरधारिण्यः संति॥ तस्य जयः कथं तव भविष्यतीति वक्ष्यमाणेनान्वयः
॥३॥ ॥ भुंक्त इति॥ यो रावणः शंभुवरेण दर्पितो गर्वितः सन् अखिलां त्रिलोकीं निष्कंटकं निर्बाध
कं यथा भवति तथा भुंक्ते॥ तस्य जयः तत्कर्मको जयस्तव वनवासिनो वासदशापन्नस्य कथं भविष्यति॥

॥ वध्यंते देवताः सर्वा द्वारि मर्कटयूथवत्॥ किंच चामरधारिण्यो यस्य संति सुरांगनाः॥३॥ भुंक्ते
॥ त्रिलोकीमखिलां यः शंभुवरदर्पितः॥ निष्कंटकं तस्य जयः कथं तव भविष्यति॥४॥ कुंभकर्णाद्
॥ यो भ्राता यस्यास्ति सुरसूदनः॥ अन्यो दिव्यास्त्रसंयुक्तश्चिरंजीवी विभीषणः॥४॥ इंद्रजिन्म त्रा
॥ पुत्रो यस्यास्तीशवरोद्धतः॥ तस्याग्रे संगरे देवा बहुवारं पलायिताः॥५॥

अत्र तस्येति कर्मणि षष्ठी। तवेति। न यद्यपि कर्तरि षष्ठी दुर्लभा। उभयप्राप्तौ कर्मणीति नियमात्। तथा
पि कर्तुः शेषत्वविवक्षायां संबंधसामान्ये षष्ठी तात्पर्याच्च कर्तृत्वरूपे विशेषे पर्यवसानं यद्वाऽत्रापि
कर्तृषष्ठ्या तस्य जयो न भविष्यति। तव तु कथं न भविष्यतीति॥४॥ इंद्रजिदिति। ईशस्य वरेणोद्धतः इंद्र २०
जिन्नाम तस्य रावणस्य यः पुत्रोस्ति तस्याग्रे संगरेषु युद्धे देवा बहुवारं पलायिताः॥५॥ किंच कुंभक
र्णात्यादि सुराणां देवानां सूदनो नाशकः कुंभकर्णो नाम भ्राता यस्यास्ति। तथा दिव्यैरस्त्रैः संयुक्तः चि
चि

रंजीवी विशेषेण भीषयतीति विभीषणः। इत्यन्वर्थनामा अन्यः पूर्वोक्तात्कुंभकर्णाद्भिन्नोपि भ्रातास्ति
स कथं जेय इति वक्ष्यमाणेनान्वयः॥६॥ किंच दुर्गमिति॥ यस्य देवदानवैः मिलितैरपि दुर्जयं जेतुम
शक्यं लंकाख्यं दुर्गमस्ति। यस्य चतुरंगबलं हस्त्यश्वरथपदातिरूपाणि चत्वारि अंगानि घटकानि
यस्येति तथाभूतं सैन्यं कोटिसंख्यया उपलक्षितं सद्वर्त्तते कियत्यः कोटय इत्येव गणनीयं न तु श
तसहस्रादिसंख्यया परिच्छेद्यं इत्यर्थः॥७॥ एकाकिनेति। एवं पूर्वोक्तः ससहायः प्रतिपक्षः। एकाकि

॥ दुर्गं यस्यास्ति लंकाख्यं दुर्जयं देववदानवैः। चतुरंगबलं यस्य वर्त्तते कोटिसंख्यया॥७॥ ए
॥ काकिना त्वया जेयः स कथं नृपनंदन॥८॥ आकांक्षते करे धर्तुं बालश्चंद्रमसं यथा॥८॥
॥ तथा त्वं काममोहेन जयं तस्याभिवांछसि॥९॥

नाऽसहायेन। एकाद्याकिनिच्चासहाये इत्याकिनिच्प्रत्ययः। त्वया कथं जेयः हे नृपनंदनेति संबो
धने सौकुमार्यं ध्वनयति॥८॥ आकांक्षत इति। यथा बालश्चंद्रमसं करे धर्तुमाकांक्षते। तथा त्वमपि
काममोहेन तस्य रावणस्य जयं अभिवांछसि। स्वशक्तिं परशक्तिं वा अविचार्यैव तं जेतुमिच्छसि न तु
फलं लभसे। अतस्त्वत्तत्त्वज्ञानायैव मे वचनैरित्याशयः॥९॥ नाहं ज्ञानेऽधिकारी। वैराग्यविरहादि
ति लोकरीतिमनुसरन् श्रीराम आह॥ क्षत्रियोहमिति॥ हे मुनिश्रेष्ठ। क्षत्रियोहं। न तु ब्राह्मणः। ये

नयुद्धादिनीयां स्वमया च तिष्ठेयं। किंच हृता आयन इति व्युत्पत्त्या परस्त्कलाम मोचिता। स कथं स्वक
रक्षमपि नरक्षेयमिति भावः। हृञ् धातोर्भावे क्विपि तदुपपदात् अङ् आतोनुपसर्गे इति कप्रत्यये रक्षते
हृत्वा धइति प्रत्ययः। किंच। मे मम। ननु मदीयस्य कस्यचित् भार्या। ननु हे त्वरामा दिमात्रं। रक्षसा। दु
र्थि दृष्टेनत्वम् हृतेन केनचित् हृता वा आनीता। ननु स्वतः प्रवृत्ता। एवं स्थिते आनृशंस्य धृतं भार्यां हर्तारं तं
दिन निहन्मि न हि मे जीवने किं फलमस्ति तथा च न सीतालाभो मम उद्देश्यः। किंतु दुष्टनिग्रहः स च स्व

॥श्रीराम उवाच॥ क्षत्रियोऽहं मुनिश्रेष्ठ भार्या मे रक्षसा हृता॥ यदि तं न निहन्म्याशु जी
॥वने मेऽस्ति किं फलं॥१०॥ अतस्तेन त्वद्बोधेन न मे किंचित्प्रयोजनं॥ कामक्रोधादयः सर्वे
॥दहंते ते तनुर्मम॥११॥ अहंकारोऽपि मे नित्यं जीवनं हंतुमुद्यतः॥१२॥

धर्मत्वादावश्यकरणेत्याशयः॥१०॥ अत इति। अतः प्रागुक्ताद्धेतोः तेन तत्त्वबोधेन त्वया क्रियमाणेनोपदे
शेन मे वैरनिर्यातनमन्तरेण तत्त्वतो मम न किंचित्प्रयोजनं। अनधिकारित्वात्। तथा हि कामक्रोधादयो ये
सर्वे दुर्गुणास्तैः मम तनुर्दह्यते॥११॥ तथा अहंकारोऽपि क्षत्रियोऽहं शूरस्तेत्यादि गर्वोऽपि मे मम जीवनं॥ २१
नित्यं हन्तुमुद्यतः। तस्मात् ममत्तायं श्रवणावसर इति भावः॥१२॥ ननु विषयदोषदर्शनस्य विर
क्त्युपायत्वात् ईदृशं दुःखमनुभवतस्त्वत् कथं न विरक्तिरुदेतीत्याशंक्याह॥ हृतायामिति॥ यस्य शत्रुणा

श्रोत्र

अवमतस्य। कृतावमाननस्य सतः। निजकान्तायां वा हृतायां सत्यां तत्र प्रतीकारसामर्थ्यविरहाद्दु
द्विग्नस्य तत्त्वबुभुत्सा तत्त्वं बोद्धुमिच्छा विरागादिपूर्विका स्यात् स लोके पुरुषाधमः। नपुंसकप्रायः। अ यं
भावः। अनित्यत्वदुःखबहुलत्वादिज्ञानं विरागहेतुरिति सत्यं। तथापि भार्यापहारादिप्रयुक्ते दुःखे स
ति अत्यभिमानिनां शत्रुसंजिहीर्षैव तावदुदेति। न साम श्याः फलबलेन प्राबल्यकथनात्। यस्य तु पुरु
कारतातादृशस्य काममनेन विरक्तिः संभाव्यते न तु मादृशानामिति॥१३॥ ॥तस्मात् हि हे मुनिशार्दूल

॥हृतायां निजकान्तायां शत्रुणावमतस्य वा॥ यस्य तत्त्वबुभुत्सा स्यात्स लोके पुरुषाधमः॥१३॥
॥तस्मात्तस्य वधोपायं लंघयित्वाम्बुधिं रणे॥ ब्रूहि मे मुनिशार्दूल त्वत्तो नान्योऽस्ति मे गुरुः॥१४॥ श्री अ
॥गस्त्य उवाच॥ एवं चेच्छरणं याहि पार्वतीपतिमव्ययं॥ स चेत्प्रसन्नो जगतां वाञ्छितार्थं प्रदास्यति॥१५॥

न मुनिश्रेष्ठ त्वं तदधिकारमनुसृत्य तदनुरूपमेवोपदेष्टुं समर्थोऽसि इति भावः। अंबुधिं लंघयित्वाऽयो
रणे रावणवधः समुद्रलंघनपूर्वकं युद्धे रावणहननं तदुपायं मे मह्यं ब्रूहि। शापादिनापि त्वं रावणं
भस्मी कुर्याः। न च तावता मदिष्टसिद्धिः। नापि छलादिना वैरिवधो मम उद्देश्य इति सूचयितुं रणे इति
अंबुधिं लंघयित्वेति चोक्तं॥ ननु शत्रुवधोपायस्त्वया अन्यतो बोद्धव्यः। अहं तु तत्त्वसाधनचतुष्टय
संपत्तिकालेऽप्युक्ततत्त्वमुपदेक्ष्यामीत्यत आह॥ त्वत्त इति मे त्वत्तोऽन्यो गुरुर्हितोपदेष्टा नास्त्येवेति

म

तस्मादनन्यशरण्यमद्यं रावणवधोपायो पित्वयैवोपदेष्टव्य इति भावः ॥१४॥ एवं चेदिति। एवं
चेत्। शत्रुवध एवावश्यकर्त्तव्यश्चेत्तर्हि अव्ययं नित्यं पार्वतीपतिं शरणं याहि॥ स भगवान्प्र
सन्नश्चेत्तर्हि वांछितमर्थं प्रकर्षेण दास्यति॥१५॥ देवैरिति। यो रावणः शक्राद्यैर्देवैर्हरिहरिणा
ब्रह्मणापि वा। अजेयः जयार्हो न भवति। पूर्वोक्तशंभुवरबलादिति भावः। अर्हे कृत्यतृजश्चेत्यर्हार्थे यो
यत्। यदि तु शक्ति लिङ् चेति तत्रार्थे क्रिये। ततदा ह्यय्यज्य्यौ शक्यार्थे इति यांतादेशः प्रवर्त्तते तिबो

॥ देवैरजेयः शक्राद्यैर्हरिणा ब्रह्मणापि वा। स तेन वध्यः कथं चास्त्वत्शंकरानुग्रहं विना।
॥१६॥ अतस्त्वां दीक्षयिष्यामि विरजागममाश्रितः। तेन मार्गेण मर्त्यत्वं हित्वा तेजोमयो भ
व॥१७॥ येन हत्वा रणे शत्रुं सर्वान्कामानवाप्स्यसि। भुक्त्वा भूमंडलं चांते शिवसायुज्यमाप्स्यसि॥

थ्यं। स रावणः शंकरानुग्रहं विना तेत्वया वध्यः हंतुं शक्यः कथं चास्त्व। कृत्यानां कर्त्तरि वेति वैकल्पिकी
षष्ठी॥१६॥ अत इति॥ अतः शंकरानुग्रहस्यावश्यकत्वात्। विरजागमं विरजाख्यदीक्षाप्रतिपादकं शा
स्त्रमाश्रितः सन्त्वां दीक्षयितं करिष्यामि॥ दीक्षाशब्दान्मसुवर्णं तत्करोति णिच्॥ णाविष्ठवदिति वा २२
तिदेशात्मतुपरिष्टेश्च लोपः॥ तेन मार्गेणोपायेन त्वं मर्त्यत्वं इतरसाधारणत्वं मुक्त्वा त्यक्त्वा तेजोमयः
शुद्धशरीरवान्भव आशिषि लोट्॥१७॥ येनेति। येन दीक्षामार्गेण रणे शत्रुं हत्वा सर्वान्कामान्काम्यं तदिति
दीक्षयिष्यामि

मष्टम्यां वा विशेषतः॥ एकादश्यां सोमवासरे वार्द्रायां वा समारभेत्॥२२॥ उत्तरगीता

काम। कामना विषयास्तानवाप्स्यसि प्राप्स्यसि। किंच। भूमंडलं भुक्त्वा अंते शिवसायुज्यं परममुक्तिं अ
वाप्स्यसि॥ शुद्धांतःकरणस्याविवेकादिसाधनसौलभ्यादिति भावः॥१८॥ अथ मुनिवाक्यश्रवणानंतरं रामः॥
तं मुनिसत्तमं दंडवत्साष्टांगं प्रणम्य दुःखनिर्मुक्तः सन्प्रहृष्टेन अंतरात्मना उपलक्षितश्च सन्नुव
वाच। मुनिश्रेष्ठेन मदीयमिष्टं सेत्स्यतीति प्रतिज्ञातत्वात्तत्र विलंबो नास्तीत्यमन्यतेति भावः॥१९॥ कृता
र्थ इति मुने अहं कृतार्थो जातः। मम वांछितार्थः आगतः सिद्धः। तथाहि प्रीता बुद्धिः। त्वं यदि मे मह्यं प्रसन्न

॥ सूत उवाच॥ अथ प्रणम्य रामस्तं दंडवन्मुनिसत्तमं। उवाच दुःखनिर्मुक्तः प्रहृष्टेनांतरा
॥त्मना॥१९॥ कृतार्थोहं मुने जातो वांछितार्थो ममागतः। प्रीतं बुद्धिः प्रसन्नस्त्वं यदि मे किमु
॥र्लभं॥२०॥ अतस्त्वं विरजां दीक्षां ब्रूहि मे मुनिसत्तम॥२१॥ अगस्त्य उवाच॥ शुक्लपक्षे चतुर्दश्यां

स्तर्हि दुर्लभं किमु। अन्येषु संतापि समुद्रपानं कुर्वतस्तवानुग्रहे सति समुद्रसेतुबंधनादात्मकं। मदिष्टं
अनायासेनैव सेत्स्यतीत्यर्थः॥२०॥ अत इति॥ हे मुनिसत्तम विरजां दीक्षां अतः ममानुग्राह्यत्वात् मे मह्यं
ब्रूहि॥२१॥ शुक्लपक्ष इति शुक्लपक्षे चतुर्दश्यां अथवा अष्टम्यां अथवा सोमवासरार्द्रनक्षत्राभ्यामुपेतायां
मेकादश्यां समारभेत॥ आरभेत॥ परस्मैपदमार्षं॥२२॥

यमिति। यं देवं इत्थंभावरूपं ध्यात्वा पाशुपतं व्रतं चरेदिति वक्ष्यमाणेनान्वयः। इत्यमिति। कथंभूतं
वामं। श्रेष्ठं पूर्णानंदरूपत्वात् सुंदरं वा संसारार्णवमग्नान् वामयतीति वामः। रुद्रमिति। रुद्रः संसा
रिणः तान् राति अदत्ते पयाः अनुग्रह्णातीति रुद्रः तं। किंवत् रुद्रिधात्वामुपदेशे आतोनुप
सर्गे क इति शाते कप्रत्ययः। परात्परतरमिति। परः जडात् पुत्रत्सु जीवः। तस्मात्परतरं तन्नि
यामकत्वात्। परादिति परः स्वभिन्नः प्रपंचः तं अततीति सातत्येन व्याप्तो स्वधिष्ठानतयेति

॥ यं वा मम माङ्कर्ष रुद्रं शाश्वतं परमेश्वरं॥ परात्परतरं स्वात्मजः परात्परतरं शिवं॥२३॥ ब्र
॥ ह्मणो जनकं विष्णोर्वह्नेर्वायोः सदाशिवं॥ ध्यात्वाग्निनावसथ्याग्निं विशोध्य च पृथ
॥ क्पृथक्॥२४॥ पंचभूतानि संयम्य ध्यात्वा गुणविधिक्रमात्। मात्राः पंच चतस्रश्च त्रिमा

परात्। परे जीवास्तरं त्यनेति परतरः। परा ञ्चासौ परतरश्चेति कर्मधारयः। अतो नरूकं शिवं
॥ मुक्तकरं। तत्करोति एपं तात्पचाद्यच्॥२३॥ ब्रह्मण इति। ब्रह्मणः विष्णोर्वह्नेर्वायोश्च जनकं ब्र
राम ह्म विष्ण्वादिशब्दवाच्यानां सकललीलाविग्रहाणां अधिष्ठानत्वं बिंबचैतन्यमित्यर्थः। अतएव सदाशिवं २३
सर्वदा पूर्णानंदैकनाव्यवस्थितं। एवंविधं ध्यात्वा इति पूर्वोक्तमनेनोक्तपतिबद्धं तत्स्मृतिमका
रमाह। ध्यात्वेत्यादिना पंचभूतानि स्वीयदेहारंभकाणि पृथक्पृथक् विशोध्य वायुजीवेन वायुध्या
नपूर्वकं शोषयित्वा अग्निबीजेन आवसथ्याग्निं ध्यात्वा तेनाग्निना नानितानि संयम्य दग्धा॥२४॥ तत्र

आग्निना

वास्तदाहस्यासंभवान्निष्कर्षार्थं आहुध्यात्वेति। मदीयदेहारंभकभूतानि अग्निना दग्धानी
ति भावना। कृत्वेत्यर्थः। तत्र भावनायां प्रकारमाह। गुणविधीति। गुणाः शब्दादयः तेषां विधिर्बो
धनं तत्क्रमेणेत्यर्थः। तमेव क्रमं स्फुटतरमाह। मात्रा इति। पंचमात्राः रूपरसगंधस्पर्शशब्दतन्मा
त्राः। अत्र मात्रापदेन तत्संबंधिन। पृथिव्यादयो लक्ष्यंते। तथा च पूर्वपूर्वभूतस्योत्तरोत्तरं प्रत्युपादा
नतया तदीयशब्दादीनामप्युत्तरोत्तरमन्वयात् पंचमात्रा इत्यनेन पृथिव्युक्ता भवति। चतस्र इत्य

॥ एकमात्रममात्रं हि द्वादशांतं व्यवस्थितं। स्थितं स्थाप्याऽमृतीभूत्वा व्रतं पाशुप
॥ तं चरेत्॥२६॥ ॥ इत्यनेन जलं। तिमात्रा इति तेजः। द्विरिति वायुः॥२५॥ एकमात्रमिति। ए

कामात्रयस्य तथाभूतमाकाशं। एतच्चोपलक्षणमित्याह। द्वादशांतमिति। द्वादशः एकादशतत्त्वा
नामाधारः परमेश्वरः। अतोलयावधि यस्मिन् कर्मणि यथा यथा भवति तथा व्यवस्थितं सुस्थि
तं व्यवस्थितं। स्थितां स्थाप्यामेध्यात्वेत्यर्थः। एकादश तत्त्वानि तु भागवते कतितत्त्वानि विश्वेश
त्युपक्रम्य नवैकादश पंच त्रीण्यपात्यत्व मिह शुश्रुमेत्युपन्यस्य मायां मदीयामाश्रित्य वदतां किं नु दुर्घटमि ८
त्यं तेन स्वीकृतानि। स्थितां स्थाप्येति तदनंतरममृतबीजेन ध्यानपूर्वकं सर्वतया धारा द्रुतं गणः अ
मृतसेकेन स्वष्टिः क्रमेण देहोत्पत्तिपर्यंतं ध्यात्वेत्यर्थः। अमृतीभूत्वेति परमेश्वरोपासनायोग्यदि
व्यदेहवानहमित्यभिमानं कृत्वेत्यर्थः॥ ॥२६॥ ॥ ॥ ॥ ॥

इदमिति। पाशुपतं पशुपतिदेवताकं इदं व्रतं समासतः संक्षेपेण करिष्यामिति। एवं प्रातस्त्र
प्रातरेव संकल्प्य स्वशाखोक्तविधिना अग्निं निधाय प्रतिष्ठाप्येत्यर्थः॥२७॥ उपोषितः कृतो
पवासः शुचिः बाह्याभ्यंतरशौचवान्। स्नातः शुक्लवस्त्रधारी शुक्लयज्ञोपवीतवान्। शुक्लेमा
ल्यानुलेपने यस्य तथाभूतः सन् जुहुयादित्युत्तरेण संबंधः॥२८॥ जुहुयादिति। ततस्तदनंत
रं एकाग्रः सन् प्राणायामादिभिर्विरजामंत्रैः अनुवाकांतं अनुवाकसमाप्तिपर्यंतं पृथक्पृ

॥इदं व्रतं पाशुपतं करिष्यामि समासतः। प्रातरेवं तु संकल्प्य निधायाग्निं स्वशाखया।
॥२७॥ उपोषितः शुचिः स्नातः शुक्लांबरधरः स्वयं। शुक्लयज्ञोपवीतश्च शुक्लमाल्यानुलेपनः॥२८॥
॥जुहुयाद्विरजामंत्रैः प्राणायामादिभिस्ततः। अनुवाकांतमेकाग्रः समिदाज्यचरून्पृथक्॥२९॥

प्रत्येकं समिदाज्यं चरून् समिधः आज्यं। चरूंश्च जुहुयात्॥२९॥ आत्मनीति। अत्र अग्न इती
ति वक्तव्ये अग्नेति संधिरार्षः। न तायमर्थः। याते अग्ने यज्ञियातनूरित्यादिना मंत्रेण अग्नि
मात्मनि समारोप्य तदनंतरं तस्मा विरजानलजमेव संनिधानात्। आदाय गृहीत्वा। अग्नि
रित्यादिभैर्मंत्रैर्विसृज्य तस्मानुमंत्रणं कृत्वेत्यर्थः। तस्यानुमंत्रणमंत्रस्य पिप्पलाद ऋषि १४
षिः गायत्री छंदः रुद्रो देवता तस्य शुद्ध्यर्थे जपे विनियोगः॥ ॐ अग्निरिति भस्मेत्यादस्य म

न एव एतानि चक्षूंषि तस्मात् नीत्यं तैः अथर्वशिखायां पठितानैर्मंत्रैः तस्मात् अभिमंत्रणं कर्तव्यमि
ति। ततो गानि संस्पृशेत्॥ ललाटादिषु तस्माधारयेदित्यर्थः। धारणं च शिवनाममंत्रेण गाय
त्र्यादिभिर्वा। तथा च पुलस्त्यः अग्निरित्यादिभिर्मंत्रैः शुद्धं तस्माभिमंत्रितं। शिवमंत्रेण वा धार्यं
मंत्रेण ष्टाक्षरेण वा गायत्र्या वापि देवर्षे मंत्रेण प्रणवेन वेति। तेषां फलविशेषं स एवाह। करोति
शिवमंत्रेण यस्त्रिपुंड्रं द्विजोत्तमः। स त्रिशूलधरः सौम्यः शिवलोके महीयते। अष्टाक्षरेण मंत्रेण

॥आत्मन्यग्निं समारोप्य याते अग्नेति मंत्रतः। तस्मादायाग्निरित्याद्यैर्विसृज्यांगानि संस्पृ
शेत्॥३०॥

यः करोति त्रिपुंड्रकं। विष्णोः पदमवाप्नोति नान्यथा श्रुतिनिर्वेदितं। सौरं पदमवाप्नोति गायत्र्या मु
नि सत्तम। प्राप्नोति ब्रह्मणो रूपं प्रणवेन न संशयः। इति। इत्यत्र अपि त्वंगानि संस्पृशेत्। इति सम
न्यत्र उक्तं तथापि धारणे विशेषो ग्रंथांतराद्बोध्यः। तत्र शौनकः ललाटे हृदये कंठे बाह्वोः पृष्ठे तथा ग
ले। त्रिपुंड्रं तु समना कुर्यादिष्टमंत्रेण मानवः इति। स्मृतिरत्नावल्यां। मध्यमानामिकांगुष्ठैरनुलोम
विलोमतः। अतिस्वल्पमनायुष्यमतिदीर्घं तपःक्षयं। नेत्रयुग्मप्रमाणेन त्रिपुंड्रं धारयेद्द्विजः। स्मृति
संग्रहे। धार्यं भस्म त्रिसंध्यं तु गृहीणा जलसंयुतं। सर्वकाले जले स्त्रीणां यतीनां जलवर्जितं॥ म
ध्यांगुलित्रये लोवस्व दक्षिणकरस्य च॥ त्रिपुंड्रं धारयेद्विद्वान्सर्वकल्मषनाशनमिति। एतद्भस्म
वानप्रस्थस्य कन्यानां दीक्षाहीननृणां तथा॥ मध्याह्नात्प्राक्जलैर्युक्तं परतो जलवर्जितं॥ २

स्मधारणं सर्वकर्मांगं। न च ध्यानं न च ज्ञानं न च दानं जपो न सः॥ त्रिपुंड्रं च विना येन विप्रेण यदनु

ष्ठितमिति वचनात्। कात्यायनोपि। श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने। धृत त्रिपुंड्रः पूतात्मा

मृत्युंजयति मानवः। संयोगपृथक्त्वन्यायेन पुरुषार्थमपि तथा च॥ ॥भविष्यपुराणं। सिते

न भस्मना कुर्यात् त्रिसंध्यं च त्रिपुंड्रकं॥ सर्वपापविनिर्मुक्तः शिवेन सह मोदते। सत्यं शौचं जपो हो

मस्तीर्थदेवादिपूजनं। तस्य व्यर्थमिदं सर्वं यस्त्रिपुंड्रं न धारयेदित्यादि॥ एवं स्थिते प्रकृतं व्याख्येयं

॥तस्मात् त्रोद्विजो विद्वान्महापातकसंभवैः॥ पापैर्विमुच्यते नित्यं मुच्यते च न संशयः॥३१॥ विपर्य

॥मग्नेर्यतो भस्मवीर्यवान्भस्मसंयुतः॥३२॥ भस्मस्नानरतो विप्रो भस्मशायी जितेंद्रियः। सर्वपाप

॥विनिर्मुक्तः शिवसायुज्यमाप्नुयात्॥३३॥ एवं कुरु महाभाग शिवनामसहस्रकं। इदं तु संप्रदास्यामि

ग्रंथोक्तं भस्मधारणप्रकरणं द्विरजांगमिति नाम्ना॥ पंचदशाध्याये वक्ष्यमाणं तु प्रकरणपाठभा

वान्पुरुषार्थविस्तरस्तु अन्यतो बोद्धव्यः॥३०॥ मुच्यते चेति। अंतःकरणशुद्धिपूर्वं विनिर्मुक्तं ज्ञानद्वा

रा मुच्यत इत्यर्थः। वीर्यमिति। भस्मवान् भस्मधारी वीर्येण संयुतो भवति। अत्र हेतुवादमाह। अग्ने

वीर्यं यतो भस्मेति। तेन षत्रं क्रियत इति तस्माच्छस्यलक्षकमिदम्॥३३॥ एवं कुर्विति। एवं प्रागुक्तरीत्या

दि भस्मधारणं कुर्वित्यर्थः। इत्थं बुस्वं शिवनामसहस्रं तु स्मत्कृसावधानतया प्रकर्षेण स्नेहातिशयेन दा

तेन सर्वार्थमाप्स्यसि॥३३॥ इत्युक्त्वा प्रददौ तस्मै शिवनामसहस्रकं। वेदसाराभिधं नित्यं शिवप्रत्यक्षकारकं॥३४॥ तु

स्यामि। तेन नामसहस्रेण त्वं सर्वमर्थं प्रयोजनं प्राप्स्यसि॥३३॥ इत्युक्त्वेति॥ इति पूर्वोक्तं तस्मा

तस्मै रामाय वेदसार इत्यभिधा अन्वर्थनामधेयं यस्येति तथा भूतं। नित्यमहं प्रत्यहं शिवप्रत्यक्षकार

कं भगवत्साक्षात्कारजनकं शिवनाम्नां सहस्रकं रहस्यभूतं सहस्रं। अज्ञाते इति कप्रत्ययः प्रददौ॥३४॥

उक्तं चेति। तेनागस्त्येन उक्तं च। किमुक्तं तदेवाह। हे राम त्वं दिवा निशं अहोरात्र इदं जप। तदपि न कस्मिंश्चि

देवाहोरात्रे किंतु सर्वेष्वित्याह नित्यमिति॥३५॥ ततइति। ततः सहस्रनामजपात्प्रसन्नः स

॥ततः प्रसन्नो भगवान्महापाशुपतास्त्रकं॥ तुभ्यं दास्यति तेन त्वं शत्रून्हत्वाप्स्यसि प्रियां॥३६॥

॥तस्यैवास्त्रस्य माहात्म्यात्समुद्रं शोषयिष्यसि। संहारकाले जगतामस्त्रं तत्पार्वतीपतेः॥३७॥ त

॥द्दलाभेदानवानां जयस्तवस्तु दुर्लभः॥ तस्माल्लब्धुं तदेवास्त्रं शरणं याहि शंकरं॥३८॥ ॥इति

॥श्रीपद्मपुराणे शिवगीतासूपनिषत्सु तृतीयोध्यायः॥३॥

तत्प्रसादः भगवान् शिवः परैरज्ञातं सुमहद्दिव्यं पाशुपतास्त्रं तुभ्यं दास्यति। तेन शत्रून् रावणं तत्स

हचरांश्च हत्वा त्वं प्रियां सीतामाप्स्यसि॥३६॥ तस्यैवेति समुद्रमपि तस्यैवास्त्रस्य माहात्म्यात्सामर्थ्या

च्छोषयिष्यति तस्य समुद्रशोषणसामर्थ्यं कैमुतिकन्यायेन समर्थयते॥ संहरति पार्वतीपतेः

शिवस्य जगत्संहारकाले नदेवत्र्यस्येतेक्षिप्यते इत्यस्य संप्रयोगार्थमित्यर्थः॥ असुरेपरे॥ क सु
र्मणिघन्॥ तद्योगात्कर्त्तरिषष्ठी॥ ३५॥ तदिति॥ तस्यास्तस्यात्मेदानवानांजयस्तव दुर्लभः कु
र्तुः शेषत्वेपिविवक्षायांषष्ठी॥ तेननञोकेति निषेधस्याप्रवृत्तिः उपसंहरति तस्मादिति॥ ३६॥ ॥
॥ ॥ इति शिवगीताव्याख्यायांतृतीयोध्यायः॥ ३॥ ॥श्री॥ ॥७॥ ॥ ॥

॥सूत उवाच॥ ॥एवमुक्त्वा मुनिश्रेष्ठे गते तस्मिन्निजाश्रमं॥ अथ रामगिरौ रामः पु
॥ण्ये गोदावरीतटे॥ शिवलिंगं प्रतिष्ठाप्य कृत्वा दीक्षां यथाविधि॥ भूतिभूषितसर्वां
॥गो रुद्राक्षाभरणैर्युतः॥ २॥
॥श्रीरामकृतां तपश्चर्यां तद्दृष्ट्वा जातं सदाशिव
प्रादुर्भावं च वर्णयितुं चतुर्थोध्याय आरभ्यते॥ एवमिति॥ मुनिश्रेष्ठे तस्मिन्नगस्त्ये एवं उक्त्वा
निजाश्रमं गते सति अथ रामः रामगिरौ पुण्ये पवित्रे गोदावर्यास्तटे शिवलिंगं प्रतिष्ठाप्य
यथाविधि पूर्वाध्यायोक्तं विधिमनतिक्रम्य दीक्षां विरजाख्यां कृत्वा स्थित इति पंचमश्लोकस्थे २६
न सहान्वयः॥ कीदृशो रामः भूतिभूषितसर्वांगः रुद्राक्षाण्येवाभरणानि तैर्युतः॥ २॥ ॥

अभिषिच्य जलैः पुण्यैर्गौतमीसिंधुसंभवैः॥ अर्चयित्वा वन्यपुष्पैस्तद्वद्वन्यफलैरपि॥ ३॥ मूलश्लोक

अभिषिच्येति॥ स्वयं प्रतिष्ठापितं शिवलिंगं पुण्यैर्जलैरभिषिंच्य॥ किंविधैर्जलैः गौतमीसिं
धुभवैः गोदावरीनदीप्रभवैः॥ वन्यानि वने जातानि तादृशैः पुष्पैः फलैश्चार्चयित्वा स्थित इति वि
त्यमाणेनान्वयः॥ ३॥ भस्मेति॥ भस्मनाच्छन्नः भस्मन्येव शेते इति भस्मशायी॥ व्याघ्रस्य चर्म तदे
वासनं तस्मिन् स्थितः नक्तंदिवं अहोरात्रं नाम्नां सहस्रं वेदसाराख्यं शिवनामसहस्रं प्रकर्षे
णातिश्रद्धारूपेण जपन्॥ न विद्यते अन्यस्मिन्सदाशिवाद्भिन्ने धीर्यस्य सः अनन्यधीः॥ मास
॥भस्मच्छन्नो भस्मशायी व्याघ्रचर्मासने स्थितः॥ नाम्नां सहस्रं प्रजपन्नक्तंदिवमन
॥न्यधीः॥ ४॥ मासमेकं फलाहारो मासं पर्णाशनः स्थितः॥ मासमेकं जलाहारो मासं
॥च पवनाशयः॥ ५॥ शांतो दांतः प्रसन्नात्मा ध्यायन्नेवं महेश्वरं॥ हृत्पंकजे समासीनं
॥उमादेहार्द्धधारिणं॥ ६॥
॥मिति एकं मासं व्याप्य फलमेवाहारो यस्य तथाभूतः पर्णा
न्येव अशनं इत्यशनं भक्ष्यं यस्य तथाभूतः अत्र सर्वत्र मासमित्यंतसंयोगे द्वितीया॥ ५॥ शांत
इति॥ पुनः किंभूतो रामचंद्रः शांतः अंतरिंद्रियनिग्रहवान्॥ दांतः बहिरिंद्रियनिग्रहवान्॥ हृ
त्पंकजे समासीनं महेश्वरं एवं पूर्वोक्तनियमविशिष्टः सन् ध्यायन्॥ ६॥ ॥७॥ ॥ ॥

त्रिनयनशब्दस्य क्षुभ्नादित्वात् णत्वं नेत्याद्युक्तं घटवृत्तिकादयः॥ नायं क्षुभ्नादिकिं तु पूर्वपदात्
संज्ञायामिति णत्वस्येह णत्वमित्यन्ये॥ विद्युत्सौदामिनी तद्वल्लिंगं गणानां जटानां धरं धारकं
॥अन्यथा कर्मण्यणः प्रसंगात् विद्युच्छब्दे घृतिगमिजुहोतीनामिति त्वक्लिवंतस्याछांदसिकः कि
पासंनियोगशिष्टत्वात्। कोटिसंख्याकाः सूर्याः कोटिसूर्याः॥ तैः सदृशं। कोटिसूर्यप्रतीका
शं। कोटिसूर्यप्रतीकाशं नित्यसमासोयमिति प्रागेवोक्तं॥७॥ नागेति॥ नाग एव यज्ञोपवि

॥चतुर्भुजं त्रिनयनं विद्युल्लिंगजटाधरं। कोटीसूर्यप्रतीकाशं चंद्रकोटीसुशीतलं॥७॥
॥सर्वाभरणसंयुक्तं नागयज्ञोपवीतिनं। व्याघ्रचर्मांबरधरं वरदाभयधारिणं॥८॥ व्याघ्र
॥चर्मोत्तरीयं च सुरासुरनमस्कृतं। पंचवक्त्रं चंद्रमौलिं त्रिशूलडमरूधरं॥९॥ ॥

तं तदस्यास्तीति नागयज्ञोपवीती तं न कर्मधारयान्मत्वर्थीय इति तु प्रायिकं नागैर्यज्ञोपवीति
नमिति वा॥ त्रिशूलं चंडमरुश्च त्रिशूलडमरू तौ धरं धारयंतमित्यर्थः। कर्तृकर्मणोः कृती
ति सूत्रेण कर्मणि षष्ठी न भवति। न तर्हमिति सूत्रेण तदनित्यताज्ञापनात्॥ आर्षत्वाद्वा॥९॥ २७
इदानीं जायतेऽस्ति वर्द्धतेऽपक्षीयते परिणमते नश्यतीत्येवंरूपान् षड्भावविकारान्यास्केनो
क्तान् निषेधति नित्यमिति नित्यं नियतं उत्पत्तिरहितमित्यर्थः। त्यपूनेध्रुव इति त्यप्॥ नियतं

अर्द्धं २

ध्रुवमिति निवृत्तिकृत्तः। शाश्वतमिति॥ जन्मांतरास्तित्वलक्षणद्वितीयविकारशून्यमित्यर्थः॥ शुद्धं निर्ध
र्मकं। वृद्धिशून्यमित्यर्थः॥ ध्रुवं एकरूपं तिपरिणामशून्यमित्यर्थः॥ अपक्षयरहितं। अव्ययं।
दिश्व नाशरहितं। यद्यपि जन्मादित्रिविकारत्रयाणां अंतर्भावोप्याष्यकाराद्विनिरुक्तः इहापिश्र
ग्याणा द्धमित्यनेनैव षण्णां वा निषेधः श्रुतस्तथापि सिद्धस्यागतिरिति गोबलीवर्द्दन्यायेन समा
धेयमिति दिक्॥१०॥ अथेति। अथ मासचतुष्टयापगमनानंतरं महान्नादो जातः। कीदृ

॥नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययं॥ एवं नित्यं प्रतपतो गतं मासचतुष्टयं॥१०॥ अथ
॥जातो महानादः प्रलयांबुधिनिर्घोषणः समुद्रमथनोद्भूतमंदरावनिनद्धनिः॥११॥ रुद्रबा
॥णाग्निसंदीप्तनभशस्त्रिपुरविभ्रमः। तमाकर्ण्याथ संभ्रांतो यावत्पश्येति पुष्करं॥१२॥ ॥

द्रः प्रलयांबुधिनिर्घोषणः। अंबुधिशब्देन तदीयः शब्दो लक्ष्यते। समुद्रेति। समुद्रमथनेनोद्भूतो
यो मंदरावनिस्ततो मंदरपर्वतस्य ध्वनिः तत्सदृश इत्यर्थः। सिंहो माणवक इतिवत्॥११॥ रुद्रेति
। रुद्रस्य बाणाग्निना संदीप्तनभशं संदीप्तनभस्तलं यस्त्रिपुरं तस्यायं महासंरंभ इति भावः। तं क
रोतीति तथा ततो महान्नादो जात इति पूर्वेणान्वयः। नलकरोती एर्णातात्पचाद्यच्॥ तमिति॥ अ
थ महानादोत्पत्त्यनंतरं नादमाकर्ण्य श्रुत्वा संभ्रांतः जातसंवेगः समौ संवेगसंभ्रमावित्य

विक्रम ३

मरः॥ अयादिनाकर्मस्वपाटवंसंवेग इतिक्षीरस्वामी॥ एवंभूतोरामः॥ यावत्पुष्करंगोदावरी
जलंतथैवप्रक्रांतत्वात्॥ पुष्करंसर्वतोमुखमित्यमरः॥ पर्येति॥ एष्यामीत्युपक्रांतवान्क
होरत्रावैश्रोत्रमशक्नुवंतो द्विजस्येमऊतीतिभावः॥ यावत्पुरानिपातयोर्लडितिलविष्यति॥
लट्॥ तावन्मध्यएवरामस्यपुरोमहद्भूतत्तेजश्चमहातेजः आसीत्॥ हेद्विजादितिमुनीन्सूतः
संबोधयति॥ १२॥ तेजसेति॥ तेनतेजसासंभ्रांतः सःशमोदशापिदिशोनापश्यत्॥ कंनुअंधी

॥ तावदेवमहातेजोरामस्यासीत्पुरोद्विजाः॥ तेजसातेनसंभ्रांतोनापश्यत्सदिशोदश॥
॥१३॥ अंधीकृतेक्षणस्तूर्णंमोहंजातोनृपात्मजः॥ विचिंत्यतर्कयामासदैत्यमायांद्विजेश्वरः
॥ अथोत्थायमहावीरःसज्जंकृत्वाधनुःस्वकं॥ अविध्यन्निशितैर्बाणैर्दिव्यास्त्रैरजिमंत्रितैः॥१४॥

कृतेईक्षणेनेत्रेयस्येत्येव॥ ततःसन्तूर्णंशीघ्रंमोहंयातः॥ १४॥ विचिंत्येति॥ दे
द्विजेश्वराः विचिंत्यविचार्यदैत्यमायांतर्कितवान्॥ दैत्यमायाएवेति॥ ऊहितवान्॥ अथमहावीरोरा
मःउत्थायस्वकंआत्मीयंधनुःसज्जंकृत्वादिव्यास्त्रानिमंत्रितायेनिशिताःतीक्ष्णास्तैःबाणैस्तच २८
तेरस्त्रेश्चेत्येवार्थः॥ तथाचानुपदंवक्ष्यति॥ तस्मिंस्तेजसिशस्त्राणिवास्त्राण्यस्यमहीपतेरितिपूर्वोक्तं
तेजोराशिंअविध्यत्॥ ताडितवान्॥ व्यधताडनेदूतिधातोःकर्तरिलङ्॥ १५॥ दिव्यास्त्राण्येवाहदृताभ्यांआ

ग्नेयमिति॥ आग्नेयंअग्निदेवताकं॥ मोह्यतेऽनेनेतिमोहनंमोहनास्त्रं॥ अनिलोवायुर्देवतास्येत्या
निलं॥ कुलिशंचआनलंचेतिसमाहारद्वंद्वः ऐंद्रंवायव्येवेत्यर्थः॥ अयंराघवोबहून्यस्त्राणि
प्रायुंक्तप्रयुक्तवान्॥ १६॥ तस्मिन्निति॥ तस्मिन्आगुक्तेतेजसिअस्यमहीपतेःशास्त्राण्यस्त्राणिच
विलीनानिमहान्तस्यसंबंधिन्यःकरकाःवर्षोपलानीरधाविवेतिदृष्टांतेनअत्यंतमस्त्राणांअ
हीनत्वंदर्शयति॥ १७॥ ततइति॥ तदनंतरंतस्यकरात्च्युतंसत्धनुर्जज्वालतथातूणीरंनिषंगः

॥ आग्नेयंवारुणंसौम्यंमोहनंसौरपार्वतं॥ विष्णुचक्रंमहाचक्रंकालचक्रंचवैष्णवं॥ १५॥
॥ रौद्रंपाशुपतंब्राह्मंकौबेरंकुलिशानिलौ॥ भार्गवादिबहून्यस्त्राण्येवंप्रायुंक्तराघवः॥ १६॥
॥ तस्मिंस्तेजसिशस्त्राणिचास्त्राण्यस्यमहीपतेः॥ विलीनानिमहान्तस्यकरकाइवनीरधौ॥ १७॥
॥ ततःतृणेनजज्वालधनुस्तस्यकराच्युतं॥ तूणीरंचांगुलीत्राणंगोधिकापिमहीपतेः॥ १८॥

जज्वालेत्यनुषज्यतेयद्यपितूणेष्वासंगतूणीरनिषगाइषुधिर्द्वयोःतूण्यांमित्यमरेण
तूणीरशब्दःपुल्लिंगएवोक्तःतिन्नलिंगानांनद्वंद्वइतितेनपरिभाषितत्वात्॥ तथाप्यार्षोलिंगव्य
त्ययोबोध्यः॥ बह्वा॥ तूणीरातिआदत्तेइतितूणीरंतूणीसहितमितियावत्॥ इदशांअंगुलित्राणं
जज्वालेतियोजना॥ तथा॥ गोधिकापिज्याघातवारणार्थंकृतंचर्ममयंतलमपिजज्वाल॥ गोधेतलेमा

घातवारणे इत्यमरः। अत्र हि सव्यसाव्यस्त्रिप्रायेणगोथे इति निर्वचनानिर्दिष्टा इति स्वामी। गुथप
रिवेष्टने॥ अस्मत्करणेष द्विदादिभ्यो उः प्रत्यये येगुणविशिष्टं जिदादिगणपातेनिपातितं।
॥ ॥१८॥ यद्वा रोगरणा वित्यादिसूत्रोक्तरीत्यानि वृत्तप्रेषणाद्धेतु माणि विप्राक्तार्थपर्यवसा
ने साधसिद्धिन त्रीतिवत्करणस्य कर्तृत्वविवक्षायां पचाद्यविबोध्यं। उक्तं च हरिणा निवृत्त
प्रेषणाद्धातोः प्राक्तनेर्थे णिजुच्यते इति। न च भृशादेवाच्प्रत्ययोऽस्त्विति वाच्यं। इगुपधलक्षण

॥ तं दृष्ट्वा लक्ष्मणो जातः पपात नु विमूर्छितः। अथ किंचित्करो रामो जानुभ्यामवनिं
॥ निगतः॥१९॥ मीलिताक्षो जयाविष्टः शंकरं शरणं गतः॥ स्वरेणाप्युच्चरन्नुच्चैः
॥ शंभोर्नामसहस्रकम्॥२०॥

नकेनवाधितत्वात्। नचवासरूपन्यासः सरूपत्वात्। नानुबंधकृतमसारूप्यमिति सिद्धांतादिति
दिक्॥१८॥ तदिति॥ अथधनुरादिज्वलनानंतरं तत्धनुरादीनां ज्वलनं दृष्ट्वा लक्ष्मणो जातो मूर्छि
तश्श्वसन्नु विपपात॥ अथरामो न किंचित्पराक्रमं करोतीत्यकिंचित्करः सन् जानुभ्यामवनिं २९
भूमिं गतः प्राप्तः॥१९॥ मीलितेति॥ मीलिते अक्षीणी येन तथाभूतः जयाविष्टश्वसन् शंकरं शर
णं रक्षितारं गतः प्राप्तः। किं कुर्वन्। शंभोर्नामसहस्रकं वेदसारारव्यं उच्चैः स्वरेण तारस्वरेणापि उच्चरन्
उच्चारयन्नित्यर्थः। अंतर्भावितण्यर्थाच्चरतेः शतृप्रत्ययः॥२०॥ ॥

शिवं चेति॥ किंच। शिवं नमौ दंडवत्साष्टांगं पुनः पुनः प्रणनाम॥२१॥ पुनश्चेति॥ पुनश्च पुनरपि
पूर्ववद्देवशब्द आसीत् कीदृशः शब्दः। दिङ्मंडलं स्वतन् स्वानयत् प्रतिध्वाने दिशः। पूरयन्नि
त्यर्थः। अंतर्भावितण्यर्थाच्छतृप्रत्यय। तथा वसुधा भूमिर्घोरं जयंकरं चचाल पर्वताश्च कंपिताः।
२२॥ अथेति। अथानंतरं क्षणेन उन्मीलिताक्षिः सन् रामः शीतांशुश्चंद्रस्तद्वच्छीतं शीतस्पर्शं ते
जः आसमंतादद्दधत्। अपिबसादरमद्राक्षीदित्यर्थः। धेट्पाने। विभाषाधेट्श्वोरिति चङ्। यावद्या

॥ शिवं च दंडवन्नमौ प्रणनाम पुनः पुनः॥ पुनश्च पूर्ववच्चासीच्छब्दो दिङ्मंडलं स्वनन्॥२१॥
॥ चचाल वसुधा घोरं पर्वताश्च चकंपिरे॥२२॥ अथ क्षणेन शीतांशुशीतलं तेज आदधत्॥ उ
॥ न्मीलिताक्षो रामस्तु यावद्यावत्प्रपश्यति॥२३॥ तावद्ददर्श वृषभं सर्वालंकारसंतम्॥२३॥ ॥
८

वत्तु प्रपश्यति प्रकर्षेण अवलोकयति तावद्वृषभं ददर्श॥ प्रथमं तेजः पुंजमात्रं दृष्टं ततो वृष
भत्वेनाज्ञासीदित्यर्थः॥ वृषभं विशिनष्टि सर्वालंकारेत्यादि पूरयंतं दिशो दशेत्यंतेन॥२३॥

तत्रैवचेति।तत्रैवरघुपत्नेसुखेनासीनांजगन्मातरंमंबिकारंरघुनंदनोददर्शेतिवक्ष्यमाणेनान्वयः
अंबिकायाएवविशेषणमाहपूर्वचंद्रनिभाननामित्यादीनि॥पीयूषेति।पीयूषस्यामृतस्यमथनेनो
द्भूतंयन्नवनीतं।दधिमथनप्रभवप्रसिद्धनवनीतापेक्षयाकारणप्रकर्षादत्यंतरमणीयमितिभावः।
तस्ययःपिंडस्तद्वद्धवलितं।प्रोतंस्फटिकाग्रखचितंस्वर्णंसुवर्णंयस्यतांमरकतनग्नश्रृंगद्वयेनांचितंपूजि

॥पीयूषमथनोद्भूतनवनीतस्यपिंडवत्।प्रोतस्वर्णमरकतच्छायाश्रृंगद्वयांचितं॥२५॥नील
॥रत्नेद्भुतांद्भस्वकंठकंबलभूषितं॥रत्नपल्याणसंयुक्तंनिबद्धंश्वेतचामरैः॥२६॥घंटिका
॥घर्घरीशब्दैःपूरयंतंदिशोदश॥तत्रासीनंमहादेवंशुद्धस्फुटिकविग्रहम्॥२७॥ ॥

तंरमणीयमित्यर्थः॥२५॥नीलेति॥नीलरत्नइंद्रनीलमणिः॥तद्वदीप्तिर्यस्यतं।ह्रस्वेनकंठकंब
लेनसास्नयालंकृतं।रत्नमयेनपल्याणेनसंयुक्तं।श्वेतचामरैर्निबद्धं।संबंध॥२६॥घंटिकेति।घं
टिकाक्षुद्रघंटाःघर्घराःभूषणविशेषाःतैर्विविधैर्येजनिताःशब्दाःतैर्दशदिशःपूरयंतंतत्रेति ३०
॥तत्रतस्मिन्पूर्वोक्तेवृषभेआसीनंमहादेवंददर्शरघुनंदनइतिवक्ष्यमाणेनान्वयः॥महादेवस्यवि
शेषणानिशुद्धस्फुटिकेत्यादीनि॥२७॥ ॥श्री॥ ॥ॐ॥ ॥ ॥
आस्तारेण ४

तत्रैवचेति।तत्रैववृषभेसुखेनासीनांजगन्मातरंमंबिकांरघुनंदनोददर्शेतिवक्ष्यमाणेनान्वयः॥
नानाविधेति॥नानाविधानियान्यायुधानितैरुद्भासितुंशीलंयेषांतेनानाविधायुधोद्भासिनः।तथाभू
ताःदशबाहवोयस्यतंतथाभूतं।ननुउद्भासिनीतिणिनिप्रत्ययोनुपपन्नः।सुप्यजातौणिनिस्ताच्छील्ये
इत्यादिनिनिरत्यर्थेतिकाशिकादौसिद्धांतितत्वादितिचेत्।नउपसर्गस्योपपदत्वमाश्रित्यप्राप्नो
तिणिनिर्नजवतीतितदर्थात्अन्यथाब्राह्मणानामंत्रयितेतिनकुद्राह्णस्यअजातिप्रत्युदाहर

॥कोटिसूर्यप्रतीकाशांकोटिशीतांशुशीतलां॥व्याघ्रचर्मांबरधरंनागयज्ञोपवीति
॥नं॥२९॥सर्वालंकारसंयुक्तंविद्युत्पिंगजटाधरं॥नीलकंठंव्याघ्रचर्मोत्तरीयंचंद्रशे
॥खरं॥३०॥नानाविधायुधोद्भासिदशबाहुंत्रिलोचनं।युवानंपुरुषश्रेष्ठंसच्चिदानंद
विग्रहम्॥३१॥ ॥

णस्यासंगतिप्रसंगादितिप्राचः॥वस्तुतस्तुउपसर्गादतिधातावितिसूत्रेकैयटेनसुप्यजाताव
तिसुवग्रहणं॥प्रादिषुप्रवर्त्यर्थं॥तेनप्रादावपिणिनिर्भवत्येवेत्युक्त्वाहस्त्यांत्यानचाशंकान
वोत्तरमितिदिक्॥३१॥ ॥ ॥

तत्रैव चेति। तत्रैव रत्नमंडपे सुखेनासीनां जगन्मातरं अंबिकां रघुनंदनो ददर्शेति वक्ष्यमाणेनान्वयः। अंबिकायाः एव विशेषणानि पूर्णचंद्रनिभाननामित्यादीनि। नीलानां इंदीवराणां य द्दाम माला तद्वदाभांति सदृशीं उद्यंती आविर्भवंती मरकतस्येव प्रभा यस्यां तां॥३१॥ मुक्तेति। मुक्ता एवा भरणानि तैः संयुक्तां। अत एव ताराभिर्नक्षत्रैरंचितां व्याप्तां रात्रिमिव स्थितां। विंध्यक्षितिधरवदुत्तुंग

॥तत्रैव च सुखासीनां पूर्णचंद्रनिभाननाम्॥ नीलेंदीवरदामाभामुद्यन्मरकतप्र
॥भां॥३१॥ मुक्ताभरणसंयुक्तां रात्रिं ताराचितामिव। विंध्यक्षितिधरोत्तुंगकुचभा
॥रालसां॥३२॥ सदसत्संशयाविष्टमध्यदेशांतरां वराम्॥

योरुन्नतयोः कुचयोर्यो भारः तस्य यो भारः अतिशयः तेनालसां। अथातिशयो भर इत्यमरः॥ ३१
॥३२॥ सदसदिति। सदसत्संशये अस्ति न वेत्येवं रूपे संदेहे आविष्टं विषयत्वं गतं मध्यदेशांतरं म
ध्यदेशावकाशो यस्यास्तां। अंतरमवकाशावधीत्याद्यमरः। वरां सर्वोत्कृष्टां॥३३॥ ॥

दिव्येति॥ दिव्यानां माल्यानां अंबराणां च धरां धारयित्रीं। तांबूलस्य ग्रासेन चर्वणेन शोभितानि यस्याः
अदने यस्याः॥३४॥ शिवेति॥ शिवस्य आलिंगनेन संजातैः पुलकैः रोमांचैः उल्लासितः उल्लसितः विग्रहो यस्यास्तथा
न्नतो विग्रहो यस्यास्तां। सौंदर्येति। सौंदर्यसारस्य संदोहो मेलनं यस्यां तां तेन बहुव्रीहेर्विशेष्यनिघ्
त्वात् स्त्रीत्वं सौंदर्यसारस्य संदोह इति षष्ठीतत्पुरुषे तु परवल्लिंगतया पुंस्त्वं स्यात्॥३६॥ स्वस्वेति। र

॥दिव्यमाल्यांबरधरां नीलेंदीवरलोचनां। अलकोद्भासिवदनां तांबूलग्रासशोभि
॥तां॥३५॥ शिवालिंगनसंजातपुलकोद्भासिविग्रहां॥ सच्चिदानंदरूपाद्यां जगन्मा
॥तरमंबिकां॥३६॥ सौंदर्यसारसंदोहां ददर्श रघुनंदनः। स्वस्ववाहनसंबद्धान्नाना ॥
॥युधलसत्कराम्॥३७॥ बृहद्रथंतरादीनि सामानि परिगायतः॥३७॥

रघुनंदनः दिक्पालांश्च ददर्श इत्यन्वयः। कीदृशान् दिक्पालान्। स्वस्ववाहनैरैरावतादिभिः संब
द्धान्॥ नानायुधैर्वज्रादिभिर्लसंतः शोभमानाः कराः येषां तान्। बृहद्रथंसाम। त्वामिद्धि हवामह इत्यस्यां

र. लिगीतं

रथारथंतरं साम अजित्वाश्वरनोनुम इत्यस्यामुत्पन्नंगीतं। बृहच्च रथंतरं च बृहद्रथंतरे आदीये
षां तानि। आदिशब्दाद्राजनरौहिणपुरुषगत्यादीनां संग्रहः तानि सामानि परिगायः कुर्वतः
इत्यर्थः गीतिषु सामाख्येति सिद्धांतात्॥३७॥ स्वस्वेति। स्वस्वकांताभिः स्वाभिः पत्नीभिः समायु
क्तान् परितः शिवयोः समंतात् स्थितान्॥३८॥ अग्रगमिति॥ अग्रगं जनार्दनं ददर्शेत्यन्वयः॥

॥स्वस्वकांतासमायुक्तान् दिक्पालान् परितः स्थितान्॥ अग्रगं गरुडारूढं शंखचक्रग
॥दाधरं॥३८॥ कालांबुजप्रतीकाशं विद्युत्कांत्या श्रिया युतं॥ जपंतमेकमनसा रुद्राध्या
॥यं जनार्दनं॥३९॥ पश्चाच्चतुर्मुखं देवं ब्रह्माणं हंसवाहनं॥ चतुर्वक्त्रैश्चतुर्वेदरौद्रसूक्तैर्महेश्वरं।
॥स्तुवंतं भारतीयुक्तं दीर्घकूर्चं जटाधरम्॥४०॥
कालांबुजं नीलोत्पलं तत्सदृशं नीलासितश्यामकालश्यामलमेचकाः इत्यमरः॥ तेन सदृशं। नि
त्यसमासोयमित्युक्तं प्राक्॥३९॥ ॥पश्चादिति। पश्चाद्ब्रह्माणं ददर्शेत्यन्वयः चतुर्भिर्मुखैर्वेद
चतुष्टयस्य रुद्रसूक्तैर्महेश्वरं स्तुवंतं भारतीयुतं सरस्वत्या सहितं। दीर्घः कूर्चः भ्रूमध्यं यस्य ३२
तं दीर्घकूर्चं। कूर्चमस्त्री भ्रुवोर्मध्यमित्यमरः दीर्घश्मश्रुमिति वा। कूर्चो विकत्थनं मध्ये भ्रु
वोः श्मश्रुणि केरवे इति विश्वः॥४०॥ अथर्वेति। मुनीनां मंडलं। गंगादितटिनीयुक्तं मंडले

तर
अथर्वेति। मुनीनां मंडलः संघः तं ददर्शेति संबंधः मंडलशब्दस्य त्रिलिंगत्वेप्यत्र पुल्लिं
गस्यैव निर्देशः कथंभूतं मंडलं। अथर्वशिरसा। अथर्ववेदे प्रसिद्धेन देवा ह वै स्वर्गं लोक
मगमन्नित्यादितानुपनिषद्विशेषेण देवं सदाशिवं स्तुवंतं॥ अंबुधिं च ददर्श कीदृशं। गंगा
दिभिस्तटिनीभिर्नदीभिर्युक्तं। नीलविग्रहं शरीरविशेषधारिणमित्यर्थः॥४१॥ श्वेतेति। श्वेता

॥अथर्वशिरसा देवं स्तुवंतं मुनिमंडलं॥ गंगादितटिनीयुक्तमंबुधिं नीलविग्रहं॥४१॥
॥श्वेतेति॥ श्वेताश्वतरमंत्रेण स्तुवंतं गिरिजापतिं॥ अनंतादिमहानागान् कैलासगिरिसं
॥स्थितान्॥४२॥ कैवल्योपनिषत्पाठान् मणिरत्नविभूषितान्॥ सुवर्णवेत्रहस्तास्थं नं
॥दिनं पुरतः स्थितं॥४३॥
॥श्वेताश्वतरोपनिषद्रूपेण मंत्रेण गिरिजापतिं स्तुवंतं नमि
त्यंबुधेर्विशेषणं। अनंत आदिर्येषां तान् महानागान् महतः सर्पान् ददर्श॥४२॥ कैवल्योपनिष
त्पठंतीति कैवल्योपनिषत्पाठाः तान्। सुवर्णेति। सुवर्णप्रचुरो वेत्रः सुवर्णवेत्रः। तत्सहितेन
हस्तेन पुरतः स्थितं नंदिनं च ददर्शेत्यन्वयः॥४३॥ ॥श्री॥ ॥

दक्षिण इति। दक्षिणे भागे गणेशं ददर्श कीदृशं मूषिकं आरूढो मूषिकारूढः तं मूषिकशब्द इकारमध्यो न तु आकारमध्य इति धातुवृत्त्यादिषु स्फुटः मयूर एव वाहनं मयूरवाहनं तदारूढं षण्मुखं उत्तरे ददर्शेति संबंधः॥४४॥ ॥४५॥ नटतीति नटन् तथाभूतश्चासौ भृंगिरिटिर्गणविशेषश्च तं ददर्श॥ नानाविकाराणि वदनानि येषां तान् प्रमथाधिपान् ददर्श॥

॥दक्षिणे मूषिकारूढं गणेशं पर्वतोपमं। मयूरवाहनारूढमुत्तरे षण्मुखं तथा॥४४॥ म
॥हाकालं च चंडेशं पार्श्वयोर्भीषणाकृतिं। कालाग्निरुद्रं दूरस्थं ज्वलद्दावाग्निसन्निभं।
॥४५॥ त्रिपादं कुटिलाकारं नटद्भृंगिरिटिं पुनः। नानाविकारवदनान्कोटिशः प्रमथाधि
॥पान्॥४६॥ नानावाहनसंयुक्तं परितो मातृमंडलं। पंचाक्षरीजपासक्तान्सिद्धविद्या
॥धरादिकान्॥४७॥ दिव्यरुद्रकगीतानि गायत्किंनरवृंदकं। तत्र त्रैयंबकं मंत्रं जपद्द्विजकदंबकं॥४८॥

॥४६॥४७॥ दिविजवानि दिव्यानि रुद्रालिकायं तेउच्चार्यंते। इति रुद्रकाणि। रुद्रप्रीत्यर्थं जपार्हाणीत्यर्थः। एवं भूतानि गीतानि गायती गायन् किंनरवृंदकं ददर्श। कैशादे अस्मात् घञर्थे कविधानमिति कप्रत्ययः। त्रीण्यंबकानि लोचनानि यस्यासौ त्र्यंबकः। तस्यैमं त्रैयंबकं मंत्रं जपन् द्विज ३३
॥कदंबकं ब्राह्मणवृंदं च ददर्श॥४८॥

नाट्यनृत्येति। अप्सरोगणान् ददर्श। नृत्यतः नृत्यं कुर्वतः तथा नाट्यं च नृत्यं च तयोः समाहारो नाट्यनृत्यं तेनोपलक्षितान् केचिन्नृत्यं कुर्वंति अपरे तु नृत्यं अन्ये तु नाट्यं कुर्वंतीत्यर्थः। कः पुनरेषां भेद इति चेत्। शृणु वाक्यार्थाभिनयो नाट्यं। पदार्थाभिनयो नृत्यं यत्तु सर्वाभिनयवर्जितं गात्रविक्षेपमात्रं शास्त्रोक्तांगभंगरूपं तन्नृत्तं स्पष्टं चैतद्दशरूपवृत्ति

॥गायंतं वीणया गीतं नृत्यं तं नारदं दिवि। नृत्यतो नाट्यनृत्तेन रंभादीनप्सरोगणान्।
॥४९॥ गायच्चित्ररथादीनां गंधर्वाणां कदंबकं॥ कंबलाश्वतरौ शंखकर्णकुंडलतां गतौ॥
॥५०॥ गायंतौ पन्नगौ गीतं कपालं कंबलं तथा। एवं देवसमाजं स दृष्ट्वा कृतार्थो रघुनंदनः॥
॥५१॥ हर्षगद्गदया वाचा स्तुवन्देवं महेश्वरं। दिव्यनामसहस्रेण प्रणनाम पुनः पुनः॥
॥५२॥ ॥इति श्रीपद्मपुराणे शिवगीतासु० चतुर्थोध्यायः॥ ॥४॥

क्षीरस्वामिनाह। नृत्तं विवाहास्फदयिकादिविषयमंगविक्षेपमात्रं नाट्यं तु सर्वरसंपंच संधिचतुर्वृत्तिदशरूपकाश्रयं नटकर्मेति विस्तरोन्यत्र॥४९॥५०॥ गायंताविति। कपालं कं बलं च तन्नामधेयौ पन्नगौ ददर्श॥५१॥ चतुर्थोध्यायः॥४॥ ॥ ॥

अथेति। अथ रामकृतमहेश्वरप्रणामानंतरं तत्र तस्यां देवसभायां हिरण्यप्रचुरः
हिरण्मयः दंडिनायनादिसूत्रेण निपातनात्साधुः हिरण्मयश्चासौ रथश्चासौ रथश्च स
प्रादुरभूत् किं दृशो रथः। अनेकरत्नदिव्यरत्नानां अंशुभिः किरणैः किर्मिरितं चित्रवर्णीकृतं
दिगंतरं येन तथा दिव्युसभायां हिरण्यप्रचुरे तत्र चित्रकिर्मीरकल्माषशबलैताश्चकर्बुरेइ

॥सूत उवाच॥ अथ प्रादुरभूत्तत्र हिरण्मयरथोत्तमः॥ अनेकदिव्यरत्नांशुकिर्मि
॥रीतदिगंतरः॥१॥ नभ्योपांतिकपंकाभमहाचक्रचतुष्टयः॥ मुक्तातोरणसंयुक्तः श्वेत
॥छत्रशतावृतः॥२॥

त्यमरः॥ तत्करणोनिर्णयं तात्कर्मनिकः॥१॥ नभ्येति नवितंस्तोत्रं योग्यं नभ्यं नभ्येन रूत्वेर्देगण
नुपांते प्रांते नवेन औपांतिकेन कर्दमेन आश्लिष्टं महातां चक्राणां चतुष्टयं यस्मिन्स तथो
क्तः चक्रप्रांतस्थः पंक्त्यौपिकस्त्वर्यादितोप्यतिसुरजितया परमेश्वरसंनिधानेन विशेषवत्त ३४
या चक्रतियोग्य एवेत्यर्थः॥ एतत्कृतो। अर्हेत्त नेत्स्यर्हार्थे अवोयत्॥ मुक्तामयेन तोरणे
न बर्हिर्द्वारेण संयुक्तः॥२॥

शुद्धेत्यादि। शुद्धं यद्धेम सुवर्णं तस्य खुराः खुराः शुद्धहेमखुराः। तैराढ्यो युक्तस्तुरंगगणस्तैः संयु
क्तः अत्राढ्यशब्दस्य संबंधिशब्दत्वेन सापेक्षत्वेपि समासः उक्तं हि वाक्यप्रदीपे संबंधिशब्दसा
पेक्षो नित्यं सर्वः समस्यते वाक्यवत्सा व्यपेक्षा समासेपि न हीयते इति मुक्तेति मुक्तावित
नं मौक्तिकनिर्मितोल्लोचः अस्त्री वितानमुल्लोचे इत्यमरः। तेन विलसन् तत्र च विलसन् शो
भमान ऊर्ध्व ऊर्ध्वभागे स्थितो दिव्यवृषो यस्मिन् एवंभूतो ध्वजो यत्र रथे स तथोक्तः॥३॥ मत्ते

॥शुद्धहेमखुरैराढ्यतुरंगगणसंयुतः॥ मुक्तावितानविलसदूर्ध्वदिव्यवृषध्वजः॥
॥३॥ मत्तवारणिकायुक्तः पंचतल्पोपशोभितः॥ पारिजाततरूद्भूतपुष्पमालाभि
॥रंजितः॥४॥

त्तिमत्ता निर्वाणिकाभिर्हस्तिनीभिर्युक्तः नवैकादशपंचत्रीण्याप्रत्यमिति भागवतोक्तैः
पंचतल्पैः तदधिष्ठात्रीभिर्देवताभिरुपशोभितः पारिजाततरूद्भूतानां पुष्पाणां मालया
अभिरंजितो भूषितः एवंभूतः॥४॥ ३९

मृगस्यनाभौसमुद्भूतोयःकस्तूरीरूपोमदःतेनमृगमदरूपायाकस्तूर्येतियावत्।पंकिलःसंजातपंकःमस्यादिप्रत्ययकस्मर्यपेहृयाउत्कर्षविशेषंसूचयितुंमृगनाभितिविशेषणोपादानंसंवर्त्तेति।५।प्रलयकालीनामेघनास्तद्वन्महाघोषाढ्यःवीणादिस्वनासक्तेनकिं

म

॥मृगनाभिसमुद्भूतकस्तूरीमृदपंकिलः।कर्पूरागरुकधूपोत्तुंगधात्तष्टमधुव्रतः॥५॥संवर्त्तघनघोषाढ्योनानावाद्यसमन्वितः।वीणावेणुस्वनासक्तकिंनरीगणसंकुलः॥६॥एवंदृष्ट्वारथंश्रेष्ठंवृषादुत्तीर्यशंकरः।अंबयासहितस्तत्रपट्टतल्पेविशत्तदा॥७॥सुरनीरजनेत्राणांश्वेतचामरचालनैः॥दिव्यव्यजनपातैश्चप्रहृष्टोनीललोहितः॥८॥

रीगणेनसंकुलः।६।एवमितितत्ररथेपट्टतल्पेपट्टमयेआस्तरणेशंकरोआविशत्।उपविशत्।७।सुरेनीलःकंठेलोहितःकेशेषुअतोनीललोहितइतिवेदभाष्यकारादयः॥८॥

कणदितिकणतांकंकणानांनिध्वानैःप्रतिशब्दैःतथामंजुमनोहरैःमंजीराणांनूपुराणांशिंजितैःशब्दैःपादांगदंतुलाकोटिर्मंजीरोनुपुरोस्त्रियामित्यमरः।भूषणानांशिंजितमितिच।अयंचलाक्ष्यादिर्नवुदंत्यादिःयोधेवाशिक्तिंवितनेत्यादिदर्शनात्।अतएवशकंधादीनांप्रकरणेवोपदेवपंडितैःशिंजिधातुःपठितइतिकृ॥९॥शुकेति।शुकवाक्यरूपायेकलारावाअव्यक्तमधुरशब्दास्तैःजगत्त्रयंपूर्णमासेतिप्राक्तनेनान्वयः।ध्वनौतु

॥क्वणत्कंकणनिध्वानैर्मंजुमंजिरशिंजितैः।वीणावेणुस्वनैर्गीतैःपूर्णमासज्जगत्त्रयं॥९॥शुकवाक्यकलारावैःश्वेतपारावतस्वनैः॥उन्निद्रभूषाफणिनांदर्शनादेवबर्हिणः॥१०॥ननृतुर्दर्शयंतःस्वान्चंद्रकान्कोटिसंख्यया॥१०॥ ॥

मधुरास्फुटेकलइत्यमरः।उन्निद्रेति।उन्निद्राणांहर्षादुल्लसतांभूषाफणिनांदर्शनादेवहेतोःबर्हिणोमयूराःकोटिसंख्ययाउपलक्षितान्स्वान्आत्मीयान्चंद्रइवचंद्रःलक्ष्मीकास्तान्चंद्राकारान्मेचकापरपर्यायान्मंडलविशेषान्इवेप्रतिलक्ष्यावितिकृत्समौचंद्रकमेचकावित्यमरः।दर्शयंतःसंतोननृतुः॥१०॥११॥ ॥ ॥

११॥ कमंडल्विति। कमंडलुः कुंडिका अस्त्री कमंडलुः कुंडीत्यमरः। तस्य तस्मिन्वा स्थितैर्जलैः स्वयमाचम्य रामं च आचम्य आचमनं कारयित्वा नकस्यमिच मामिति ल निषेधान्नह्व स्वः स्वस्यांके उत्संगे उत्संगचिह्नयोरंक इत्यमरः। उपानयत् उपनीतवान्॥१२॥ अथेति अथ स्वांके उपवेशनानंतरं तस्मै रामाय दिव्यं धनुः॥ तथा अक्षय्यं तूणीरं निषंगं महापा

॥प्रणम्य तं ततो राममुत्थाप्य वृषभध्वजः॥ आनिनाय रथं दिव्यं प्रहृष्टेनांतरात्म
॥ना॥११॥ कमंडलुजलैः स्वच्छैः स्वयमाचम्य यत्नतः॥ समाचम्याथ पुरतः स्वांके रा
॥ममुपानयत्॥१२॥ अथ दिव्यं धनुस्तस्मै ददौ तूणीरमक्षयं॥ महापाशुपतं नाम
॥दिव्यमस्त्रं ददौ ततः॥१३॥ उक्तश्च तेन रामोपि सादरं चंद्रमौलिना॥ जगन्नाशक
॥रं रौद्रमुग्रमस्त्रमिदं नृप॥१४॥ अतो नेदं प्रयोक्तव्यं सामान्यसमरादिके॥१४॥

शुपतास्त्रं च ददौ॥१३॥१४॥ किमुक्तं तदेव दर्शयति। जगदिति॥ रौद्रं रौद्रदेवताकं अतएवोग्रं भीषणं सामान्यैः साधारणैः अनतिप्रबलैः सह समरः सामान्यसमरः आदिशब्दात् प्रबलैरपि सह अन्यः कलहः तत्रेदं न प्रयोक्तव्यं॥१५॥ ३६

नाश
अन्यदिति। एतस्य पाशुपतास्त्रस्य प्रतिहन्यते अनेनेति प्रतिघातं कुंठीसाधनं उपसर्गस्य घञीति दीर्घः॥ अन्यत् पाशुपतास्त्रभिन्नं नास्ति। तस्मात् प्राणात्यये तवोपस्थिते संज्ञावित्सति एतत् प्रयोक्तव्यं विपक्षे बाधकमाह। अन्यदेति। चस्त्वर्थे। अन्यदा बलवत्तत् बाधकोपस्थिति कालभिन्नकाले प्रयुक्तं तु एतत् पाशुपतास्त्रं जगत्संक्षयं करोतीति तथाभूतं भवेत्॥१६॥

॥अन्यन्नास्ति प्रतिघातमेतस्य भुवनत्रये॥ तस्मात् प्राणात्यये राम प्रयोक्तव्यमुप
॥स्थिते॥१५॥ अन्यदैतत्प्रयुक्तं च जगत्संक्षयकृद्भवेत्॥१६॥ अथाहूय सुरश्रे
॥ष्ठान् लोकपालान् महेश्वरः॥ उवाच परमप्रीतः स्वं स्वमस्त्रं प्रयच्छत॥१७॥ ॥
॥राघवोयं च तैरस्त्रै रावणं निहनिष्यति॥

अथेति महानीश्वरो महेश्वरः निरवधिकैश्वर्यशाली अत एव सुरश्रेष्ठानाहूयोवाच किमुवाच तदेवाह स्वं स्वं इति हे देवाः यूयं आत्मीयं आत्मीयं अस्त्रं प्रयच्छत ददध्वं रामायेति शेषः॥१७॥ एतेन वदीयमेवमहदिष्टं सेत्स्यतीत्याह॥ राघव इति तैर्भवद्भिर्दत्तैरस्त्रैः सन् अयं राघव एव रावणं निहनिष्यति नेनु तन्नु तद्धेतोरेवास्त्विति न्यायाद्द्वयमेव सत्या

क्रेत्संहनिष्यामइतिचेत्तत्राह॥तस्माइति॥तस्मैरावणायदेवैरवध्यस्त्वमित्येवंरू
पोवरोमयादत्तः नत्वन्येनअतोन्नवद्भिर्नासोहंरावस्तइत्यर्थः॥१८॥ननुरावणेनसह
योद्धव्यमितिवयमप्याकांक्षामहेतत्कथमस्मादिष्टंसिध्येत्तत्राह॥तस्मादितिनवंतो

॥तस्मैदेवैरवध्यत्वमितिदत्तोवरोमया॥१८॥तस्माद्वानरतामेत्यन्नवंतोयुद्धदु
॥र्मदा॥साहाय्यमस्यकुर्वंतुतेनस्वस्थान्नविष्यथ॥१९॥तदाज्ञांशिरसागृह्य
॥सुराःप्रांजलयस्तथा॥प्रणम्यचरणौशंभोःस्वंस्वमस्त्रंददुर्मुदा॥२०॥ना
॥रायणास्त्रंदैत्यारिरैंद्रमस्त्रंपुरंदरः॥ब्रह्मापिब्रह्मदंडास्त्रमाग्नेयास्त्रंधनंजयः॥२१॥

पियुद्धदुर्मदाःयुद्धेसोत्कंठाश्चेत्तर्हिवानरतामेत्यअस्यरामस्यसाहाय्यंकुर्वंतुरा[illegible]
धेणतस्यैवमयादत्ताधिकारित्वादितिनावः॥१९॥गृह्येतिगृहीत्वेत्यर्थः॥वांदसोल्यपू॥आङ्प्र
श्लेषोवा॥२०॥धनंजयअग्निः॥वीतिहोत्रोधनंजयेत्यमरः॥२१॥ ३७

प्रन्नंजनोवायुः॥२२॥ईशानःलोकपालविशेषःपावकमितिइदंचोत्तरेणविश्वेदेवादद्वुरि
त्यनेनसंबध्यते॥२४॥अथेतिपूर्वोक्तदिव्यास्त्रलाभानंतरंव्यजिज्ञपत्विज्ञापितवान्॥नु
दू॥२५॥विज्ञापनाप्रकारमाह॥नगवन्नितित्रिभिःमानुषेणैवेतिएवकारस्त्वंसर्वैरपि

था
॥याम्यंयमोपिमोहास्त्रंरक्षोराजस्त्वदाद्दौ॥वरुणोवारुणंप्रादात्वायव्यास्त्रंप्रन्नंजनः
॥[illegible]॥२३॥कौबेरंचकुबेरोपिरौद्रमीशानएवच॥सौरमस्त्रंददौसूर्यःसौम्यंसोमोप्यपा
॥वकं॥२४॥विश्वेदेवाददुस्तस्मैवसवोवासवाभिधं॥अथतुष्टःप्रणम्येशंरामोदशरथा
॥त्मजः॥२५॥प्रांजलिःप्रयतोभूत्वाभक्तियुक्तोव्यजिज्ञपत्॥२५॥नगवन्मानुषेणैवनोल्लं
॥घ्योरावणोंबुधिः॥तत्रलंकाभिधंदुर्गंदुर्जयंदेवदानवैः॥२६॥

मनुष्यैरित्यर्थः॥नोल्लंघ्यःलंघयितुंशक्योनेत्यर्थः॥किंचतत्रदुर्गमस्तितदपिनदुर्गांतरसाधारणंकिं
तुदेवदानवैरपिदुर्जयं॥२६॥

तत्रापि रक्षकान मनुष्यादयः येन जीयेरन् हि ह्नित्याह ॥ अनेके ति ॥ ननु एकशब्दस्य नित्यैक
कवचनांतत्वा नञ्समासस्य चोत्तरपदार्थप्राधान्यमिति न्यायादौ स्थापितत्वेन अनेक
शब्दोपि नित्यैकवचनांतः अत एव सूत्रकारः प्रायुंक्त अनेकमन्यपदार्थे इति अत एवमाद्यो
पि सेव्यतेनेकया संनतायांगयेति प्रायुक्तं । तत्कथं कोटय इत्यनेन सामानाधिकरण्यमिति चे
त् अनेकशब्दानामेव बहूनामेकशेषे तदुपपत्तेः स्फुटं चैतत्कैयटे वमाहाविवरणादौ एते

॥ अनेककोटयस्तत्र राक्षसा बलवत्तराः ॥ सर्वे स्वाध्यायनिरताः शिवभक्ता जितेंद्रियाः ॥२

नपत्यं तेनेके जच्च धेरिवोर्मयः इति माद्योपि व्याख्यातः स्यादेतत् तथा कोटिशब्दस्य बहुवच
नांतत्वमनुपपन्नं विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः संख्यार्थे द्विबहुत्वे तस्तासु चानव
तेः स्त्रियः इत्यमरसिंहेन संख्येयपरतयामेकवचनस्य नियमितत्वादिति चेन्न एकां सं
ख्यां व्यक्तिमाययाएकवचनमेवेति हि तदर्थः न तु संख्या व्यक्तिबहुत्वेप्येकवचनमिति ३८
तथा च नदाहृतममरस्योत्तरार्द्धमप्येवं सांख्येयं । संख्यारूपो योर्थः संख्येयपरता
यां चोक्तं यथापि स्तनः । द्विवचन बहुवचन प्रकृत्यर्थे केचवनएवेति अत एव पूर्वार्धे संख्या

ग्रहणस्यापि सार्थक्यं इदमेवाभिसंधाय मुरारिः प्रायुंक्त । एकद्वित्रिचतुःक्रमेण गणन
मेषामिवास्तर्यत्तां कुर्वाणामसकौ चय दृश्यौतान्यं नोजसंवर्त्तिकाः तृयोपिक्रमशः प्र
श्रा

॥ अनेकमायासंयुक्ता बुद्धिमंतोग्निहोत्रिणः ॥ कथमेकाकिना जेया मया त्राता
॥ च संयुगे ॥ २८ ॥ श्रीमहादेव उवाच ॥ रावणस्य वधे राम रक्षसामपि मारणे ॥ वि
॥ चारो न त्वया कार्यस्तस्य कालोयमागतः ॥ २९ ॥ अधर्मे तु प्रवृत्तास्ते देव ब्राह्मणपी
॥ डने ॥ तस्मादायुः क्षयं याति तेषां शौरपि सुव्रत ॥ ३० ॥ राजस्त्री लंघनासक्तं रावणं
॥ निह निष्यति ॥ पानासक्तो रिपुर्जेतुं सुकरः संगरांगणे ॥ अधर्मनिरतः शत्रुर्नाम्ये
॥ नैव हि लभ्यते ॥ ३१ ॥ अधीतवेदशास्त्रोपि सदाधर्मरतोपि वा ॥ विनाशकाले संप्रा
॥ प्ते धर्ममार्गाच्चुतो भवेत् ॥ ३२ ॥

सारयतितः संप्रत्यस्त्रन्नद्योतः संख्यातुं सुकृतहलेव नलिनी भानोः सहस्रंकरानिति मूलश्लो
कार्थः स्पष्टः ॥ ३० ॥ राजस्त्री सीता पानासक्तः मदिरापानतत्परः ॥ ॥ ३१ ॥

पीड्यंतइतियेनदेवब्राह्मणादयःपीड्यंतेतस्यनाशोस्वयमेवत्वदादिप्रपत्त्यंविनैवस्थितः
जातकल्पइत्यर्थः॥३३॥किष्किंधेति।किंकिंदधातीतिकिष्किंधा॥अनेकाद्भुतवस्तुशालिनीत्यव
यवार्थःयोगरूढश्चायंशब्दःपारस्करादिगणेनिपातितःकिष्किंधाख्येनगरेबहवोवानरजा
स्तेदेवांशोपबृंहिताःतवसाहाय्यंकरिष्यंतितैरेवसहायभूतैःपयोनिधिंवधानसमुद्रंबंध

॥पीड्यंतेदेवताःसर्वाःसततंयेनपापिना।ब्राह्मणाश्चतपस्वैवतस्यनाशःस्वयंस्थितः
॥३३॥किष्किंधानगरेरामदेवानामंशसंभवाः॥वानराबहवोजाताद्दुर्जयाबलवत्तराः॥
॥३४॥साहाय्यंतेकरिष्यंतितैर्बधानपयोनिधिं।अनेकशैलसंबद्धेसेतौयातुवलीमु
॥खाः॥३५॥

ध नंकुर्वित्यर्थः।कूँतःशानजःविनिशानजादेशःततःअनेकैःशैलैःसम्यकबद्धेसेतौवलीमु ३९
खामर्कटाःवल्योमुखेयेषांतइतिविग्रहःकपिप्लवंगप्लवगशाखावलीमुखाइत्यमरः।यो
मृग रंगंबंधु॥३५॥

दुर्वर्णेषुमहास्त्रंनप्रयोक्तव्यमितिप्रागुक्तमेवार्थदार्ढ्यार्थंस्मारयति।शस्त्रैरिति।३६॥
चिंतानकार्येतिसमाश्वासयन्नुपसंहरति॥अथवेतित्रिभिःस्पष्टोर्थः॥अत्रचराचर

रावणंसगणंहत्वातामानयनिजप्रियां॥शस्त्रैर्युद्धेजयोयत्रतत्रास्त्राणिनयो
जयेत्॥अस्त्राणिमुंचन्दिव्यानिस्वयमेवविनश्यति॥३६॥अथवाकिंवत्सकेन
मयैवोत्पादितंजगत्।मयैवपाल्यतेनित्यंमयासंह्रियतेपिच॥३७॥अहमेकोज
गत्स्रष्टाःमृत्योरपिमहीपते॥भक्षेहमेवसकलंजगदेतच्चराचरं॥३८॥ममवक्त्रेगताः
सर्वेराक्षसायुद्धदुर्मदाः॥निमित्तमात्रंत्वंभूयाःकीर्तिमाप्स्यसिसंगरे॥३९॥ ॥इ
तिश्रीपद्मपुराणेशिवगीतासूपनिषत्सुदिव्यास्त्रप्राप्तिर्नामपंचमोऽध्यायः॥

ग्रहणादित्याद्यधिकरणेषुसिद्धमेतत्॥३९॥ ॥इतिश्रीपद्मपुराणेशिवगीतायांपंचमोध्या
यः॥५॥ ॥

भगवन्निति। हे भगवन् अत्र सृष्टिस्थितिसंहाराणांमहमेव कर्त्तेत्येवं रूपे त्वदुक्तेऽर्थे मे महच्चि-
त्रं प्रजायते विस्मयोऽद्भुतमाश्चर्यं चित्रमपीत्यमरः। आश्चर्ये बीजमाह। शुद्धेत्यादिना। मूर्त्तः स-
मुच्छ्रितः महाभाग्यशालीति यावत् मुर्छाधातोः समुच्छ्रायवाचकात् क्तेरिक्तश्चाद्धोप इतिच्छलो
भवोरूपधायाद्दतिदीर्घः आदितश्चेनेट् परिच्छिन्नाआकृतिः शरीरं यस्य सः पुरुषरूपधीरिव
त्वं पार्वत्या सहितः सन्नत्रैव रमसे। अत्र पुरुषरूपेण धृङ्धातौ प्रगतेइ ति पुरुषरूपधृक्

॥श्रीराम उवाच॥ भगवन्नत्र मे चित्रं महदेतत्प्रजायते॥ शुद्धस्फटिकसंकाश त्रि
॥नेत्रश्चंद्रशेखरः॥१॥ मूर्तस्त्वं भपरिच्छिन्नाकृतिः पुरुषरूपधृक्॥ अंबयासहितो
॥त्रैव रमसे प्रमथैः सह॥२॥

ग
जिधषाप्राज्ञे। कचिन्मत्पयोय स्मादिति वक्तव्ये ह्याश्रयणं दृधगतिच निपातनात्कृतं॥ तथाव ५०
धृषोध पइत्यादि रूपं बोध्यं धजगताविति त्वादिः तस्य तुध र्जतानिधकूइतिक्विपिधजौधजइत्या
दिबोध्यं॥ पुरुषरूपं गच्छति प्राप्नोतीति निवासिन्यसेत्यर्थः॥१॥

त्वं कथमिति। एवं भूतस्त्वं पंचभूतान्यादिर्यस्य तथाभूतं चराचरं। तज्जन्मेन कथं करोषि पालय
सिं हंसि वा इति शेषः। सर्वात्मकत्वं तु ना क्षिप्यते। तस्य पूर्वाध्यायशेषे गावनाँरात्। तथाभ्यास्या
यां सप्तमाध्याय प्रथमभागेन सह विरोधाच्च। तत्र हि वक्ष्यति। भगवन् यन्मया पृष्टं तत्त
थैव संस्थितं विभो॥ परिच्छिन्नपरीमाणे देहे भगवतस्तव। उत्पत्तिः पंचभूतानां स्थितिर्वा

॥त्वं कथं पंचभूतादिजगदेतच्चराचरं॥ तद्ब्रूहि गिरिजाकांत मयि ते नुग्रहो यदि॥
॥३॥श्रीभगवानु॥ शृणु राम महाभाग दुर्ज्ञेयममरैरपि॥ तत्प्रवक्ष्यामि यत्नेन ब्रह्म
॥चर्येण सुव्रत॥ पारं यास्यस्यनायासाद्येन संसार वारिधेः॥४॥

विलयः कथमिति। नथाच पूर्वपक्षस्याय माशयः कुलालादेर्घटादिकर्त्तरि देशांतरीय का
र्योत्पादन सामर्थ्यं कापि न दृष्टं अतस्त्वमपि विप्रकृष्टं कथं जनयेः। किंच शरीरिणः सर्वकर्त्त
त्वं बाधितं अंततः स्वशरीरे तदवयवतत्संयोगादिषु च कर्त्तृत्वासंभवात्॥ अपि च भोगासक्त
स्य च क्रिसादिज्ञानकत्वं। एवं पालकत्वे संहारकत्वे चानुपपत्तिरिति॥३॥ शृणु रामेति। हे सुव्र
त राम यत्नेन ब्रह्मचर्येण शृणु। यतो ज्ञेयं प्रवक्ष्यामि येन ज्ञानेन सत्त्व अनायासात्संसारसाग
रस्य पारं यास्यतीति संबंधः॥४॥

कुलालादेर्घटादिकर्तृत्वंअहंकारोपाधिकंशरीरादिसापेक्षंचअतोव्यवहितविप्रकृष्टा
दिकंकर्तुंकुलालादिर्नप्रवर्ततीतियुक्तंममजगत्कर्तृत्वंतुनाहंकारवृत्तिसापेक्षं।किंतुस्व
रूपज्ञानेनैवकल्पितभेदेननिर्वाह्यतेमायावृत्त्यावा।तुयथापिशरीरापेक्षातत्रनास्ति
तथाचकर्तृभूतस्यमायोपहितबिंबचैतन्यात्मनोममसकलप्रपंचेनसहाव्यवधा

॥दृश्यंतेपंचभूतानियेचलोकाश्चतुर्दश॥समुद्राःपर्वतादेवाराक्षसाऋषयस्तथा।
॥५॥दृश्यंतेयानिचान्यानिस्थावराणिचराणिच॥गंधर्वाःप्रमथानागास्सर्वेतेम
॥द्विभूतयः॥६॥

नमेवउपादानमपिचैतन्यंवामायावासुमुक्तितंवेतिपक्षत्रयेपिनतेनसहप्रपंचस्यविप्र
कर्षोस्तिलीलाविग्रहस्यतुपरिच्छिन्नत्वेपिकर्तृत्वांशोनुपयोगात्रकश्चिद्विशेषइतिअभिसंधा ४१
सर्व यप्रपंचोमद्विवर्तमात्रमित्याह॥५॥दृश्यंतइत्यादिनापंचभूतानिसमुद्राइत्यादीनियानिवस्तू
निदृश्यंते।सर्वेपिपदार्थाःमद्विभूतयएवनतुस्वतंत्राः॥६॥

इममेवार्थंप्राकृतनकथोपन्यासेनदृढयति।आकृतिमिति।लीलाविग्रहविशेषमित्यर्थः॥७॥
स्तुत्वेति॥मांस्तुत्वाप्रांजलयःसंतस्तथैवपुरतःस्थिताः।लीलाविग्रहएवंपरमार्थभूतइतिबुध्या
परिच्छिन्नस्यैवध्यानेआसक्ताइत्यर्थः॥८॥तानिति।लीलाकुलितंलीलाविग्रहमात्रेपरि
निष्ठंचेतोयेषांतथाभूतान्देवान्दृष्ट्वामयातेषांज्ञानंसगुणेपारमार्थिकेमुक्तंचेदमि

॥पुराब्रह्मादयोदेवाद्रष्टुकामाममाकृतिं।मंदरंप्रययुःसर्वेममप्रियतरंगिरिं॥
॥७॥स्तुत्वाप्रांजलयोदेवामांतथापुरतःस्थिताः॥तान्दृष्ट्वाथमयादेवान्लीला
॥कुलितचेतसः॥८॥तेषामपहृतंज्ञानंब्रह्मादीनांदिवौकसां॥९॥

तिज्ञानमपहृतं।प्रश्नावतारणपूर्वकंपरमंतत्त्वमुद्दिश्यसंसाराब्धेस्तानुद्धरिष्यामीत्याश
येनप्रश्नप्रयोजकीभूतसंशयादिमयातेषांसंपादितमितिभावः॥ ॥९॥ ॥ ॥श्री॥

ते देवाः अज्ञानात् अज्ञानं प्राप्य स्वर्लोके कर्मणि पंचमी आसन् अतिष्ठन् । अस भुवि इति धातो
र्लङ् । मां भवान् क इति सन्नह्य अपप्रच्छुरित्यर्थः । हते लट् प्रतिरूपको निपातोयं अपप्रश्नां
तरं अहं देवान् अब्रवं अकथयं पुरातनः पुरातन अहमेव ॥१०॥ ननु षडस्माकमनादय इति शा
स्त्रकाराणां मुद्घोषः । तथा आहमेव वेदा पुरातन इत्यवधारणमसंगतमित्याशंक्य प्राग्
क्तमेव सोपपत्तिकमाह । आसमिति प्रथमं अहमेवासं अहमेव वेदानीं वर्त्ते । अहमेव

॥ आसन् ते सत्तदज्ञानान्मामाहुः को भवानिति ॥ अथाब्रुवमहं देवानहमेव पुरा
॥ तनः ॥१०॥ आसं प्रथममेवाहं वर्त्तामि च सुरेश्वराः ॥ भविष्यामि च लोकेस्मिन्नम
॥ त्तो नान्योस्ति कश्चन ॥११॥

भविष्यामि स्थास्यामीत्यर्थः । मत्तोन्यः आविद्यानतत्संबंधादिः कश्चन कोपि न सन् पारमार्थिकोने
त्यर्थः । तथा च मिथ्याभूतानामविद्यादीनां अधिष्ठाने त्रैकालिकनिषेधस्य संभवादहमेवेति अवधा ५२
रणबलेन प्रतीयमान इतरव्यवच्छेदो नासंगत इत्यर्थः । अत्र वर्त्ते इति वक्तव्ये परस्मैपदप्रयो
ग आर्षः । श्रुतीस्तस्यानुकरणं वा तथा च श्रुतिः । ते देवा रुद्रमपृच्छन् को भवानिति सोब्रवीदहमे
कः प्रथममासं वर्त्तामि भविष्यामि चेत्यादिः ॥११॥ ॥

व्यतिरिक्तं चेति । पूर्वमुक्तोप्यर्थो न पुनरभ्यस्यते ॥ तात्पर्यनिर्णयाय । अभ्यासो हि तात्पर्यलिं
गं तथा च छांदोग्ये तत्त्वमसीति नववारं तेभ्यस्तं च नाभ्यस्ता । अभ्यासे हि भूयस्त्वमर्थस्य भव
तीत्याद्यत्वमपि प्रागेवोपचरितार्थत्वमिति हे सुरेश्वराः अन्यदपि अविद्यादिस्यादित्रमपि
घटपटादिकं यत्किंचिद्दृश्यते तत् मत्तो व्यतिरिक्तं नास्ति किंतु मय्यध्यस्तत्वान्मत्तादात्म्याप
न्नमेवेत्यर्थः । तादात्म्यं च घटः सन्नित्यादिसामानाधिकरण्यप्रतीतिनिर्वाहकः कश्चिदाविद्य

॥ व्यतिरिक्तं च मत्तोस्ति नान्यत् किंचित् सुरेश्वराः ॥ नित्योनित्योहमनघो ब्रह्मणां ब्रह्म
॥ णः पतिः ॥१२॥

को धर्मः न चैवमनंतपदार्थस्वीकारगौरवं । यतो युक्त्या वैशेषिकादिभिरपि उद्भावनत्वात् अवि
द्याउकोपाधीयत्वान्तु सिद्धांतेपि सुलभा । विकृतत्वानां विजनत्वात् उक्तं सर्वतादात्म्यमेव विवृ
णोति । नित्य इति । नित्योहं स्वरूपेण अनित्योहं घटाद्यनित्यतादात्म्यात् । अनघः कालत्रयाबाध्यः ॥
ब्रह्मणां वेदानां ब्रह्मणो हिरण्यगर्भस्य च पतिर्नियंता इषत् भेदस्यापि सत्वात् ॥१२॥ ॥

दक्षिणस्यामंचंतीतिदक्षिणांचः दक्षिणादिक्स्थाः पदार्थाः उदुत्तरस्यांअंचंतीत्युदंचः प्रपूर्वस्या
मंचंतीतिप्रांचः प्रतिपश्चिमायांअंचंतीतिप्रत्यंचः। अधरस्यांइत्यधःपूर्वाधरावराणामसिपुर
श्री धवश्चैषामीतिसाधुः विदिशः दिशोर्मध्यंदक्षिणपूर्वादिः॥१२॥ सावित्रीतिसवितादेवतायस्यां
सासावित्री॥ गायतीतिगायन्तं जपकर्त्तारंत्रायतेइतिगायत्री तदाहव्यासः। गायत्रीप्रोच्यतेय
स्माद्गायंतंत्रायतेततः। सवितृद्योतनाच्चैवसावित्री॥ परिकीर्त्तितेति। एकस्यैवमंत्रस्यकाल

॥दक्षिणांचउदंचोहं प्रांचः प्रत्यंच एव च॥ अधश्चोर्ध्वंचविदिशो दिशश्चाहंसुरेश्वराः
॥१३॥ सावित्रीचापिगायत्री स्त्रीपुमानपुमानपि। त्रिष्टुब्जगत्यनुष्टुप्चपंक्तिश्छंद
॥स्त्रयीमयः॥१४॥

विशेषोपाधिकभेदात्पृथगुपादानं। तथाचव्यासः गायत्रीनामपूर्वाह्णे सावित्रीमध्यमेदिन
मिति। अपुमानेति। नपुंसकमित्यर्थः। त्रिष्टुबिति॥ यस्याएकादशाक्षरःपादः जगतीतिस्याद्द्वाद
शाक्षरःपादः। अनुष्टुबिति। यस्याष्टाक्षरः पंक्तिश्छंदइतिपंचानांसंघःपंचतक्षौपंचतोइतिपंक्तिः ४३
पंक्तिविंशत्याद्याःपाणिनिसूत्रेनिपातनात्साधुःदशाक्षरचतुष्टिनपादशालित्वात्पंक्तिश्छंदइत्य
च्यते॥ ॥१५॥

गुरोःकर्मगौरवं अध्यापनादि॥१५॥ अतिशयेनवृद्धोवर्षिष्ठः प्रियस्थिरेत्यादिनावृद्धस्यवर्षादे
शः अपांपतिःसमुद्रःनतुवरुणः तस्यपृथक्कुवक्ष्यमाणत्वात्। आदिपूर्वोक्तस्यतेजसःआदिः
वायुरित्यर्थः॥१६॥ अथर्वणोंगिरसश्चमंत्रः चतुर्थोवेदः॥१७॥ इतिहासोमहाभारतादिःपु
राणंब्राह्मादीनिकल्पयतिबोधयतिप्रयोगमितिकल्पः नराकल्पोदाःसिद्धरूपःप्रयोगोयैः
कर्मणामवगम्यतेतेकल्पाःलक्षणार्थानिसूत्राणीतिप्रत्याचक्षतइतिकल्पवान्तद्विषयकाम्भा

॥सत्योहंसर्वतःशांतःत्रेताग्निर्गौरवंगुरुः। गौर्यहंगह्वरंचाहंघोरहंजगतांविभुः॥१५॥
॥ज्येष्ठःसर्वसुरश्रेष्ठोवर्षिष्ठोहमपांपतिः। आर्योहंभगवानीशस्तेजोहंचादिरप्यहं॥१६॥
॥ऋग्वेदोहंयजुर्वेदःसामवेदोहमात्मभूः। अथर्वणश्चमंत्रोहंतथाचांगिरसोवरः॥१७॥
॥इतिहासपुराणानिकल्पोहंकल्पवाहनं॥ नाराशंसीचगाथाहंविद्योपनिषदोस्म्यहं॥१८॥

सवान्नरैर्मनुष्यैः आसमंतात्॥ दृश्यतेस्तूयतेइतिनराशंसोरुद्रःतस्येयंनाराशंसीगाथारुद्र
प्रतिपादकाःग्रंथविशेषाविज्ञानैश्वरस्याहं॥ नाराशंसीरुद्रदेवत्योमंत्रःगाथाश्चयज्ञगायेंद्रगा
थादिकेति॥ उपनिषदोविद्या। उपनिषद्रूपाविद्येत्यर्थः। उपनिपूर्वात्सदेःसक्विपितिक्विप्। उपस
व

मीपे स्थित्वा हृदयमारुह्येति याचात्। निपादयति विशीर्णानां करोति अविद्यामित्युपनिष
त्स्वंतर्गो वितरणार्थः। वार्त्तिककारास्तु। उपनीय प्रमातारं ब्रह्मोपास्तदेवं यतः निहंत्यवि
द्यांतज्जं च तस्मादुपनिषद्भवेदित्याहुः॥११॥ श्लोका इति। श्लोकाः प्रागुक्तेषु पुराणादिष्वनंतर्भू
ताः ओवल्लीवद्वाचात्। सूत्राणि ब्रह्मसूत्रादीनि अनुव्याख्यानं तस्येदमनुव्याख्यानं नव
तीत्युपक्रम्य वेदे य वक्तव्यव्याख्यानानि इतरत्र कृतानि। विद्याः पूर्वोक्ताख्यनंतर्भूता अपि

श्लोकाः सूत्राणि चैवाह मनुव्याख्यानमेव च॥ व्याख्यानानि तथा विद्या इष्टं हुतमथाहुतिः ॥१२॥

गांधर्वादिविद्याः यद्यपि बृहदारण्यकव्याख्यायां पुराणादिशब्दा अपि वेदैकदेशविशेष ५४
परतयैव नीतास्तथापि अस्य महतो भूतस्येत्युपक्रमानुसारान्नत्रतथैव युक्तं इह तु रू
ढिपरित्यागे प्रमाणाभावाद्यथाव्याख्यानमेव साधु इष्टं यागः हुतं होमः आहूयत इत्याहु
तिहोमः ॥१२॥ ॥

दत्त इति दत्तो दानकर्मोत्पन्नो गवादिः दत्तं दानं लोकाः इहलोक इत्यर्थः। बहिश्चाहमित्यादि
यद्यपि दक्षिणां च इत्यादिना स्फुटं पुनरुक्तं। तथापि प्रागुक्तरीत्या तत्त्वमसीति नवकृत्वो
ऽभ्यासवदेव नेयं तथा चाहुर्भाष्यकाराः पूर्वमीमांसायां न पुनरुक्तनाम महान् दोषो बहुकृ
त्वोपि हि पथ्यवद्देदितव्यमिति एतदेवास्मिन् प्रकरणे प्रतीयमानेषु पौनरुक्त्येषु स

॥ दत्तो दत्तः महं लोकः परलोको हमक्षरं बहिश्चाहं तथा चांतः पुरस्तादहमव्ययं ॥१३॥

माधानं मंतव्यं॥ इयं च सिद्धस्य गतिरुच्यते अतो नातिप्रसंग आपादनीयः अत एव वा
जसनेयिनां॥ एष लोक हो वा ब्राह्मणयोः पठ्यमानं यत्साक्षादपरोक्षात् ब्रह्म य आत्मा सर्व
५५ तर इति वाक्यं व्याकुर्वद्भिर्भाष्यकारादिभिरिदमेव निर्णीतं। तथा च व्याससूत्रमपि अंतरा
भूतग्रामवत्स्वात्मनः अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशांतरवदिति॥१३॥२०॥ ॥

तन्मात्राणीति। प्र अपंचीकृतपंचभूतानीत्यर्थः। विषयाणि विषयत्वेनाख्यायमानानि वस्तूनि यद्यपि विषयशब्दो नित्यं पुल्लिंगस्तथापि तदाचष्ट इति णिजंतात्कर्मणि एरचि समाधेयं ण्यरजण्यंतानामित्यस्य नाप्यकारैरनादंतत्वात् न चैवमपि अंजंतत्वात् पुंस्त्वापत्तिः भावेच घञजपः पुंसीति सिद्धांतात्। इकृ चकर्मार्थस्य दर्शितत्वात् एतच्च संबंधमनुवर्तिष्यत इति

॥ज्योतिश्चाहं तमश्चाहं तन्मात्राणींद्रियाण्यहं। बुद्धिश्चाहमहंकारो विषयाण्यहमेव ॥हि॥२१॥ ब्रह्मा विष्णुर्महेशोऽहमुमा स्कंदो विनायकः। इंद्रोऽग्निश्च यमश्चाहं निर्ऋतिर्वरुणोऽनिलः ॥२२॥ कुबेरोऽहं तथेशानो भूर्भुवःस्वर्महर्जनः। तपः सत्यं च पृथिवी चापस्तेजोऽनिलोऽस्म्यहं ॥२३॥ ॥आकाशोऽहं रविः सोमो नक्षत्राणि ग्रहास्त्वहं। प्राणः कालस्तथा मृत्युरमृतं भूतमप्यहं ॥२४॥

महाभाष्यव्याख्यावसरे कैयटादिभिः स्फुटीकृतमिति दिक् ॥२१॥२२॥२३॥ ग्रहाणीति ग्रह इत्याख्या ५५
यमानानि वस्तूनीत्यर्थः। विषयाणीत्यस्य व्याख्यानेन व्याख्यानमेतत् ॥२४॥ ॥

भूमादावितिः। सदा जपतां गायत्रीजपं कुर्वतां मुनीनां बुध्येति शेषः। आदौ प्रथमानः ओंकार अहमेव मध्ये प्रथमानं भूर्भुवःस्वरित्येतदप्यहमेव तदनंतरं यत्प्रथते गायत्रीशब्दवाच्यं तदपि तथैव अहमेवेत्यर्थः। शीर्षं च भूमाप इत्यादि अहमेव यतोऽहं विश्वं रूपयति स्वरूपात्मिकया स्फूर्त्या भासयतीति विश्वरूपः तथा च सर्वात्मकत्वादाद्यर्थमेव असाधारणस्वशब्देन कतिपय

॥नव्यं न विष्यत्कृत्यं च विश्वं सर्वात्मकोऽप्यहं। ओमादौ च तथा मध्ये भूर्भुवःस्वस्तथैव च ॥२५॥ ॥ततोऽहं विश्वरूपोऽस्मि शीर्षं च जपतां सदा। अमृतं पावितं चाहं कृतं चाकृतमप्यहं ॥२६॥ ॥परं चैवापरं चाहमहं सर्वपरायणः। अहं जगद्धितं दिव्यमक्षरं सूक्ष्ममव्ययं ॥२७॥ प्रा ॥जापत्यं पवित्रं च सौम्यमग्राह्यमग्रियं ॥२७॥

दार्थत्वात्तादात्म्यं प्रतिपाद्यत इत्यर्थः ॥२६॥ अक्षरमिति। न क्षरतीत्यक्षरं। अश्नुते व्याप्नोतीति वा अक्षरं तदुक्तं महाभाष्ये। न क्षरत्यक्षरं विद्यादश्नोतेर्वा सरोऽक्षरमिति। तथा च व्यासमूत्रेऽपि अक्षरमंबरांतधृतेरित्यस्मिन्नेतस्यैवाक्षरस्योत्पत्तिः नि स्थमक्षरपदं ब्रह्मपरतयानिर्णी

तंप्राजापत्यंप्रजापतिदेवताकंतथासौम्यंसोमदेवताकं। अग्रायंदुरवगाहार्थंअग्रेनयंअग्नि
यंश्रेष्ठतमंइदंगुणोपेतंपवित्रंपूयतेनेनेतिकृत्वापापक्षयकरंस्तं। तत्रप्राजापत्यंहिरण्य
गर्भइत्यादिप्रसिद्धंसौम्यंतत्रऋग्वेदसंहितायांनवमंमंडलं। तत्सर्वंअहमेवेत्यन्वयः। अत्रप्रा

॥ अहमेवोपसंहर्त्तामाहाग्रासोजसांनिधिः। हृदयदेवतात्वेनप्राणत्वेनप्रतिष्ठितः॥२३॥
॥ शिरश्चोत्तरतोयस्यपादौदक्षिणतस्तथा॥ यस्यसर्वोंतरःसाक्षादोंकारोहंत्रिमात्रकः॥२४॥

जापत्यंहिरण्यगर्भइत्यादिनाराम॥ सौम्यशब्देसोमाट्ट्यण्अग्नियशब्देअग्राद्यद्घौचेतिघ
चपवित्रशब्दःपुवःसंज्ञायांइतिइत्रप्रत्ययः॥ महांतोनगसागराद्याग्रस्यंतइतिग्रासाःग्र
स्यायेषांतानिमहाग्रासानितादृशानिचलानिओजांसिचप्रलयानलादीनितेषांनिधि
रधिष्ठानंउपसंहर्त्तासंहारकश्चाहमेवहृदयंसर्वप्राणिनामंतःकरणंतत्रदेवतात्वे
प्राणत्वात्माप्रतिष्ठितश्चाहमेव॥२३॥ विराट्रूपोप्यहमेवप्रणवात्मकश्चेत्याह। शिरश्चे ४६
त्याह। शिरश्चेति। यस्यममोत्तरस्यांदिशिवर्तमानाःसर्वेपदार्थाःशिरः। तथादक्षिणदिक्
स्थाःपदार्थाःसर्वेपादौचरणौयस्यचविष्टःसर्वोपिप्रपंचःअंतरःमध्यभागःसाक्षात्त्रं

कारः। कीदृशःओंकारःतिस्रोमात्रायस्यसःत्रिमात्रकः। पूर्वंशिरश्चरणौमध्येचेतिसक
लरूपंच अंतरःमध्यभागःसो तत्रैवत्रितयेमात्रात्रितयमितिबुद्धीकृत्वाप्रणवात्मेद
नाहंउपास्यइत्यर्थः॥२४॥ ओंकारेअकारस्यउकारस्यचकल्पनायां। अक्षरसाम्येनार्थंनि
र्वक्ति। ऊर्ध्वंस्वर्गादिकंप्रतिउन्नामयेनयामियस्मादेवंतस्मादुकारः। अत्रहृस्वदीर्घयोरु

॥ ऊर्ध्वमुन्नामयेयस्मादधश्चापनयाम्यथा॥ तस्मादोंकारएवाहमेकोनित्यःसना
॥ तनः॥२५॥

वर्णयोःसर्वदीर्घोबोध्यःअथपुण्येक्षीणेसतिअधःअपनयामिचयस्मादेवंतस्माद
कारः। अत्रहृस्वयोरेवद्धयोरवर्णयोःसवर्णदीर्घःतथाचकाराद्धकारेपरेआद्गुणेनइ
त्योकारःएवंरूपःसन्नम्यतेगम्यतेइतिओम्। अमुगतावित्यस्माद्धिच्। इदंचाक्षरसाम्ये
ननिर्वचनंवैयाकरणानामपिसंमतं॥ तथाचकात्यायनः॥ नामचधातुजमाहनिरुक्तेव्या
करणेशकटस्यचतोकमित्यादिरुक्ककारश्चाह॥ अथहरसाम्यान्निर्ब्रूयादितित्रिमात्रत्वंच
प्रातिशाख्यादौविवेकस्थितयोक्तमितिदिक्॥२५॥ ॥ ॥

तदेवमोंकारो निर्वचनपूर्वकं स्वस्मिन्योजितः एवमन्येपि योज्या इत्याशयेन कतिपयानां निर्व
चनं। प्रदर्शयति। ऋच इति। सोहं तेन हेतुना प्रणवो मतः सकः योहं ब्रह्माख्यऋत्विग्विशेषः
सन् कर्मणि ब्राह्मणेभ्यः होतृप्रभृतिभ्यो यथायोग्यं ऋचः यजूंषि सामानि च प्रणमय्य प्रण
तानि उपस्थितानि करोमि यज्ञे हि हौत्रं ऋक्साध्यं आध्वर्यवं तु यजुःसाध्यं औद्गात्रं साम साध्यं

ऋचो यजूंषि सामानि यो ब्रह्मा यज्ञकर्मणि ॥ प्रणामये ब्राह्मणेभ्यस्तेनाहं प्रणवो मतः ॥२१॥

ब्रह्मा तु प्रवर्त्तियेभ्यः सन् स्तत्कालापेक्षितान् ऋगादीनुपस्थापयति ॥ इदं च ऋग्वेदे अष्टमाष्टके
ऋचा त्वः पोषमित्यस्या ऋचो व्याख्यायां वेदभाष्यादौ स्फुटं ॥ णु स्तवने ॥ तुदादिः। णु स्तुतादि
त्यदादिः प्र णवति प्रणौति वा प्रणवः प्रस्तावक इत्यर्थः ॥ पचाद्यच् ॥२१॥ ॥ ४७

स्नेह इति। स्नेहो घृतादिद्रव्यं मांसखंडं कर्मव्याप्नोति रसासृगादिधातुरूपेण परिणम्य मां
संप्रति परिणामी शन्। अनुगच्छति तथा व्यापयति च मांसस्याप्यधिरढं तद्वदहमपि सर्वं
लोकानधिष्ठानत्वेनानुस्यूतः सन् व्याप्नोति तांश्च व्यापयामि स्थूलावः स्थापन्नान् करोमीत्य
तो हेतोः सर्वं व्याप्नोतीति व्यापयति चेति व्युत्पत्त्या सर्वव्यापि अस्मि ॥२२॥ आदिश्चांतश्च त

॥स्नेहो यथा मांसखंडं व्याप्नोति व्यापयत्यपि ॥ सर्वं लोकानहं तद्वत्सर्वव्यापीत
॥तोस्म्यहं ॥२२॥ ब्रह्मा हरिश्च भगवान् आद्यंतं नोपलब्धवान् ॥ ततोन्ये च सुराय स्मादनंतोह
॥मतो मतः ॥२३॥ गर्भजन्मजरामृत्युसंसारभयसागरात् ॥ तारयामि यतो भक्तं तस्मात्ता
॥रोहमीरितः ॥२४॥ चतुर्विधेषु देहेषु जीवत्वेन वसाम्यहं ॥

योः समाहारः आद्यंतं ब्रह्मादयोपि नोपलब्धवंतः अतोहं अंतातावादनंतः ॥२३॥ तारयतीति तारः तर
तेर्ण्यंतात्पचाद्यच् ॥२४॥ चतुर्विधेषु जरायुजांडजस्वेदजोद्भिज्जेषु अहं जीवो भूत्वा वसामि ॥२५॥

कूटस्थेति। स्वभावतः सूक्ष्मत्वाभावेपि अंतःकरणोपाधिकं सूक्ष्मत्वमस्तीत्यर्थः। एतेन एषोऽणु
रात्मा चेतसा वेदितव्य इत्यादिश्रुतयश्चौपाधिकाणुत्वपरा इति स्फुटीकृतं भवति तेन स्व
भाविकमणुत्वं जीवस्येति वदंतः पांचरात्रागमोपजीविनः परास्ताः स्वभावतोऽणुत्वेनाप्र
काशेन सहात्यंताभेदादेस्तैरेव स्वीकृतस्य व्याघातापत्तेः विरुद्धधर्माश्रयोपीश्वरशक्तिवशे

॥सूक्ष्मोऽनंतोऽथ कूटस्थो यत्र तत्र स्थितः प्रकीर्तितः॥३५॥ महातमसि मग्नेभ्योऽज्ञकेभ्योय
॥त्प्रकाशये॥ विद्युद्वदतुलं रूपं तस्माद्द्युतमस्म्यहं॥३६॥

न स्वीक्रियंत इति तु जीवब्रह्मभेदस्य तदभिमतस्य व्याघातापादकत्वानुपेक्षमीतरन्यत्र वि
स्तरः॥३५॥ यद्यस्मात्कारणात् महातमसि मग्नेभ्योऽज्ञकेभ्यो विशेषेण द्योतत इति विद्युत्सौदामि ५८
नी तत्सदृशं प्रकाशशब्दार्थत्वेन तमः शब्दार्थनिवर्तकत्वेन च स्मात् परमार्थस्तु अतुलं तुला
रहितं रूपं प्रकाशये तस्माद्द्युतमिति शब्दः नागरुमस्मि॥३६॥

एक एवेति विसृजामि संहरामीत्यर्थः। उपसर्गविशेषसमभिव्याहारतस्त्वोपमर्थः। वि
वासयामीति। लोकाल्लोकांतरं प्रापयामि गृह्णामि अनुगृह्णामि। तथा च सर्वजगतां सृष्टिस्थिति
संहारेषु परलोकादिप्रापणे च ममैकस्यैव यस्मात् स्वातंत्र्यं तस्मात् सगुणे मयि एकशब्द
प्रयोग इत्यर्थः॥३७॥ इदानीं निर्गुणेऽप्येकशब्दप्रयोगबीजमाह। न द्वितीय इति। यतः यस्मा

॥एक एव यतो लोकान् विसृजामि सृजामि च॥ विवासयामि गृह्णामि तस्मादेकोऽहमी
॥श्वरः॥३७॥ न द्वितीयो यतस्तस्थौ तुरीयं ब्रह्म यत्स्वयं॥ भूतान्यात्मनि संहृत्य चैकोऽह
॥ह्वो वसाम्यहं॥३८॥

तदा लयः द्वितीयो न तस्थौ किंतु आत्मनि संहृत्य एक एव वसामि। मोक्षदशायां सर्वप्रपंचमूलभूत
ज्ञानस्य सविलासस्य निवृत्तेः ननु संहर्तृत्वादिगुणविशिष्टस्यावस्थानाभ्युपगमे वियदादिप्र
पंचेन किमपराद्धं इत्याशंक्य आत्मानं विशिनष्टि तुरीयमिति। गुणत्रयोपाधिकास्त्रयो भेदाः इ
दं तु तेभ्यश्चतुर्थं निर्गुणमित्यर्थः। अत एवाह यत्स्वयमिति आत्मनो नेति निजं रूपं कश्च वेद यत्र
स इति श्रुत्या निर्दिष्टमिति भावः। तस्थ इत्यत्र छंदसि लुङ् लङ् लिट इति कालविशेषनिरपेक्षे
लिट्॥३८॥

सर्वलोकानितियद्यस्मात्कारणात् ईशयंत्यनीशानांइति शिन्यः ईश्वरत्वादिसंपादिकाः
लोजंतादान्तीदृगोणिनिः तादृशाभिः शक्तिभिर्मयाशक्तिभिः सर्वान्लोकान्ईशे। नियमये
नत्तस्मात्कारणादहमीशानोस्मीतिसंबंधः। अत्रार्थेऋग्वेदपंचमाष्टकतृतीयाध्यायस्थां
ऋतिमर्थतः पठति॥३९॥ ईशानमित्यादिनासर्वदैत्यंतेनऋतिपाठस्तित्वंअनिलाश्वरेनो
नूमोदुग्धाइवधेनवः ईशानमस्यजगतः स्वर्दृशमानमिंद्रतस्थुषइतिऋरर्थस्त्विस्थांहेश्व
रइंद्रपरमात्मनइंद्रतीतिइइतिव्युत्पत्तेः। इदिपरमैश्वर्ये। ऋग्वेद्रत्यादिसूत्रेणरन्प्रत्यया

सर्वलोकान्यदीशोहमीशानीभिश्चशक्तिभिः॥ईशानमस्यजगतः स्वर्दृशांचक्षुरीश्व
रं॥३९॥ईशानमीड्यतस्थुषः सर्वेषामपिसर्वदा॥ईशाः सर्वविद्यानांयदीशानस्तदस्म्यहं नः
॥४०॥ ॥

त्तोनिपातितः अस्यजगतोजगमस्यइशानंइश्वरं। तस्थुषः स्थावरस्यचइशानं। स्वर्दृशांस्वर्गेपुण्या ४९
तिरेकशालिनामेववासात्तदुपर्यपिवादरायणः संभवादितिव्याससूत्राच्च स्वर्गेदृशंदृश्यमा
नंत्वावयंअजिनोनुमः अभिमुखाः तात्पर्यविशेषज्ञः संतः पुनः पुनरतिशयेनवानमः।गु

महस्विति॥सोहंमहादेवोस्मीतिसंबंधः दिव्यक्रीडतीतिदेवः महांश्चासौदेवश्चेतिविग्रहः न
नुअन्येष्वपिक्रीडनकर्तृषुएवमहत्त्वमित्याशंक्यक्रीडाविशेषंप्रकटयतियः पुरुषः आत्म
ज्ञानंचयोगाश्चतैर्महीयते।ऐश्वर्यैश्चमहीयतेसर्वान्भवान्सृजतिब्रह्मारव्यः अवतिरक्षति
नारायणारव्यः सोहमेवमहत्सुमध्येमहादेवइतिसंबंधः जगत्सृष्टिस्थितिसंहाररूपाक्रीडया

॥अजस्त्रंयच्चगृह्णामिविसृजामिसृजामिच॥सर्वान्लोकान्स्वमायाभिस्तेनाहंवैम
॥हेश्वरः॥४२॥महश्चात्मज्ञानयोगैरैश्वर्यैश्चमहीयते।सर्वान्भावान्महादेवः सृजत्य
॥वतिसोस्म्यहं॥४३॥एषोस्मिदेवः प्रदिशोपिसर्वाः पूर्वोहिजातोस्म्यहमेवगर्भे॥अहं
॥हिजातश्चजनिष्यमाणः प्रत्यग्जनास्तिष्ठतिसर्वतोमुखः॥४४॥

मेवनान्येषांअतोमहत्त्वमुचितमितिभावः॥४३॥महत्त्वमेवद्रढयन्।एषहिदेवः प्रदिशोनुसर्वाइत्या
दिऋतिमर्थसः पठति।एषोस्मीति।सर्वतोमुखस्तिष्ठतीतिऋत्यायोदेवः पुरुषउक्तः एषोअहमेवदे
वोस्मिइतिसंबंधः सर्वतोमुखतामेवविवृणोतिसर्वाः प्रदिशोपिअस्मिसर्वत्रास्मीत्यर्थः।देवकाल
गं धूर्तैर्व्याप्तःसर्वसंज्ञाप्यकर्मणामितिकर्मत्वंदिगुपाधीनामपिदेशत्वात्।पूर्वोजातः अतीतइत्यर्थः

तथागर्भेजातोप्यहमस्मितयाजातः गर्भाद्बहिर्निर्गतः। जनिष्यमाणः उत्पत्स्यमानश्चाहमेव।
अतएवसर्वतोमुखः जलजविष्पटादिभिरन्तैर्देविकारित्वापत्तिरित्याशंक्याह। प्रत्यगिति। प्रति
प्रतीपंजडानृतादिभ्यो अहंकारादिभ्यः प्रातिकूल्येनसत्यज्ञानानंदतयाअंचतिप्रकाशेइतिप्रकृ
विवर्त्ताधिष्ठानमात्रमित्यर्थः॥४४॥ बाहुशब्दस्थानेहस्तशब्देनघटितोयाजुषः पाठः पृथिवी ५१

॥विश्वतश्चक्षुरुत विश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात्॥ संबाहुभ्यांधमतिसंपत
॥त्रैर्द्यावापृथिवीजनयन्देवएकः॥४५॥

शब्दस्थलेभूमिशब्दघटितस्तुऋग्वेदेपाठः। तदिदंश्रुतिद्वयंसमानार्थकमर्थतःपठति। विश्वत
इत्यादि। विश्वतश्चक्षुः सर्वसाक्षीत्यर्थः। विश्वतोमुखः सर्ववक्ता। समग्रोघकालिकव्यवहारप्रवर्त्त
नकर्तृत्वात्। सर्वकर्तृत्वाद्वाविश्वतोबाहुः विश्वविषयकप्रयत्नवान्बाहुप्रयत्ने। उणप्रत्ययः प्र
यत्नाश्चेहमायावृत्तिरूपस्तदात्मानंस्वयमकुरुतेतिश्रुतिसिद्धः स्वचयद्यपिनकर्तृत्वशरीर
घटकः कृतिमायाप्रसंगात्। तथापिनस्वरूपतोनिराकार्यः देवनाविग्रहन्यायसिद्धत्वात्कृते
तिअपिचेत्यर्थः विश्वतस्पात्सहस्रणायासर्वगतइत्यर्थः॥ बाहुभ्यांतथापतत्रैर्गमनशीलैःपा

तथाचस्वरदोषलेशोपिनेतिदिक्। स्वहशमित्येतत्त्वा। आचष्टेचक्षुरितिअयमर्थः। चष्टेइतिच
क्षुः अभिव्यंजकंसत्तास्फूर्त्तिप्रदमित्यर्थः। ईहङ्धातोव्यक्तवाक्वाचिनोअभिव्यक्तिरूपेवि
शेषणांशेनिरूढात्यागत्यागलक्षणेतियत्रामृतस्यचरलक्षणमितिश्रुतिव्याख्यापांभाष्यका
रधनत्तीत्यादिसूत्रेणउसप्रत्ययः स्वशब्दस्यभुवनलक्षकइतिस्वस्यस्वईशमित्यव्या
ख्यातत्राप्यकारधनत्तीत्यादिसूत्रेणउसप्रत्ययो स्व्यानांतरंप्रागुक्तंयाजुषंश्रुत्यंतरमुदाह
रतिइशानइतियतयस्मात्इशानः सर्वविद्यानामीश्वरः सर्वभूतानामित्यादियाजुषो
त्तिपद्यतेतस्मादित्यन्वयः॥४०॥

॥सर्वभावान्निरीक्षेऽहमात्मज्ञानंनिरीक्षये। योगंचसमयेयस्मात्भगवान्महतोमतः॥४१॥

यस्मात्कारणात्सर्वानतीतानागतान्व्यवहितादींश्चभावानहंनिरीक्षेपश्यामितथामहतःम
हापुरुषान्साधनचतुष्टयसंपन्नानितियावत् आत्मज्ञायतेनेनेतितथाभूतं। आत्मसाक्षात्कार
साधनंयोगंनिरीक्षयेबोधयामितथासम्यक्कर्मयेगच्छामिव्याप्नोमीत्यर्थः। अतःकारणात्सर्वं ५०
भगवान्मतः। भगंश्रीकाममाहात्म्यवीर्ययत्नार्ककीर्त्तिष्वित्यमरचनात्माहात्म्यवाचीभगशब्दः म
हात्म्यंचेहसर्वज्ञतातत्त्वोपदेष्टृत्वंव्यापकत्वंचेत्यादिग्राह्यमित्यर्थः॥४१॥ ।

सुतौ यद् लुकिच् टू कीदृशा वयं दुग्धा धेनव इव स्थिताः॥ यथा अजिनवत्क्षीरपूर्णोधः शालिन्यो गाव
स्तद्वत् त्वद् जिवेकार्थ क्षीरपूर्णजांडशालिनः यज्ञानुष्ठानकाले सोमरसपूर्णचमसधारिणश्चेति भा
रिणश्चेति भाव इति भाष्यकारः॥ यद्यपि योषु लेनिस न विशत्यर्चे इंद्रदेवताके स्तर के इयं द्वाविंशीऋ
क् तथापि सर्वनियामकत्वादिलिंगानां जीवे संभवेनाकाशस्तल्लिंगादित्याद्यधिकरणन्यायात्॥ ब्र
ह्मपरा बोध्या॥ तथा च वर्गे पि इंद्रं मित्रं वरुणमग्निमाहुरित्यप ऋग्प्य एकं सद्विप्रा बहुधा वदंतीति द्वि
र्त्रं यतीति अनुक्रमणीकाराश्चाहुः॥ एक एव वा महानात्मा देवता तत्र स्थाना अन्यास्तद्विभूतय इति
एवं स्थिते शिवगीताश्लोकस्य त्वं योजना ईशानमस्य जगत ईशानमिंद्र तस्थुष इति तृतीयचतुर्थ
चरणत्र्यांश्क इति प्रतीकं गृहीतं॥ तत्र जगतस्तस्थुष इति पदद्वयं तात्पर्यतो व्याचष्टे सर्वेषामपीति
इदानीमित्यस्य विवरणं ईश्वरमिति अत्र ईश ऐश्वर्ये इति धातोस्तेशन्या सेति॥ स्वत्र विहितेन तच्छी
लार्थकेन चरत् प्रत्ययेन ईशानशब्दस्त्वं आनयप्रत्ययं विहृ एवं न अयमपि नाच्छील्य वयोवच
न॥ शक्तिषु इति सूत्रेण विहितस्ताच्छीलिकः चानश्च तत्त्वशानजिति दर्शयति ताच्छील्यं विवृणोति॥ स
र्वदेति॥ आमोक्षमित्यर्थः॥ यद्यपि लसार्वधातुकत्वाभावेन नाम्यनुदात्तेत्वस्याप्रवृत्तावंतोदात्तता
पत्तिस्तथापि स्वरवत्यो न विष्यतीति भावः॥ चरत्वोपि कर्तृत्वमात्रे तात्पर्या त्तान ने वाय मिति वा॥

दैव्यदिष्टं वं पृथिवीं च संधमति॥ धमतिर्गतिकर्मा प्रेरयतीत्यर्थः पाणिपादग्रहणं चोपलक्ष
णमात्रं॥ पाणिपादस्थानापन्नैः सहकारिभिरज्ञानधर्मादिभिरित्यर्थः॥ द्यावापृथिवी इत्यपि
कार्यमात्रोपलक्षणं॥ सर्वजगत्सृजतीत्यर्थः॥ तथापि देव एक एव॥ सृष्टेर्मायिकत्वादिति भावः॥ यु
क्तं चैतत् य इमा विश्वेति चतुर्दशर्चे सूक्ते प्रथममंत्रेण सृष्टेरुपक्षेपे कृते सति द्वितीयमंत्रेण
किंस्विदासीदधिष्ठानमारंभणमित्यनेन अधिष्ठानाद्यसंभवात्कथं सृष्टिरिति दृष्टिवताशिते
सति तदुत्तरं दातुं प्रवर्तमानेनेन तृतीयमंत्रेणाधिष्ठात्रीभूतब्रह्मण एवोच्यमानतया संदर्भ
स्वरसेन प्रपंचमिथ्यात्वस्य यासात्परिणममानाज्ञानं विषयोद्य धिष्ठानं परिणामस्त

मू. जातवेदं ॥वालाग्रमात्रं हृदयस्य मध्ये विश्वं देवं वरेण्यं। मामात्मस्थं येनु पश्यंति धीरास्तेषां
॥शांतिः शाश्वती नेतरेषां॥४६॥

एकबाधकव्याधोन्यथाभाव इति दिक्॥ अत एव किंस्विद्वनमित्यादिना तदुत्तरमंत्रेणापि प्रपंच
स्यानिर्वचनीयत्वैव स्फुटीक्रियते उक्तं च यथा सतो जनिर्नैवमसतोपि जनिर्न च॥ जन्यत्वमेव
जन्यस्य मायिकत्वसमर्पकमिति॥४५॥ धियं बुद्धी ईरयंती प्रेरयंतीति धीराः विचारकुशलाः
ये पुरुषाः आत्मा जीवः सन् तिष्ठतीत्यात्मस्थः शोधितत्वंपदार्थः तं मां मदभिन्नं अनुपश्यति श्रवण

दिकाननुपश्यात्साक्षात्कुर्वंतितेषांअप्रतिबद्धेनेदंसाक्षात्कारवतांशाश्वतीशांतिः।मोक्षसु
खंआविर्भवति इतरेषांनेतिसंबंधः।कीदृशंजीवंहृदस्यमध्येबालाग्रमात्रंकेशाग्रप्रमा
णंकैश्णांस्वरूपेणव्यापकत्वेप्यौपाधिकपरिछेदवंतमित्यर्थः।कीदृशंमांविश्वंदेवंविश्वाधि
ष्ठानत्वाद्विश्वात्मकंनदंतर्यामिणंचेत्यर्थः।ननुजागर्विं त्वंभुवनेजातवेदइतिऋग्मंत्रेअ
ग्नेःसर्वांतर्यामित्वंश्रुतंनतुतवेत्याशंक्याहसोप्यहमेवेत्याह।जातवेदइति।इंद्रंमित्रंवरु
णमग्निमाहुरित्यादिश्रुतिबलात्अग्निप्रभृतिशब्दाअपिमामेवाहुरित्यर्थः।वेदोधनंतज्जा
यतेयस्मात्सतथा॥अग्नेःप्रजातंपरियाणिहिरण्यमितिश्रुतेः।विदलाभेइतिधातोर्घञि
अकारांतःपुल्लिंगोवेदशब्दः।असुन्प्रत्ययेतुलनेसकारांतोनपुंसकः।तदाजातवेदस
मित्यपिभवति॥वरेण्यंभजनीयं॥५६॥

५२

ननुविश्वात्मकंपूर्वश्लोकेउक्तं॥तच्चाधिष्ठानतयावाच्यं।नचतत्संभवतिशुक्त्यादिरेवरजताधि
ष्ठानत्वादित्याशंक्याह॥अहमिति॥योनिंयोनिंअधिष्ठानत्वेनसंभाव्यमानंशुक्त्यादिकंस
र्वंअहमधितिष्ठामि॥शुक्त्याद्युपहितोहमेवरजतादेरधिष्ठानंजडस्याज्ञानाविषयतया
धिष्ठानत्वानुपपत्तेरितिभावः॥मूलाज्ञानकार्येषुतुवियदादिषुनवछिन्नोहमेवाधिष्ठान
मित्याह।मयेदमितिपंचविधंभूतात्मकंसर्वंमयैवाधिष्ठानभूतेनपूर्णंआविद्यकत्वात्मा

॥अहंयोनिंयोनिमधिष्ठामिचैकोमयेदंपूर्णंपंचविधंचसर्वं॥
॥मामीशानंपुरुषंदेवमीड्यंविचार्यमाणंशांतिमत्यंतमेति॥५७॥

यन्नमित्यर्थः॥इदंपूर्वोक्तरीत्याविचार्यमाणंमांएतिप्राप्नोति।अर्वाग्विचारकैर्नैवविचार्यमाणंप्रा
प्नोतीतिलभ्यते।तथाचश्रुतिःब्रह्मवेदब्रह्मैवभवतीति॥कीदृशंमांअत्यंतंशांतिंप्रपंचोपरामंशि
वमद्वैतमितिश्रुतेरितिभावः॥५८॥

प्राप्नोमीति॥ यस्मिन्मनसि अशनाया अशनविषयिणी इच्छा अस्ति अशनशब्दात् अपि अश
नायोदन्येति निपातनादित्वाभावो अप्रत्ययादिप्रत्ययः तथा यस्मिन्मनसि तृष्णा क्षमा च अस्ति
तादृशस्य मनसो लिंगं तत्कार्यं क्षुत्तामिच्छादिवृत्तिं प्राप्नोम्यहं तथा अंतः आत्मनि आरूढः अंतःक
रणपरिणामादिरूपाः कामादयो अन्यत्रापि अध्यास्यंते इत्यर्थः तस्मान्मनो निग्रह एवावश्यक
इत्याह तृष्णां छित्वेति। ननु धर्माधर्मयोर्जयेन तृष्णा किं करिष्यतीत्याशंक्य तृष्णायां सत्यां

॥प्राप्नोम्यहं मनसो लिंगमाद्यं यस्मिन्नशनाया तृष्णा क्षमा च॥ तृष्णां छित्वा हेतुजालस्य
॥मूलं बुध्या चित्तं स्थापयित्वा मयीह॥४८॥

धर्मजय एव दुर्लभ इत्याशयेन तृष्णां विशिनष्टि हेतुजालस्येति हेतुजालस्यानर्थहेतूनां धर्माध
र्मादीनां संघस्य मूलं कर्तृतामित्यर्थः। तृष्णाजयानंतरं कर्तव्यमाह। बुध्येति इहापि पूर्वोक्तरूपे म ५३
यि चित्तमंतःकरणं बुध्या पातंजलोक्तयोगाभ्यासप्रकारेण स्थापयित्वा एवं पूर्वोक्तरीत्या ध्यायमानाः
ध्यायंतः। चानशानुशासन रूपस्मैपदित्वात्। एवं कृतास्संतो येमंगे ते तेषां शांतिर्मोक्षसुखं भवति॥४८॥

क २

उपसंहरति। यतोवाचेति। वाचः शब्दाः यतः स्मात् शुद्धब्रह्मणः निवर्त्तंते। नन्वेवं संति औपनिष
दत्वं न ज्येतेत्याशंक्याह अप्राप्येति। शक्तिमध्येत्यर्थः। तथा। तथा च विशिष्टेशक्तानां ज्ञानानां शैनंद
दादिपदानां जडांशस्य परित्यागेन लक्षणया अखंडसच्चिद्घनबोधकत्वाभ्युपगमान्नकश्चिद्दोष इति
भावः॥ मनसा सहेति। तथा च मनोपि निवर्त्तत इति भावः श्रूयते च यन्मनसा न मनुत इति नैवं

॥यतो वाचो निवर्त्तंते अप्राप्य मनसा सह॥ आनंदं ब्रह्मणो ज्ञात्वान् बिभेति कुतश्चन॥५०॥ श्रुते
॥ति देवामक्ष्याक्यं कैवल्यं ज्ञानमुत्तमं॥ जपंतो मम नामानि मूर्ध्यानपरायणाः॥५१॥ सर्वे ते स्वस्व
॥देहांते मत्सायुज्यंगताः पुरा। तत्तो येपरिदृश्यंते पदार्था मद्विभूतयः॥५२॥ ॥

मनसैवानुद्रष्टव्यमिति श्रुतिविरोधः। परिपक्वेन मनसा दृश्यत इत्येवं तदर्थात् निषेधस्य तु परिपक्वे
न मनसा दृश्यत इत्येवं तदर्थात् निषेधस्य तु अपरिपक्वमनोविषयत्वादिति दिक्॥५०॥ केवल
स्य भावः कैवल्यं निष्प्रपंचमात्मस्वरूपं तत् ज्ञायते अनेनेति कैवल्यं ज्ञानं अद्वैतात्मतत्त्वज्ञानसाधनमि
त्यर्थः॥५१॥ ततः करणात् ये ये पदार्था दृश्यंते दृग्विषयाः ते सर्वे मद्विभूतयः यच्च यद्बलात्तत्तद्बोध्या
हार्यः॥५२॥ ॥

उक्तमेवार्थं कैवल्योपनिषत्संवादेन द्रढयति। मय्येवेत्यादिभिः। अध्यायपर्यंतं कैवल्योपनिष
देकतिपयवर्णव्यत्यासेन पठ्यते॥५३॥ अणोरिति। अणोरप्यतिशयेनाणुरणीयान्॥ औपा
धिकपरिच्छेदवानित्यर्थः। महानिति स्वरूपतो ऽपरिच्छिन्नः। विश्वं सर्वाधिष्ठानत्वात्तत्तादात्म्या
पन्नः। विश्वइ इति प्रपंचस्य मिथ्यात्वात्कल्पेपरहितः। नह्यारोपितेनारूपेणाधिष्ठानं विकंपदि
कस्वच्छत्वमपैतीति भावः। पुरातनः पुरुषईशो हिरण्मयइत्यादिशब्दैः सूत्रात्मपनिषत्सु बहुधा व्य

॥मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं। मयि सर्वं प्रलयं याति तद्ब्रह्मास्म्यहमव्ययं॥
॥५३॥ अणोरणीयानहमेव तद्वन्महानहं विश्वमहं विशुद्धः॥ पुरातनोहं पुरुषोहमीशो
॥हिरण्मयोहं शिवरूपमस्मि॥५४॥ अपाणिपादोहमचिंत्यशक्तिः पश्याम्यचक्षुः स शृणोम्यकर्णः॥

वक्ष्यमाणेन अहमेवास्मीति संबंधः॥५४॥ अपाणीति। लोके पाणिपादविकलः सर्वकार्येष्वशक्त इति
जीवानां स्थितिः अहं तु पाणी च पादौ इदं अविद्यमानं पाणिपादं यस्य तथाभूतः अपि अचिंत्यशक्तिः ५४
तथा चक्षुषा रहितः सन्नपि पश्यामि चक्षुर्ग्राह्यसकलपदार्थान् इदं श्रवणकर्णरहितः सन्नपि शृणोमि स
कलशब्दान् साक्षात्कारवानस्मि करणं विना कथं कार्यमित्याशंक्याह॥ अहमिति विविक्तं अनावृतं

रूपं यस्य तथाभूतः तथा च स्वरूपज्ञानेनैव सर्वं दृष्ट्वा इदं न तु वृत्तिबलेन चक्षुःश्रोत्रादिवृत्ता
वेव हेतुः सा च तत्त्वितत्त्व्यावरणरहितत्वान्मयि नापेक्षिते इति भावः॥५५॥ वेदैरिति वेदैर्वेद्यः उपनि
षज्जन्यवृत्तिविषयः इत्यर्थः। नचास्तिवेत्ता ममेत्यव्यवहितपूर्वोक्तं तु फलव्याप्तिविरहपरं तत्र
हेतुस्तथैव चित्सदाहमिति चिद्रूपत्वं प्रागुक्तं वृत्तिविषयता तु न निवार्यते। अत एव शास्त्र
योनित्वाधिकरणे द्वितीयवर्णकं न विरुध्यते उक्तं च वार्तिककृद्भिः फलव्याप्यत्वमेवास्य

॥अहं विजानामि विविक्तरूपो न चास्ति वेत्ता मम चित्सदाहं॥५५॥ वेदैरनेकैरह
॥मेव वेद्यो वेदांतकृद्वेदविदेव चाहं॥ न पुण्यपापे मम नास्ति नाशो न जन्म दे
॥हेंद्रियबुद्धिरस्ति॥५६॥

शास्त्रकृद्भिर्निवार्यते। ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्यत्वमिष्यत इति इह च अहं वेद्य इति व
क्तव्ये अहमेवत्येवकारेण अखंडार्थतास्फुरीक्रियते युक्तं चैतत् अन्वयव्यतिरेकाभ्यां निवर्तनाय
ज्ञानकार्यगोचरत्वेव ज्ञाननिवर्त्यकलादिनिदि कुनास्तिनाश इति मम नेति शेषः जन्मदेहेंद्रिय
सहिताबुद्धिः जन्मदेहेंद्रियबुद्धिः सापि नास्तीति पाठः तत्र वाक्यद्वयं बुध्यंतानां च समाहारद्वंद्वः तथा

न मे जन्मनाशो देहेंद्रियबुद्धिश्चनास्ति॥

त्व

ननूमीत्यादिनामिथ्यात्वं घटकीनतः प्रपंचाभावावबोध्यते गुहायामज्ञाने शेते इति गुहाशयं जीवान्
प्रत्यावृतमित्यर्थः॥५७॥ समस्तेति। साक्षीत्याख्यायमानः साक्षी। तं आख्यातमेवंतात्कर्मणि। श्रौणादिक
इत्रुसाक्षिणमितिफलितोर्थः सदसद्भ्यां विहीनं॥५८॥ सएवनान्य इति कर्ममात्रासक्तोवासगुणमा
त्रासक्तोवानमोक्षभागित्यर्थः नचैवंकर्मणांवैयर्थ्यं विविदिषासंपादनद्वारा सार्थक्यात्॥ सगुणोपा

ष्ट१ च ॥नन्तूमिशपोनवह्निरस्तिनचानिलोमेस्तिनमेनभश्च॥ एवंविदित्वापरमात्मरूपं गुहा
॥शयंनिष्कलमद्वितीयं॥५७॥ समस्तसाक्षिंसदसद्विहीनंप्रयातिशुद्धंपरमात्मरूपं॥ एवं
॥मांतत्वतोवेत्तियस्तुराममहामते॥ एवंनान्योलोकेषुकैवल्यफलमश्नुते॥५९॥ ॥इति
॥श्रीपद्मपुराणे शिवगी॰ विभूतियोगोनामषष्ठोध्यायः॥६॥ ॥श्री॥ ॥छ॥

सनानामपिपरंपरयैवोपयोगात्तदुक्तं। निर्विघ्नोपंपरंब्रह्मसाक्षात्कर्तुमनीश्वराः येमंदास्तेनुकंप्यं
तेसविशेषनिरूपणैरितिकैवल्यफलमितिकैवल्यमेवफलंकैवल्यमितिकर्मधारयः॥ ॥इति ५५
श्रीशिवगीतार्थव्याख्यायांविभूतियोगोनामषष्ठोध्यायः॥ ॥६॥ ॥श्री॥ ॥छ॥

पूर्वाध्याये अहंसर्वाधिष्ठानमितिसप्रपंचभगवतोक्तं। तत्र अहंशब्दप्रयोगबलादहंकाराद्यवच्छि
न्नस्याधिष्ठानत्वेनेतिप्रतीयते तच्चासंगतमित्याक्षिपति द्वाभ्यां श्लोकाभ्यां भगवन्निति॥१॥ परिच्छिन्नेति।
परिच्छिन्नंपरिमाणंयस्यतथाभूतेउपसर्गस्यघञ्यमनुष्येबहुलमित्यनेन दीर्घः। भगवतोदेहेसर्वभू
तानामुत्पत्तिःस्थितिःप्रलयोवाकथंब्रह्मांडाद्युचितस्यावकाशस्यपरिच्छिन्नदेहमध्येअभावात्कथं
स्थितिःनहिघटमध्येपर्वतादयोमांतिइतिभावः॥२॥ स्वस्वाधिकारैःसंबद्धासुराःपरिच्छिन्नपरिमाणे

॥श्रीरामोवाच॥ भगवन्यन्मयापृष्टंतत्तथैवस्थितंविभो॥ अत्रोत्तरंमयालब्धंत्वत्तोनै
॥वमहेश्वर॥१॥ परीच्छिन्नपरिमाणेदेहेभगवतस्तव॥ उत्पत्तिःपंचभूतानांस्थितिर्वा
॥विलयःकथं॥२॥ स्वस्वाधिकारसंबद्धाःकथनामस्थिताःसुराः॥

तवदेहेकथंसंगच्छतइतिभावः ननुअहंकाराद्यवच्छिन्नस्यजगदधिष्ठानतांनब्रूमः। किंतुअवच्छिन्न
चिन्मात्रस्यअहंशब्दप्रयोगोपिलक्षणयाचिन्मात्रपरः अतोनोक्तदोषइत्याशंक्यतत्राप्यनुपप
त्तिरेवेत्याह॥ तेसर्वेइतिदेवाःसर्वेत्वंतथाचतुर्दशभुवनानित्वमितिकथं॥ नह्येकस्यउत्पत्ति
विनाशरहितस्यचिद्रूपस्यनववद्भूतिरुत्पत्तिविनाशवद्भिर्जडैःसहअभेदःसंभवतिविरुद्धध

मोध्यस्तत्वादिति भावः ॥३॥ त्वत्त इति मे ममत्वत्तः श्रुत्वापि श्रवणानंतरमपि अत्रार्थे संदेहो भ्रांतो
अप्रत्यायितं असंभावनाशून्यनिश्चयमप्रापितं यस्य तथा भूतस्य मे संशयं त्वमेव छेत्तुमर्ह
सि जगदंतर्यामित्वात् भगवतैव तत्पयाबोधनीयोऽहं अत्यंतगहनानां न्यायानां गुरूपदेशं विना
दुरधिगमत्वादिति भावः ॥४॥ परिच्छिन्नस्य सर्वाधिष्ठानत्वं यद्यपि नास्ति ज्ञानं समनंतथापि शंकितुराश

॥ते सर्वे त्वं कथं देव भुवनानि चतुर्दश। त्वत्तः श्रुत्वापि देवात्र संदेहो मे महानभूत् ॥ अप्रत्या
॥यितचित्तस्य संशयं छेत्तुमर्हसि ॥४॥ ॥श्रीभगवानुवाच॥ ॥वटबीजे सुसूक्ष्मेपि महावट
॥रुर्यथा ॥४॥ सर्वदास्त्यन्यथा वृक्षः कुतआयाति तद्वद ॥५॥ तद्वन्ममतनौ राम भूतानामागतिर्लयः ॥६॥

यमनुरुध्य तदपि समर्थयितुं दृष्टांतमाह वटेति। सुतरां सूक्ष्मेपि वटस्य बीजे सर्वदा महान् वटतरु
रास्ते यथा। तद्वन्मम तनौ भूतानां आगतिर्लयश्चेत्यन्वयः। ननु दृष्टांतोप्यसंप्रतिपन्नः प्रागसत एव वृक्ष
स्य सहकारिसमवहिताद्बीजादुत्पत्तेः। अत एव गौतमकणादादिग्रंथे तथैवोत्पत्यादिनिमित्याशंक्याह। ५९
अन्यथेति। अन्यथा स्वस्वरूपेणानपगमे वृक्षः कुतो हेतोरायाति तद्वदेति संबंधः। अयं भावः असतो
ऽप्युत्पद्येत। अविशेषात्। प्रागभावप्रतियोगित्वमेव घटादेर्विशेष इति चेत्। घटस्यासत्वेन स्वरूपासिद्धेः

प्रतियोगितायाअप्यसत्वात्॥ अखंडोपाधिरूपा प्रतियोगितेति चेत्। अखंडोपाधेरभ्युपगमे जा
तिविलयापत्तेः समवायस्यापि तत्रापाद्यत्वात्। व्याप्त्यादिनिर्वचनक्लेशवैयर्थ्यापत्तेश्च। किंच अ
खंडप्रतियोगिताबलेनैव घट इव शशशृंगादिकमप्युत्पद्येत। शशशृंगे सा नास्तीति चेत्। त
र्हि घटेस्ति। अमिति चेन्न हि तर्हि प्रागुत्पत्तेरपि घटः। नच प्राक्सत्वे कारणव्यापारवैयर्थ्यं स्वरूपा
वस्थायास्तदधीनत्वात्। नच तस्यामपि सत्वासत्वविकल्पः स्वाप्रस्वशिरोभक्षणादेरिव अघटि

॥महासैंधवपिंडोपि जले हि मो विलीयते। न दृश्यते पुनः पाकात् तत आयाति पूर्ववत् ॥७॥
॥प्रातःप्रातर्यथालोको जायते सूर्यमंडलात्। एवमस्माज्जगत्सर्वं जायतेस्मिन्विलीयते। मय्ये
॥वसकलं राम तद्विजानीहि सुव्रत ॥८॥

तघटनापटीयस्या मायायास्तदधीनत्वात्। न च तस्यामपि सत्वासत्वविकल्पः स्वाप्रस्वशिरोभक्षणादेरि
व अघटितघटनापटीयस्या मायाया वा निर्वचनवादेतत्समाधानात्। नचैवं स्वरूपवैफल्यं कृतहाना
कृताभ्यागमादिदोषपरिहारार्थं स एव तु कर्मानुस्मृतिशब्दविधिभ्य इत्याद्यधिकरणैस्साधनात्
विस्पष्टं चैतच्छीर्षग्रंथेष्विति गौरवभयादुपरम्यते ॥६॥ ननूक्तरीत्या कुलालादिव्यापारात्पूर्वमपि घटा

दिव्यापारात्पूर्वमपि घटादेः सत्वात्तदुपलंभः कुतो नेत्याशंकायां सूक्ष्मत्वादेव विद्यमानस्याप
नुपलंभ इति समाधानमभिप्रेत्य सतोप्यनुपलंभे दृष्टांतमाह। महासैंधवेति। महानपि सैंधव
पीडः जले क्षिप्तः सन् विलीयते सूक्ष्मावस्थापन्नो न चक्षुषा दृश्यते ततः पुनः पाकात् स्थू
लावस्थापन्नः सन् आयाति लक्ष्यते। तद्वत्सर्वं कार्यमित्यर्थः। न च दृष्टांतेप्य संप्रतिपत्तिः। वि

॥श्रीराम उ०॥ कथितेपि महाबाहो यदि गूढस्य यथा दिशि। निवर्त्तते भ्रमो नैव तद्दृश्यम
॥करोमि किं॥९॥ श्रीभगवानुवाच॥ मयि सर्वं यथा राम जगदेतच्चराचरं॥ वर्त्तते तद्दर्श
॥यामि न द्रष्टुं त्वमलं भवान्॥१०॥

लयदृष्टयामपि जलेन वरुणरसोपलंभेनापलापायोगात्॥९॥ प्रातः प्रातरिति। सूर्यमंडलाद
था आलोको जायते। एवं मत्तो जगत्सर्वं जायते तदिदं सकलं मय्येव अस्ति विलीयते च इति भा
नीहि॥८॥ ननूक्तदृष्टांतो विषमः बीजमध्ये हि सूक्ष्मो वृक्षस्तिष्ठति न तु स्थूलः कार्यद्वयोपि त्वयि ५७
तु स्थूलप्रपंचास्थितिरनुपपन्नैव। किं च एकस्य बहुभिः सह कथमभेद इति पूर्वोक्तमदीय
प्रश्ने उत्तरानलब्धमेव यदि तु गुराविसंधिना जगत्तासर्वत्रास्मिन्नर्थे स्पष्टमुत्तरं न दीये

तत्तदासं हि प्यकथितमपि मम संशयानिवृत्ता च समर्थमेवैत्याह श्रीराम इति। कथितेपीति। दिशो
ह्रायथा कथितेपि दोषप्राबल्यादनुवर्त्तते तद्वन्मदीयोपि भ्रम इत्यर्थः॥९॥ यद्यपि पूर्वं ब्रह्मैव स
र्वाधिष्ठानं न तु लीलाविग्रहविशिष्टं अतो नोक्तदोष इति समाधानं शक्यते एवं तथापि स्वात्मप्रप
चमिव परिच्छिन्नविग्रहांतर्गतप्रपंचदर्शयितामापि कतां स्फुरीकरिष्यामि अविद्यकृतां दात्मं चक्षु
त्वा दर्शयिष्यामि। नेन द्वितीयप्रश्ने प्युत्तरं दत्तं भविष्यतीत्याशयेन श्रीभगवानाह मयीत्यादि दर्शयि

॥दिव्यं चक्षुः प्रदास्यामि तुभ्यं दशरथात्मज। तेन पश्य मयि यत्त्वं मामकं तेजोमंडलं ध्रुवं॥ शि
॥न चर्मचक्षुषा द्रष्टुं शक्यते मामकं महः। नरेण वासुरेणापि तन्ममानुग्रहं विना॥१२॥
॥सूत उवाच॥ इत्युक्त्वा प्रददौ तस्मै दिव्यं चक्षुर्महेश्वरः। अथादर्शयदेतस्मै वक्त्रं पातालसंनिभं॥१३॥

यामि वर्त्तमानसामीप्ये वर्त्तमानवदेतिलट्॥१०॥ दिव्यं चक्षुरिति। मायिकप्रपंचविशेषदर्शनानुकू
लं सामर्थ्यमित्यर्थः॥११॥ न द्रष्टुं यद्यपि मामकं महः प्रपंचविशेषविशिष्टं स्वरूपं ममा
नुग्रहं विना द्रष्टुं न शक्यते॥१२॥ विह्वदिति। रामो अतिभीमं वक्त्रं ददर्श यद्वहं पश्यतामन्येषाम
पि भयंकरं यथा च वनितथा अवनिगतः॥१४॥ तत्र वक्त्रे अंतर्ब्रह्मांडकोटयः ज्वलंती निर्जलाः ॥१॥

समाकुलाश्चटकाकल्लविकाइवविकाशोनुमुखाद्दृश्यंतेइत्यन्वयः॥१६॥तेसुराःपरमेश्वरस्यसमंतात्
पूर्वंदृष्टाःदेवाअपि॥१७॥प्रजनिब्रह्मांडएवंमेरुमंदरसूर्यचंद्रादिकंसर्वंदृष्ट्वात्वयाविष्टःसन्प्रणनाम

॥विद्युत्कोटिप्रभादीप्तमतिंत्रीमंत्रयावहं॥तद्दृष्टेवत्वयाद्रामोजानुस्थामवनीगतः॥१४॥
॥प्रणम्यदंडवत्तस्मैतुष्टावचपुनःपुनः॥अथोत्थायमहावीरोयावदेवप्रपश्यति॥
९ ॥चक्रंपुरनिस्तत्रअंतर्ब्रह्मांडकोटयः॥१५॥चटकाइवलक्ष्यंतेज्वलज्ज्वालासमाकुलाः
॥मेरुमंदरविंध्यादिगिरयःसप्तसागराः॥१६॥दृश्यंतेचंद्रसूर्याद्याःपंचभूतानितेसु
॥राः॥अरण्यानिमहान्नागभुवनानिचतुर्दश॥१७॥प्रतिब्रह्मांडमेवंतुदृष्ट्वादशरथात्म
॥जः॥सुरासुराणांसंग्रामान्तत्रपूर्वापरानपि॥१८॥विष्णोर्दशावतारांश्चतत्कर्तव्यानि
॥चद्विजाः॥पराजयांश्चदेवानांपुरदाहंमहेशितुः॥१९॥उत्पद्यमानानुत्पन्नान्सर्वानपि
॥विनश्यतः॥दृष्ट्वारामोत्वयाविष्टःप्रणनाममुहुर्मुहुः॥२०॥तत्पन्नतत्त्वज्ञानोपिवत्सव
॥नृपनंदनः॥अथोपनिषदांसारैरर्थैस्तुष्टावशंकरं॥२१॥
तिवक्ष्यमाणेनान्वयः॥पूर्वापरान्अतीतानागतान्॥१८॥तत्कर्तव्यानीतितंचतेष्ववतारेषुच॥वक्तव्या
निरावणवधादीनिदेवानांपराजयमितिदैत्येभ्यइतिशेषः॥१९॥२०॥उत्पन्नेति॥दृश्यमानस्यासंघटितरूप

देवेति॥त्राहित्रायस्वआर्षरूपंयद्वात्रायतेइतिमंत्राः॥रक्षकःसएवाचरात्राहिरक्षितत्वादिधर्म
णमाविद्यकत्वेनविषमसत्त्वाआचरक्विपात्रस्यते॥अथाअरुणइवस्फटिकोदृश्यतइत्यादौइव
शब्देनएवंचकर्तरिक्विबंतारक्विपिपरस्मैपदाद्यनुपपत्तिरपिनेतिदिक्॥२२॥त्वत्तोहिंसितिविश्वदेवे

॥देवप्रपन्नार्तिहरप्रसीदप्रसीदविश्वेश्वरविश्ववंद्य॥प्रसीदगंगाधरचंद्रमौलेमांत्राहि
२ देव ॥संसारभयादनाथं॥२२॥त्वत्तोहिजातंजगदेतदीशत्वय्येवभूतानिवसंतिनित्यं॥त्वय्येवशं
॥भोविलयंप्रयांतिभूमौयथावृक्षलतादयोपि॥२३॥ब्रह्मेंद्ररुद्राश्चमरुद्गणाश्चगंधर्वयक्षाःसु
॥रसिद्धसंघाः॥गंगादिनद्योवरुणालयाश्चवसंतितेशूलिन्नवक्रमंति॥२४॥ १ से
उपादानत्वंकर्तृत्वंपंचम्यर्थः॥जनिकर्तुःप्रकृतिरिति॥सत्रेप्रकृतिशब्दोहेतुमात्रलक्षकइतिशाब्दिकसिद्धां
तात्॥तत्त्वयस्यचेत्संभवात्॥२३॥ब्रह्मेंद्रेति॥हेशूलिन्ब्रह्मादयःसर्वेतववक्त्रंआअंतिकस्यसमीपेम
ध्यइतियावत्॥अंतिशब्दोतीकपर्यायः॥प्रसिद्धतरोवेदेयदंतिनद्दूरकइत्यादौतद्योगेयद्यपिषष्ठी
पंचम्याचपेक्षितेदूरांतार्थैःषष्ठ्यन्यतरस्यामितिपाणिनीयसूत्रात्॥तथाप्यापोविशिष्टमत्स्यः॥यद्वा
क्रेसंतिइतिसप्तम्यर्थेदेशकालाध्वगंतव्याःकर्मसंज्ञाःकर्मणामितिकर्मत्वेनद्वितीया॥२४॥ ॥

ननु जगदुपादानत्वे सविकारतापत्तिरित्याशंक्याह। त्वन्माययेति। जनः तत्सर्वं प्रपंचजातं त्वं
त्यापश्यति शुक्तौ रूप्यं यथेति संबंधः। ननु यदि मयि प्रपंचप्रतीतिर्भ्रमरूपा तर्हि नाहं तदुपाद
नमित्यागतं। अन्यत्र सतोन्यत्र ज्ञानं हि भ्रम इत्याशंक्याह। त्वन्मायया कल्पितमिति। त्वय्येव दृश्यत्वमु
पैतीति च। अयं भावः भ्रमो नान्यथाख्यातिरूपः देशांतरस्थस्यासन्निकृष्टत्वेनेंद्रियग्राह्यत्वासंभवा

॥त्वन्मायया कल्पितमिंदुमौले त्वय्येव दृश्यत्वमुपैति विश्वं॥ भ्रांत्या जनः पश्यति
॥सर्वमेतच्छुक्तौ यथा रूप्यमहिं च रज्जौ॥२५॥

३ गा त्॥ वैशिष्ट्यस्यात्यंतासत्वे ज्ञानायोगाच्च तथात्वे वा रजतस्याप्यसतो ज्ञानापत्त्या सत्ख्यातिप्रवे
शापत्तेः अन्यथाख्यातावसत्ख्यातौ चापरोक्षत्वानुपपत्तिसाम्याच्च। तस्मादिहैवाविद्यया कल्पि ५९
तमित्यस्फुरेयमिति॥२५॥

परमते परोक्षमानानुपपत्तिं ध्वनयन् स्वसिद्धांते परोक्षतां समर्थयते तेजोभिरिति॥ समस्तं ज
गत् शुक्तिरूप्यरज्जुसर्पादिवियदादि च तेजोभिः शुद्धाद्युपहितचैतन्यैः स्वरूपचैतन्येन चा
पूर्य तादात्म्येनावस्थितः प्रकाशमानः सन् प्रकाशत इति प्रकाशं कुरुषे। अनावृतसाक्षिता
त्म्यं ह्यपरोक्षत्वं तच्च देशांतरीयस्य तुच्छस्य च न संभवतीति भावः। तदेवं वैशेषिकादिमतसिद्धा

॥तेजोभिरापूर्य जगत्समस्तं प्रकाशमानः कुरुषे प्रकाशं॥ विना प्रकाशं तव देवदेव
॥देव न दृश्यते विश्वमिदं क्षणेन॥२६॥

अन्यथाख्यातिर्बाह्यसंमता असत्ख्यातिश्च निरस्ता अस्तु तर्हि दिगंबरमतसिद्धा सन्ख्या
तिरेवेत्याशंक्याह॥ विनेति। इदं विश्वं क्षणेन न दृश्यते अधिष्ठानसाक्षात्कारेण शीघ्रतरं नश्यतीत्य
र्थः। तथा च ज्ञाननिवर्त्यत्वान्मिथ्यात्वमिति भावः। अस्तु तर्हि अधिष्ठानमपि मिथ्यैवेत्याशंक्याह
तव प्रकाशं विनेति। तव स्वरूपभूतः प्रकाश एव परं न बाध्यते निःसाक्षिकस्य बाधस्यासंभवेन स
र्वबाधावधित्वादिति भावः॥२६॥

परिदृश्यमानस्य प्रपंचस्य मिथ्यात्वं युक्त्यंतरेणापि समर्थयते अल्पेति। अल्पश्चासावाश्रयश्च अ
ल्पाश्रयः सः स्वापेक्षया वृहंतमर्थं न धत्त एव अत्र दृष्टांतः एको अणुर्विंध्यशैलं न दधत इति ननु किं
तत्राह॥ एतज्जगत्त्वदृक्मात्रे अस्ति तस्मान्माययैव कल्पितं न तु वास्तवमिति निश्चिनोमि निर्णयामि स्व
प्नस्थस्येव दृति भावः। तथा च भगवता बादरायणेन स्वप्नसूत्रैः प्रातिभासिकत्वे देशकालाद्यनौचि
त्यं साधकतया सूचितं॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति सूत्रार्थः॥ स्वप्नस्य हि

॥अल्पाश्रयो नैव वृहंतमर्थं धत्ते णुरेको न हि विंध्यशैलं॥ त्वदृक्मात्रे ज
॥गदेतदस्ति त्वन्माययैवेति च निश्चिनोमि॥२७॥

मायामात्रमेव कुतः कार्त्स्न्येन साकल्येन अनभिव्यक्तं उचितदेशकालाद्यसंबद्धं स्वरूपं यस्या
स्तथात्वात्॥ न खलु निरुद्धनाडीमध्ये गिरिसमुद्रादीनां नामुचितो देशोस्ति न वा निशीथे सूर्यग्र ६०
हणाद्युचितः कालोस्तीति॥२७॥

स्यादेतत् प्रपंचस्य मिथ्यात्वे कार्यदृश्यमानस्यात्तथा च बंधनिवृत्त्यर्थं शास्त्रमथनारंभस्यादित्याशं
क्याह॥ रज्ज्वाविति यथा रज्जौ भुजंगो वस्तुतो न जायते नास्ति नाशं च न एति तथापि भयं ददाति ति
यदः तथा त्वन्मायया भ्रांतरूपं असद्विलक्षणरूपवत्। तथा च सति मायिकस्यापि भ्रांतित्वया
द्यर्थक्रियाकारितास्ति किमुत व्यावहारिकस्य प्रपंचस्य तस्मात्तदुच्छेदाय श्रवणादिसार्थकमे

॥रज्जौ भुजंगो न यदो यथैव न जायते नास्ति न चैति नाशं॥ त्व
॥न्मायया केवलमात्तरूपं तथैव विश्वं त्वयि नीलकंठ॥२८॥

वेति भावः। भ्रांतरूपमित्यनेन सद्विलक्षणस्य कथं कारणत्वेति शंकां व्यावर्तयति विद्यमा
नतामात्रेण तदुपपत्तेः उक्तं च खंडनकृद्भिः पूर्वसंबंधनियमे हेतुत्वे तुल्य एव नौ हेतुत्वबहि
र्भूतसत्वासत्वकथा वृथैवेति॥२८॥

ननु दृश्यस्य सर्वस्य मिथ्यात्वेन नीलकंठशब्देन संबोध्यमानविग्रहविशिष्टस्यापि मिथ्यात्वापत्तौ
तवविग्रहस्याध्यासकथमिहैव भूषेत्यादावादिनाशंक्यानुपलक्षितचिन्मात्राभिप्रायेणेदं ब्र
वीमित्याह विचार्यमाणे इति अविचारदशायां परं परिछिन्नस्याधिष्ठानत्वेनेति मम न मतः किं
तन्यदृशात परिछिन्नपरिमाणे देहेत्वकथं विभो इत्यादि प्रागप्राप्तं इदानीं तत्त्वतस्तु पाव

॥
॥विचार्यमाणे तव यच्छरीरमाधारभावं जगतामुपैति॥ तदप्य
॥वश्यं मदविद्यया वै परं चिदानंदमयो मतस्त्वं॥२९॥

त्वादित्युक्तं निरवैषमिति भावः। यदीदं तव शरीरं जगतामाधारमुपैति आधारतयोपलभ्यते तच्छरी
रमपि मम अविद्यैव त्वं पूर्णश्चिदानंदमयो मतः। तथा च पूर्णे त्वयि लीलाविग्रहः प्रपंचस्तयो ६१
राधाराधेयभावश्चेति सर्वं मध्यस्तं॥ अत एव पाणिपादो हमित्यादि पूर्वोक्तमपि संगच्छत इति भा
व॥२९॥

नवेदं परिछिन्नपरिमाणे इत्यादिनोपन्यस्ते प्रथमप्रश्ने उत्तरं लब्धमित्युक्तं इदानीं एकस्य वस्तु
नि भेदः कथमित्येवंरूपे द्वितीयप्रश्नेपि उत्तरं लब्धं मयेत्याह। पूजेति॥ हे पुरारे किंचिदेव॥ कि
मपि प्रपंचजातं त्वत्तो भिन्नं नास्ति अयं भावः दूरस्थवनस्य तो रेकवदविद्यकं वैकं मिथ्याभू
तमेव गृहीत्वा सर्वं ब्रह्मेति व्यवहारः न चैवमपि व्यावहारिकतया समानसत्ताकयोर्भेदा

॥पूजेष्टापूर्त्तादिफलं क्रियाणां भोक्तुं फलं यच्छसि शक्तमेव॥
॥मृषैतदेवं वचनं पुरारे त्वत्तोस्ति भिन्नं च न किंचिदेव॥३०॥

भेदयोरनुपपत्तिरेवेति वाच्यं॥ चंद्रप्रादेशिकत्वादेः प्रतिबिंबे अवच्छिन्नानवच्छिन्नाकाशादौ
चागत्या समानसत्ताकयोरभेदाभेदयोरप्युपगमात्॥ अस्तु वा कश्चिदाविद्यकोधर्म एतत्ता
त्त्वं परानुपेतसमवायादिस्थानापन्नः अस्तु वा भिन्नत्वे समना भिन्नसत्ताकत्वं सद्यथाप्यद्वैता

विरोधिन्यां प्रक्रियायामाग्रहान्नावान्यथा कर्त्तव्ये किंकारः यथा यथा त्र वेतुं सोक्षन्यतिः प्र
क्रियासाध्वीऽऽया सा वा न व स्थितेति ॥ नित्यं कर्मपि नास्त्येवेति तु निष्कर्षः ॥ तदुक्तं वाचस्पति
मिश्रैः नत्वन्नेदं ब्रूमः किं तु नेदं व्यासेधाम इति । इदमेव चोच्यते । बाधायां सामानाधिकरण्यमि
तीति दिक् ॥ तत्किं कर्मकांडादिकमिति मिथ्यार्थबोधिका । एवमेत्याह ॥ मृषेति । एतत् पूर्वार्द्धप्र
तिपादितार्थकं एवं तज्जातीयमन्यच्च वचनं मृषा इत्यन्वयः । तत् किं अप्रमाणमेव
नेत्याह ॥ शास्त्रमेवेति ॥ अवांतरतात्पर्यपर्यालोचनायां व्यवहारकालाबाध्यार्थबोध
कत्वेनमाह । तात्पर्यपर्यालोचनायां तु वेदैश्च सर्वैरहमेवेति वैकल्योपनीषत्प्रति
पादितरीत्या ब्रह्मपरत्वेन प्रमाणमेवेत्यर्थः । एतद्वचनमित्यत्र एतदच्छब्देन निर्दि
ष्टमर्थमाह ॥ पूजेति ॥ पूजा देवपूजा इष्टं यागः पूर्त्तं तडागादि ॥ तथा क्रियाणां फलं स्व
दि ॥ तच्चतो कुर्वज्वनः ॥ फलं त्वेयच्च सिफलमत उपपत्तेरिति न्यायात् ॥ तमेव वेनमिं दः ६२
प्रजयापशुभिर्देवस्तर्प्पयतीत्यादिश्रुतेरिति भावः ॥ ३० ॥ ॥

अत एव अविद्यावद्विषयकाणि शास्त्राणीत्याह ॥ अज्ञानेति ॥ अज्ञानेन मूढाः अत एव मननशीला
मुनयः मननस्योपलक्षणत्वात् तः करणमुद्युपायान् असंभावनादितिरस्कारायां श्रान्वेषवं
तः पुरुषाः पूजादिभिर्गिरिशस्तोषं भजतीति वदंति । यद्वा अज्ञानं जडाः जडवंतः संतो वदंति ।
अविद्यादशामाश्रित्य प्रतिपादयंतीत्यर्थः । तच्च मिथ्या तोषस्यमाह ॥ वृत्तिरूपत्वात् ॥ न ह्यमू
र्तस्य सिशादयः वास्तवाः संभवंतीति भावः ॥ ३१ ॥ अस्यैव प्रपंचः ॥ किंचिदिति ॥ दलं तु लासि बि

॥ अज्ञानमूढा मुनयो वदंति पूजोपचारादिबहिः क्रियाभिः ॥ तोषं गिरीशो भजती
॥ ति मिथ्या कुतः स्त्वमूर्त्तस्य तु भोगलिप्सा ॥ ३१ ॥ किंचिद्दलं वा चुलुकोदकं वा य
॥ स्त्वं महेश प्रतिगृह्य दत्से । त्रैलोक्यलक्ष्मीमपि यज्जनेभ्यः सर्वं त्वविद्याकृतमेव मन्ये ॥ ३२ ॥

ल्वादिपत्रं । यत्किंचिदिति वन्नकेपहृतं प्रतिगृह्य स्वीकृत्य जनेभ्यो नकेभ्यः त्रैलोक्यलक्ष्मीमपिद
से ददासीति यत्तत्सर्वं पत्राद्युपहारप्रतिग्रहः त्रैलोक्यं नदानं चेति सर्वं अविद्यकमेव मन्ये नि
श्चिनोमि । अविद्याकृतमित्यनेन पूर्वश्लोकस्तुस्य मिथ्याशब्दस्यानिर्वचनीयतापरकत्वपरतेति स्फुटिकृतं ॥ ३२ ॥

व्याप्तोषीति। एकः पुराणः पुरुषः त्वं विश्वं व्याप्तोसि अधिष्ठानत्वेन तादात्म्यापन्नः सन् जगत् गच्छसि।
तस्मिन् विश्वस्मिन् नष्टेपि तव हानिर्नास्ति॥ वास्तवे अनेन द्वैतं स्यात्। कल्पितत्वात् तस्मिन् अनाद्यं दोषः
रजतादि बाधो विशुद्धाधारस्थानदर्शनादिति भावः। घटेति। नष्ट इत्यनुसंबंधिनाशेपि अपरसंबंधि
नोन हानिरस्मिंस्तं शोदृष्टांत इति बोध्यं। ननु कर्तृत्वा वियदादेर्मिथ्यात्वेपि जीवानां बहुत्वान्न द्वैतनस्
॥व्याप्तोषि सर्वा विदिशो दिशश्च त्वं विश्वमेकः पुरुषः पुराणः॥ नष्टेपि तस्मिंस्तव नास्ति
॥हानिः घटे विनष्टे नभसो यथैव॥३३॥ यथैकमाकाशगमर्कबिंबं क्षुद्रेषु पात्रेषु जला
॥न्वितेषु॥ भजत्यनेकप्रतिबिंबतां वै तथात्ममंतःकरणेषु देव॥३४॥
तिः स्यादेव न हि वियदादिवज्जीवोपि मिथ्येति युक्तं। बंधमोक्षयोर्वैयधिकरण्यापत्तेरित्याशंक्याह। य
थेति। देहे वत्वं अंतःकरणेषु तथा अनेकप्रतिबिंबभावं भजसि तथेति कथं यथा आकाशगं एकमे ६३
वार्कबिंबं क्षुद्रेषु जलान्वितेषु पात्रेषु अनेकप्रतिबिंबभावं भजति अनेन यथा यं ज्योतिरात्मेति श्रु
तिरर्थ उपनिबद्धः तथा च जीवानां पारमार्थिकत्वेपि भेदस्याध्यस्तत्वात् द्वैतहानिरिति भावः ३४॥ ॥
नन्वेवं परमार्थतः सच्चिदानंदरूपत्वं मिथ्याभूतशरीरवत्वं च जीवब्रह्मणोरविशिष्टं तथा च संस
रितात् भगवतोपि स्यादित्याशंक्याह। सुसर्जनेति विश्वस्य सृष्टिस्थितिविलयेषु सत्स्वपि तवायुक्तं
कार्यं तव किंचिदस्तीति नास्ति। अनावृतस्वरूपत्वेन पूर्णानंदस्य सर्वदा प्राप्तत्वात्। यद्यप्येवं तथापि
अनादिभिः प्रवाहादिभिर्निर्दिष्टानां जीवानामदृष्टैः सहकारैः भूतैः स्वप्नवत् सर्गादीनातनोषि त
॥सुसर्जनेवाप्यवने विनाशे विश्वस्य किंचित्तव नास्ति कार्यम्॥
॥अनादिनिर्दिष्टानामदृष्टैस्तथापि तत् स्वप्नवदातनोषि॥३५॥
था च सत्त्वं वैषम्यनैर्घृण्येन सापेक्षत्वात्तथा हि दर्शयतीति। एवं चावरणतदभावाभ्यां वैलक्षण्यं
याधिक्यात्मत्वस्य प्रतिबिंबमुख इव आवरणस्यापि जीवेष्वेव व्यवस्थितत्वादिति भावः॥३५॥ ॥
व१

ननुस्थूलशरीरस्यैव प्रमातृत्व कर्तृत्वादिकमिति लोकायताः आऽः अहंकारास्य सूक्ष्मदेहस्य प्र
मातृत्वादिति सांख्याः तदुभयं विहाय चैतन्ये बंधान्वयः किमर्थं स्वीकर्तव्य इत्याशंक्याह। जडेति। दे
शांशो स्थूलस्य सूक्ष्मस्य वा देहस्य परिणामरूपा चिर्हि जडस्य परिणामरूपा सजडैव स्यान्ततः किं
तत्राह। अंशं विना नास्तीति अतनीति अः आत्मा अतसातत्यगमने। इप्रत्ययः यद्वा अयते प्रकाशते इ

॥स्थूलस्य सूक्ष्मस्य जडाजडस्य देहस्य शांशो न न चिदंविनास्ति॥ अत
॥स्त्वदारोपणमात्मनो निष्कृतिः पुरा गौरे सुखदुःखयोः सदा॥ ३६॥

तिअः साक्षीनअयगौनो चितु। ननु किं शुद्धकृष्टसंगात् तं विनाअस्तिनात्र यं भावः। जडपरिणामो ज
डःस्यात्। सच स्वप्रकाशात्मचैतन्यसंबंधादेव तासनइत्यन्वपेयं। संबंधश्चाध्यासिक एवेति सिद्ध ६४
श्चैतन्ये विकृत्वादिसंबंधः न च जन्यज्ञानमेव स्वप्रकाशं इति यत्कं वक्तुनास्वप्रकाशत्वे गौरवेणसु
षुप्त्यनुसंधानबलसिद्धस्य एकस्यैव स्वप्रकाशत्वकल्पनात्॥ तस्यैव च आत्मत्वात्॥ न चायं केवलस्त
र्क एव किंतु एव।

दुष्टश्चाश्रुतिरपि चैतन्ये संबंधं दर्शयतीत्याह। अत इति अगऊक्तकान्निर्णीततात्पर्याश्रु
तिः॥ स्वप्ने स जीवः सुखदुःखभोक्ता केपि कैवल्योपनिषत्प्रभृतिका सुखदुःखयोः त्वदारोपणं इति
विंबीभूतेत्वय्यारोपं सदा यावद्विघं आतनोति। उत्तरमीमांसायां कर्ता शास्त्रार्थवत्वादित्य
धिकरणमपीहानुसंधेयं॥ ३६॥ सच्चिदंशाधौ हंस इव तस्मै लीलाविग्रहस्य कर्पूरगौरत्वा

॥नमः सच्चिदंशाधिहंसाय तुभ्यं नमः कालकंठाय कालात्मकाय॥ नमस्ते समस्ताय सं
॥हारकर्त्रे नमस्ते मृषा चित्तवृत्त्यैकभोक्त्रे॥ ३७॥ एवं प्रणम्य विश्वेशं पुरतः प्रांजलिस्थितः॥
॥विस्मितः परमेशानं जगदे रघुनंदनः॥ ३८॥ उपसंहर विश्वात्मन् विश्वरूपमिदं तव॥
॥प्रतीतं जगदैकात्म्यं शंभो भवदनुग्रहात्॥ ३९॥

हंसत्वेनोत्केदाम्रषाभूतानां चित्तवृत्तीनां एकस्मै असाधारणाय भोक्त्रे। सुखदुःखादि निखिलम
नोवृत्तिसाक्षिणे इत्यर्थः॥ ३७॥ पुरत इति॥ संनिधानादीश्वरस्यैव पुरतः स्थितः जगदे जगाद आ
र्षं आत्मनेपदं॥ ३८॥

पश्येति। पूर्वार्द्धं भगवद्वाक्यं। उत्तरार्द्धमारभ्य सूतवाक्यं॥४०॥४१॥ व्याघ्रचर्मैवांबरं तस्य धरं अं
तरीयरूपेण धारकं उत्तरीयस्योत्तरश्लोके पृथगुपादानात्॥४२॥४३॥ मृगो हस्ते यस्येति विग्रहे आ
हिताग्न्यादित्वादाहृदंतस्य परासप्तमीति वा समर्थयितव्यं॥ यद्वा॥ मृगस्तद्धितो हस्तो यस्येति वा तद्धि
तप्याचसा हित्यभावेन तु मध्यमपदलोपी समासः प्रकृते तद्विधायकानामप्रवृत्तेः भाष्यकारैः

॥श्रीभगवान्॥ पश्य राम महाबाहो मत्तो नान्योस्ति किंचन॥ इत्युक्त्वैवोपसंजह्रे स्वदेहे
॥देवतादिकान्॥४०॥ मीलिताक्षः पुनर्हर्षाद्यावद्रामः प्रपश्यति॥ तावद्दृश गिरेः शृंगे
॥व्याघ्रचर्मोपरिस्थितं॥४१॥ ददर्श पंचवदनं नीलकंठं त्रिलोचनं॥ व्याघ्रचर्मांबरध
॥रं भूतिभूषितविग्रहं॥४२॥ फणिकंकणभूषाढ्यं नागयज्ञोपवीतिनं॥ व्याघ्रचर्मो
त्तरीयं च विद्युत्पिंगजटाधरं॥४३॥ एकाकिनं चंद्रमौलिं वरेण्यमभयप्रदं॥ चतुर्भुजं
खंडपरशुं मृगहस्तं जगत्पतिं॥४४॥ ६५

सर्वत्र तत्प्रत्याख्यानाच्चेति दिक् परशुमृगौ चोर्ध्वहस्तद्वये बोध्यौ॥ ॥तथा च द्वादशे वक्ष्यति प
राभ्यामूर्ध्वहस्ताभ्यां बिभ्राणं परशुं मृगमिति॥४४॥

॥४५॥४६॥ ॥इति श्रीशिवगीताव्याख्यायां सप्तमोध्यायः॥ ॥सप्तमाध्यायशेषे शंभुनोक्तं यद्य
त्प्रष्टुमिच्छसि। तत्सर्वं पृच्छ राम त्वमिति॥ तदेवोपजीव्य लोकान्प्रति विरक्त्यादिदार्ढ्याय भूतं शा
रीरादिभिः सारत्वं महेश्वरमुखेनैव प्रकटीकर्तुं स्वयं प्रागुक्तरीत्यानिर्णीततत्त्वोपि सन्नपि पृच्छति॥
पांचभौतिकेति। देहे लिंगशरीरे पांचभौतिकदेहशरीरस्य उत्पत्त्यादिकं कथं इदं वक्तुमर्हसि॥१॥ प्र

॥अथाज्ञया पुरस्तस्य प्रणम्योपविवेश सः॥४५॥ अथाह रामं देवेशो यद्यत्प्रष्टुमिहेच्छसि॥
॥तत्सर्वं पृच्छ राम त्वं मत्तो नान्योस्ति ते गुरुः॥४६॥ ॥इति पद्मपुराणे शिवगीतासु विश्व
॥रूपदर्शनं नाम सप्तमोध्यायः॥ ॥श्रीरामः॥ पांचभौतिकदेहस्य चोत्पत्तिर्विलयः स्थि
॥तिः॥ स्वरूपं च कथं देहे भगवन्वक्तुमर्हसि॥१॥ ॥श्रीभगवानुवाच॥ पंचभूतैः समारब्धो
॥देहोयं पांचभौतिकः॥ तत्र प्रधानं पृथिवी शेषाणां सहकारिता॥२॥

धानमिति॥ पृथिव्यंशस्य भूयस्त्वादिति भावः। शेषाणामिति। जलादीनामित्यर्थः॥ तदंशस्याल्पीय
स्त्वादिति भावः॥२॥ ॥ ॥ ॥ ॥ ॥

उद्भिन्नत्रिरमिति उद्भिदः वृक्षादिः॥ गेहे इत्यपथलक्षणः कप्रत्ययः॥३॥ प्रधानत्वादिति। धर्माधर्मादिसा
धनतया पुरुषार्थसाधनत्वेनानुहितत्वान्मनुष्यदेहस्येति भावः॥४॥ शुक्रशोणितात्मांसंभूता वृत्तिरु
त्पत्तिर्यस्य तथाभूत एव न तु तत्रिरपेक्षोत्पत्तिकोपि। जरायौ जातो जरायुजः॥५॥ स्त्रीणामिति।

॥जरायुजोंडजश्चैव स्वेदजश्चोद्भिदस्तथा॥ एवं चतुर्विधः प्रोक्तो देहोयं पांचभौ
॥तिकः॥२॥ मानसोपि परः प्रोक्तो देवानामेव स स्मृतः॥ तत्र वक्ष्ये प्रथमतः प्र
॥धानत्वाज्जरायुजं॥४॥ शुक्रशोणितसंभूतवृत्तिरेव जरायुजः॥५॥ स्त्रीणांग
॥र्भाशये शुक्रमृतुकाले विशेषतः॥ रजसा योषितो युक्तं तदेवस्याज्जरायुजं॥६॥

गर्भाशेनेस्मिन्निति गर्भाशयः पेशीविशेषो जरायुजशब्दवाच्यः गर्भाशयो जरायुजः स्यादित्यम ६६
रः। तस्मिन् यदा शुक्रं ऋतुकाले वक्ष्यमाणलक्षणे विशेषतो योषितो रजसा युक्तं तदेव जरायुजं
स्यात्॥६॥

बाहुल्यादिति रजोबाहुल्यात्। स्त्री शुक्राधिक्यात्तु पुमान् शुक्रशोणितयोः साम्ये तु नपुंसकं
भवति। षंढो भवतीत्यर्थः। न स्त्री पुंसौ नपुंसकं। नभ्राण्नपादिति साधुः तृतीयाप्रकृतिः षंढः क्ली
बः पंडो नपुंसकमित्यमरः। नपुंसको भवेदिति महाभाष्यप्रयोगात् पुल्लिंगपाठोपि साधुरे
व॥७॥ ऋतुस्नानेति॥ अत्रोत्तरार्थं पृथक्कृवाक्यं प्रथमतृतीयाद्वयोश्च संबंधः। तद्यथा षोडश

॥बाहुल्याद्रजसः स्त्री स्यात् शुक्राधिके पुमान् भवेत्॥ शुक्रशोणितयोः साम्ये जा
॥यते तु नपुंसकं॥७॥ ऋतुस्नाना भवेन्नारी चतुर्थदिवसे ततः॥ ऋतुकालस्तु निर्दि
॥ष्टश्चाषोडशदिनावधिः॥ तत्रायुग्मदिने स्त्री स्यात् पुमान् युग्मदिने भवेत्॥८॥

दिवेनोधितथाच रजोदर्शनादारभ्य षोडशदिवसात्मकः ऋतुकालो निर्दिष्टः शास्त्रकारैरिति शे
षः एवं स्थिते नारी चतुर्थदिवसे ऋतुस्नाता भवेत्॥ ततश्चतुर्थदिवसानंतरं ऋतौ अयुग्मदिने तरं ३
पंचमादौ स्त्री स्यात् युग्मदिने षष्ठादौ पुमान् भवेत्। यद्यपि रजोबाहुल्यादिकं स्त्रीत्वादौ हेतुतया
प्रागुक्तं तथापि अयुग्मायां रजोबाहुल्यं युग्मायां शुक्रबाहुल्यं चेति तथैव दविरोध एव यद॥

त्वयुग्मायां शुक्रबाहुल्येंतदा तु पुमान्भवति किंतु स्त्र्यात्मति कालरूपनिमित्तकारणापे
क्षया उपादानकारणीभूतस्य रजःप्राबल्यादिति विज्ञानेश्वरप्रभृतयः एवं युग्मायां र
जोबाहुल्येपि स्त्रेच पुरुषान्नतिर्भवतीति बोध्यं। अत्र च षोडशदिनात्मकमृतुं नि। द्वि
श्य चतुर्थदिवसानंतरमेव पुत्राद्युत्पत्तिं वदता आद्यं चतुष्टयं वर्ज्यमिति सूचितं। तथा च याज्ञ
वल्क्यः षोडशर्तुर्निशाः स्त्रीणां तस्मिन्युग्मासु संविशेत्। ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च व
र्जयेदिति तत्र चतुर्थ्यां रात्रौ वैकल्पिकं गमनं बोध्यं। विहितप्रतिषिद्धत्वात्। तथा च हारीतो
विदधाति चतुर्थेहनि स्नातायां गर्भाधानमिति। व्यासस्तु निषेधति। चतुर्थे स्नानं गंतव्येति। व्य
वस्थितश्चायं विकल्पः रजोनिवृत्तौ सत्यां चतुर्थ्यां गंतव्यादनुवृत्तौ निषेध इति। तथा च म
नुः। रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला इति साध्वी गर्भाधानयोग्येत्यर्थ इति माधवाद
यः। आपस्तंबोपि स्नानं रजस्वलायाश्च चतुर्थेहनि शंसते गम्या निवृत्ते रजसि ता निरजेकथं
चनेति॥८॥ ६७

राजा क्षत्रियः तथा च वेष्वधिकरणे राजशब्दः क्षत्रियत्वजातिवचनो न तु प्रजापरिपालनमा
त्रनिमित्त इति स्थितं॥ ब्राह्मणादिस्तु षोडशे ज्ञाने संपन्नो भवतीति बोध्यं। तदुक्तं लिंगपुरा
णे। चतुर्थे स्नानगम्या हि गतायुः प्रशस्यते॥ कन्यार्थिनैव गंतव्या पंचम्यां विधिवत्पुनः
षष्ठ्यां गम्या महाभाग सत्पुत्रजननी भवेत् सप्तम्यां चैव कन्यार्थी गच्छेन्नैव प्रशस्यते। अष्ट

॥विद्याहीनं व्रतभ्रष्टं पतितं पारदादिकं॥ दारिद्र्यार्णवमग्नं च तनयं वा प्रसूय
॥ते॥ षोडशे दिवसे गर्भो जायते यदि सुव्रत॥ चक्रवर्ती नदाराजा जायते
॥सन संशयः॥१०

म्यां चैव संपन्नं तनयं संप्रसूयते। नवम्यां दारिकार्थी स्याद्दशम्यां पंडितं तथा॥ एकादश्यां
कन्यकास्यात्तु द्वादश्यां कुशलसुतः। त्रयोदश्यां तथा नारी वर्णसंकरकारिणी। चतुर्दश्यां
दागच्छेत्सुपुत्रजननी भवेत्।

पंचदश्यांचधर्मज्ञंषोडश्यांज्ञानपारगमिति॥स्यादेतत्शिवगीतास्थश्लोकस्यद्वात्रीयवि
षयित्वमसंगतं।तेषांचतुर्दशदिवसस्यैवऋतुगमनवरमावधित्वात्।तथाचजातिविवे
नोपगमकालविशेषमाह।देवलः।ब्राह्मण्यांद्वादशाहंस्यादेषोक्तऋतुसंगमः।दशाहोप
टूचशेषाणांविधीयतेनुपूर्वशः।इतिपंचदिवसादौदारग्रहेहद्वादशाहादिसंख्यावगंतव्ये
तिमाधवादयः।नचऋतौगच्छेदेवेतिनियमस्यऋत्वियंप्रतिचतुर्दशदिवसपर्यंतमेवोक्तत्वा
त्प्रवृत्तावपितदुत्तरकालेरागतःप्रसक्तिःकेनवार्यतइतिवाच्यं।अनृतौगमनस्यनिषिद्ध
त्वात्तथाहबौधायनः।ऋतौनोपैतियोभार्यामनृतौयश्चगच्छतिकल्पमाहुस्तयोःपाप
मयोनयश्चसिंचतीति।अस्यचनिषेधस्यऋत्वियंप्रतिपंचदशदिवसमारभ्यप्रवृत्तेःनचनि
षेधोल्लंघनेनप्रवृत्तस्यषोडशदिवसरूपकालबलेनचक्रवर्तीपुत्रोभवतीतिप्रकृत
ग्रंथार्थइतियुक्तं।चतुर्थदिवसेनतत्पुत्रादिश्रवणेग्रंथस्वरसेनानिषिद्धानामेवेहवक्तुमुचि
तत्वादितिचेन्नयथाकामीभवेद्वापिस्त्रीणांवरमनुस्मरन्नितियाज्ञवल्क्यादिवचनैःस्त्रीका ६८
मनायांसत्यांअनृतावपिगमनस्यानियमितत्वानेनानृतौनगच्छेदितिनिषेधस्यस्वविषये
बाधेनतत्फलपरत्वस्यैवशिवगीतावत्केअस्त्रिप्रेततयासर्वसामंजसंस्यात्।नचैवंयथाका
मीभवेदेवत्यनेनअनृतौनगच्छेदितिनिषेधस्येवइतरेषामपिनिषेधानांबाधापत्तिःसंतिचे

तरेपिनिषेधाः।मघांमूलांचवर्जयेदितियाज्ञवल्क्योक्तेः।अमावास्यामष्टमींचपौर्णमा
सींचतुर्दशींब्रह्मचारीभवेन्नित्यमन्तौस्नातकोद्विजइतिमनूक्तेःइतिवाच्यं।यथाकामीत्व
स्यउक्तदोषरहितानृतुमात्रपरतयावचनबलेनव्यवस्थापनात्।तथाचविष्णुपुराणेत
त्रीयेशउक्तं।इतिमत्वास्वदारेषुऋतुमत्सुनरोभवेत्।यथोक्तदोषहीनेषुसकामेष्वनृता
वपीति।एतेनश्राद्धादिदिवसेपिनियमद्वयोपपत्तेःनेनातिप्रसंगापादनं।परास्तंयच्चऋ
तौगच्छेदेवेतिनियमस्यश्राद्धाहेब्रह्मचर्यविधानस्यचपरस्परपरिहारेणलब्धाव
काशस्यसामान्यविशेषभावनापन्नस्यएकत्रसंकोचेकिंबोध्यमितिसंशयेगच्छेत्।क्षिप्रं
क्वचित्॥इतिश्राद्धप्रकरणस्थवृद्धमनुवचनविरोधात्।तस्मात्राबर्त्तवेपिदिवाब्रजेदि
तिशंखलिखितस्मृतिंप्रतिमूलतयोपन्यस्तोआथर्वणश्रुतिवाक्यइवयाज्ञवल्क्यग्रंथे
पिब्रह्मचर्योक्तिरर्थवादरूपेतिमाधवाचार्यप्रभृतीनांग्रंथएवप्रबलइतिदिक्॥अ
तिस्त्रिंछंपाणंवाएतेप्रस्कंदंतियेदिवारत्यासंयुज्यंतेब्रह्मचर्यमेवतत्।यदृतौसंयु
ज्यंतइति॥तत्पश्येदिति।तत्तस्मात्कारणात्॥यत्तद्यतस्ततोहेतावित्यव्ययेष्वमरः।

॥११॥ जरायुजशब्दस्य योगरूढत्वं दर्शयिष्यन् पूर्वं पदार्थं तावदाह। या स्त्रीति। स्त्रस्माया स्त्री संबंधिनी चर्मरूपा आवरणसाधना मूलपेशी सा जरायुरिति निगद्यते। यद्यपि गर्भाशयो जरायुस्यादित्यमरे जरायुशब्द पुल्लिंगत्वोक्तः साहचर्याच्च कृतचिदिति परिज्ञापितत्वात् यापि उद्देश्य लिंगानुरोधेन जरायुः सेति निर्देशो न विरुध्यते कर्मण्यमविभिप्रेति संप्रदानमिति

॥ऋतुस्नाता यस्य पुंसः सा कांतं मुखमीक्षते। तदाकृतिर्भवेत् गर्भं तत्पश्येत्स्वामिनो मुखं।
॥११॥ या स्त्री चर्मावृत्तिः स्त्रस्मा जरायुः सा निगद्यते॥ शुक्रशोणितयोर्योगस्तस्मिन्नेव च
॥भवेद्यतः॥१२॥

वत्॥ यद्वा तु विधेय लिंगानुरोधस्तदा जरायुः सत्यपि प्रयोगः साधुः तेररणेदं तत्कर्मणोऽन्तु कर्त्तेतिवत्। अत एवाह कैयटः। उद्दिश्यमानप्रतिनिर्दिश्यमानयोरेकत्वमापादयंति सर्वनामानि क्रमेण तत्र लिंगमाजी ति तस्मिन् जरायौ यतो योगः तस्मात् तत्र जरायौ गर्भो भवेत् यस्माच्च जरायौ तो योगः तस्मात्तत्र जरायौ गर्भो भवेत्तेन हेतुना। जरायुजः प्रोक्तः इति तस्मात् व्याख्या हारेण तत्र गर्भो भवेदिति पदत्रयस्य चावस्यायोज्यम् ६६
॥१२॥

॥१३॥१४॥ जन्मकर्मेति॥ जन्म जननं जातिविशेषावच्छिन्नशरीरोत्पत्तिः तदनुकूलं यत्कर्म तद्वशा दिवस्त्रीयोनौ निषिक्तं शुक्रं रजसा सहितं द्रवीभूतं सत्प्रथमे मासे तिष्ठति॥१५॥ बुद्बुदमिति। द्रवं प्रवोक्तं द्रवीभूतं शुक्रं यत्तत्बुद्बुदरूपं कललं पेशी घनं च भवतीति प्रथममासमध्ये क्रमभावीन्य

॥ तत्र गर्भो भवेद्यस्मात्तेन प्रोक्तो जरायुजः॥ अंडजाः पक्षिसर्पाद्याः स्वेदजा मशकाद
॥यः॥१३॥ उद्भिज्जा वृक्षगुल्माद्या मानसाश्च सुरर्षयः॥१४॥ जन्मकर्मवशादेवं निशिक्तस्म
॥रमंदिरे॥ शुक्रं रजः समायुक्तं प्रथमे मासि तद्द्रवं॥१५॥ बुद्बुदं कललं तत्स्यात्ततः पेशी
॥भवेदिदं॥ पेशी घनं द्वितीये तु मासि पिंडः प्रजायते॥१६॥ करांघ्रिशीर्षादिकानि तृतीये संभवंति हि॥

अतस्तो वस्तानिर्दिष्टाः द्वितीयमासे तु पिंडो जायते॥१६॥ अभिव्यक्तिश्चेति। जीवस्य जीवोपाधेः लिंगशरीरस्येति यावत्। अभिव्यक्तिः दुःखाद्यभिव्यक्तिश्चतुर्थे मासे जायते॥१७॥

॥अभिव्यक्तिश्च जीवस्य चतुर्थे मासि जायते॥१७॥ मलगोसोऽले॥६४

ततो दुःखाद्यभिव्यक्तेर्हेतोः न जन्मा जठरे स्वतोपि स्वन एव गर्भेश्वसति ॥१८॥ अंगेति ॥ तथा चतुर्थमा
से ॥ अंगानि करचरणादीनि प्रत्यंगानि अंगुल्यादीनि तेषां भागा अंशाः सूक्ष्मा युगपत्स्युः श्मश्रुदंतादी
न् विहाय तथा च श्मश्रुप्रभृतयः परं न जायंते इतरे तु करचरणप्रभृतयः सूक्ष्मा जायंते प्रथमपक्षा
च्चतुर्थ एव तेषां कराद्यवयवानां तथा व्यक्तता जायते तथा भावानामपि वक्ष्यमाणानां चतुर्थ एव

॥ ततश्चलति गर्भोपि जनन्या नेजठरे स्वतः ॥ पुत्रश्च दक्षिणे पार्श्वे कन्या वामे च तिष्ठति ॥
॥१८॥ नपुंसकस्तूदरस्य भागे तिष्ठति मध्यतः ॥ अतो दक्षिणपार्श्वे तु शेते माता पुमान्यदि ॥
॥१९॥ अंगप्रत्यंगभागाश्च सूक्ष्माः स्युर्युगपत्तदा ॥ विहाय श्मश्रुदंतादीन् जन्मानंतरसंभवा
॥न्॥ चतुर्थे व्यक्तता तेषां भावानामपि जायते ॥२०॥ पुंसां स्थैर्यादयो भावा भीरुत्वाद्यास्तु
॥ योषितां ॥ नपुंसके च ते मिश्रा भवंति रघुनंदन ॥२१॥

७०

व्यक्तता जायते ॥२०॥ के ते भावा इत्याकांक्षायामाह ॥ पुंसामिति ॥ भीरुत्वं चांचल्यं भीतमियं बालत्व
ति महाभाष्यप्रयोगस्य तस्यैव व्याप्तत्वात् ॥२१॥

मातृजमिति ॥ यतो मातृजं अतो मातुराकांक्षितानेव विषयानभिकांक्षति ॥ अत एव गर्भे विवृद्धये
मातुर्मनोभीप्सितमन्नपानादि मनीषितं तत्कुर्यात् ॥ शातांचेति ॥ तां गर्भस्थेच्छासमानाकारेच्छावती ॥ अ
त एव द्वे हृदये यस्यां तां नारीं दौहृदिनीमाहुः ॥ दृष्टे द्रादिता साधुः उक्तं च सुश्रुते ॥ द्विहृदयां नारीं दौ
हृदिनीमाचक्षते तद्विलषितं दद्याद्वीर्यवंतं चिरायुषं पुत्रं जनयतीति गर्भविवृद्धये मातुरिष्टं दे

॥ मातृजं चास्य हृदयं विषयानभिकांक्षति ॥ ततो मातुर्मनोभीष्टं कुर्याद्गर्भविवृद्धये
॥२२॥ तां च द्विहृदयां नारीमाहुर्दौहृदिनीं ततः ॥ अदानाद्दोहृदानां स्याद्गर्भस्य व्यंग
॥ तादयः ॥२३॥

यमिति भागुक्तं ॥ अदाने तु न केवलं स्वाभावः किंतु व्यंगतादयो स्याह अन्ना इति ॥ दोहृदानां
भिलषितार्थानां अदानात् गर्भस्य व्यंगतादयः ॥ अंगन्यूनता कुरूपत्वं अशक्तत्वं चेत्या
दयः स्युः यदाह याज्ञवल्क्यः दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुयात् ॥ वैरूप्यं मरणं वापि त
स्मात्कार्यं प्रियं स्त्रिया इति ॥२३॥

किंच मातुर्यद्विषयको लोभः तथैवार्थयते आकांक्षते इति तथार्थः सुतो जायते॥ मातृजं चास्य हृ
दयमिति प्रागेवोक्तत्वात् प्रबुद्धमिति॥ पंचमे मासे चित्तं प्रबुद्धं चतुर्थमासपेक्षया अधिकं ज्ञा
नवत् भवति तथा मांसशोणितयोः पुष्टता च भवति॥२४॥ षष्ठ इति नवैः खराणि नखानि नखो
स्त्री नखरोस्त्रियामित्यमरः॥२५॥ पादाभ्यां मंतरीतौ यौ हस्तौ ताभ्यां श्रोतयोः कर्णयोः रंध्रे छिद्रे

॥ मातुर्यद्विषयो लोभस्तथार्थो जायते सुतः॥ प्रबुद्धं पंचमे चित्तं मांसशोणितपुष्टता॥
॥२४॥ षष्ठे स्नायुनखरकेशास्थि रोमविविक्तता॥ लवणौघोपचितोस सप्तमे त्वंगपूर्णता॥
॥२५॥ पादांतरितहस्ताभ्यां श्रोत्ररंध्रे पिधाय सः॥ उद्विग्नो गर्भसंवासात्तिर्गर्भत्रयान्वितः॥ सादास्से
॥२६॥ आविर्भूतप्रबोधोसौ गर्भे दुःखादिसंयुतः॥ हा कष्टमिति निर्विण्णः स्वात्मानं शो
मुचीत्यथ॥२७॥

पिधाय आच्छाद्य गर्भसंवासात् भुज्यमानदुःखप्रयोजकात् उद्विग्नः संजातोद्वेगः॥ तथा गर्भत्रयेण ज
विर्गर्भांतरप्रतिसंधानजनितेन त्रयेणान्वितः सन् स गर्भे आस्ते तिष्ठति॥२६॥ निर्विण्णः पश्चात्ताप ७१
वान् शोचतीति। पुनःपुनरतिशयेन वा शोचतीत्यर्थः। यद्वा युगंतात्रटिरूपमिति॥२७॥ ॥

एवं स्मरतीति त्रिविंवद्यतीति। तत्रैवं शरार्थमाह। श्लोकषट्केन। अनुतप्ता इति। महासत्यामत्ताः पुरश्रम
हासत्यपुराः नारकिशरीराणि इत्यर्थः। पूःशब्दस्य शरीरवाचिनः कर्मधारये कृते च पूरचूरिति स
मासांतेवकृते परवल्लिंगं द्वंद्वतत्पुरुषयोरिति स्त्रीत्वात्तत्प्रकरं त्वेति करं तोदधिसकवंत्तत्संबंधी
न्यो वालुकाः यच्चर्जनार्थं तप्ताः सिकता मयात तप्ताः। अत एवासुखं दुःखं आशोने ए चित्यसुखाश्रया

॥ अनुतप्या महासत्यपुराम मर्मच्छिदोसकृत्॥ करंजवालुकास्तप्ताश्चादहंसुखाश्रयाः॥ ता
न ॥२८॥ जठरानलसंतप्ता पित्ताख्यरं विप्रुषः॥ गर्भाश्रये निमग्नं तु दहंत्यपि नशं हि मां॥२९॥
॥ उदर्यक्रमिवक्त्राणि कूटशाल्मलिकंटकैः॥ तुल्यानि च तुदंत्यार्त्तं पार्श्वास्थिककचार्दितं॥३०॥

मर्मच्छिदो नादिदहंते। करंजवा

मर्मस्थानादिदहंते। करंजवालुकाभिरेव तप्यमानाभिर्मदीयानि मर्मस्थानि दग्धानीत्यर्थः॥२८॥ उदर्ये
ति उदरे जवाः उदर्याः शरीरावयवा घन उदर्याणां कृमीणां वक्त्राणि आर्त्तं मां तुदंतीत्यन्वयः॥ कीदृशानि व
क्त्राणि कूटशाल्मलेः कंटकैस्तुल्यानि कीदृशं मां पार्श्वयोः मातुः पार्श्वभागयोर्यान्यस्थीनि तान्येव क्रकचा तैर
र्दितं पीड्यमानं॥३०॥

गर्भेइति। यद्दुःखं गर्भे मया प्राप्तं तस्मात्दुःखात् कुंभपाकाख्ये नरके जातं कुंभपाकजं दुःखम
तिशयेनाल्पं कनीयः युवाल्पयोः कन् इति कनादेशः॥३१॥ गर्भशय्यामिति। यस्यापादकृदुःखं
आपि प्राप्तं कर्मणि लुङ् तत्दुःखकर्म नरकेषु यत्। यैर्दुःखं कर्तृत्वनातिशेते अहो आक्रम्यनाके
व्यनरकाद्यप्यसह्यं गर्भदुःखमित्यर्थः॥३२॥ एवमिति। नानाबद्धीः जातीश्चं जलघाः यातनाः तीव्रवेद

॥गर्भे दुर्गंधभूयिष्ठे जठराग्निप्रदीपिते॥ दुःखं मयाप्तं यत्तस्मात् कनीयः कुंभपाकजं।
॥३१॥ पूयासृक्श्लेष्मपायित्वं वांताशित्वं च यद्भवेत्॥ अशुचौ कृमिभावश्च तत्प्राप्तं गर्भ
॥शायिना॥३२॥ गर्भशय्यां समारुह्य दुःखं यादृङ् मयापितत्॥ नातिशेते महद्दुःखं निः
षं ॥शेषं नरकेषु यत्॥३३॥ एवं स्मरन् पुरा प्राप्ता नानाजातीश्च यातनाः॥ मोक्षोपायमभिध्याय
॥न्वर्त्तते भ्यासतत्परः॥३४॥

नाश्च स्मरन्निति संबंधः। अतो जातं नातोऽनसंनाव्यते अं बुधुपत्वा ह्रासमस्तमपि समर्थनीयं॥३४॥ ७२

पु

द्रुतस्युदंमुत्तं आइयत् पीतं [illegible] जस्तेजः शाब्द्वा यं धातुपरिणामविशेषात्मकं जीवनेयत्रिमि
त्तत् दष्टमे मासि मतं॥३५॥ मातरमिति। तत्पूर्वोक्तं सोमं चंचलत्वेन गर्हितं चलतीति चंचलं अतए
व पुनर्मातरं पुनश्च गर्भं प्रधावति तत्ताहेतोः। अष्टमासि जातो न जीवति यत ओजसा प्रायुक्तेन
झितस्य त्व॥३६॥ किंचिदिति। नवमादिषु मासेषु प्रसवस्य समयः स्यात्। तथा च स्मृतिः। दशमे मा
सि सूतवदिति समयेन याहवस्तेन नवमे दशमे मासि प्रबलैः सूतिमारुतैर्निःसार्यते बाण इव यं

॥अष्टमे त्वक्स्मृतता स्यात् ओजस्तेजश्च हृद्भवं॥ शुद्धमापीतरक्तं च निमित्तं जीवितेमतं॥३५
॥मातरं च पुनर्गर्भं चंचलं तत्प्रधावति॥ ततो जातोऽष्टमे मासि न जीवत्योजसोज्झितः॥३६
॥किंचित्कालमवस्थानं संस्कारात्पीडितांगवत्॥ समयः प्रसवस्य स्यान्मासेषु न
वमादिषु॥३७॥

त्विदंगसत्वर इति। तेषु च प्रसवमासेषु किंचित्कालं संस्कारात् स्थैर्यप्रयोजकादृष्टवशा
त्। अवनचांचल्यं परित्यज्य अवस्थितिः। अत्र दृष्टांतः पीडितांगवदिति। यथा ज्वरादिना आंतस्कं
चित्कालं सुषुप्त्यादौ निश्चला सन्तिष्ठति तद्वदित्यर्थः॥३७॥

मातुरिति। अस्रशोणितं वहति प्रवहत्यया सा अस्रवहा। तां नाडीमाश्रित्य नाभिस्थनाडी अनवता
रिता विस्तारिता सा च गर्भस्य मात्राहारसंबंधिनं रसमावहतीति तथा भूता बोध्या आवहा। केवला
स्य च द्यविपश्चाद्रसेन षष्ठीतत्पुरुषः तेन कारणेन मात्राहारेण पोषितः सन् गर्भोपि जीवति॥३८॥
मेदश्च अस्रक् च ताभ्यां दिग्धं उपचितं सर्वमंगं यस्य स तथा कृतः॥३९॥ उत्तानः सन्शेलेत्कतान

॥मातुरस्रवहां नाडीमाश्रित्यानवतारिता॥ नाभिस्थनाडी गर्भस्य मात्राहाररसावहा।
॥३८॥ तेन जीवति गर्भोपि मात्राहारेण पोषितः॥ अस्थियंत्रविनिःपिष्टः पतितः कुक्षिव
॥र्त्मना॥३९॥ मेदोसृग्दिग्धसर्वांगो जरायुपुरसंवृतः॥ निःक्रामन् भृशदुःखार्तो रुदन्नुच्चै
॥रधोमुखः॥४०॥ यंत्रादिव विनिर्मुक्तः पतत्युत्तानशाय्युतः॥४०॥ अकिंचित्करस्तद्वालो
॥कैर्मांसपेशीवदास्थितः॥४१॥ श्वमार्जारादिदंष्ट्रिभ्यो रक्ष्यते दंडपाणिभिः॥४१॥ ॥

शायी उत्तेनि। अपी वेत्यर्थः॥४०॥ अकिंचित्क इति तदा मांसपेशीवत्। आस्थितो दृश्यमानोसौ श्वमार्जारादिभ्यो १३
न ह्वाणंधर्मगत्योदंडपाणिभिर्लोकैः स्वजनैरक्ष्यते। न तु स्वरक्षणे स्वयं प्रभवतीति नाकम् अत्र हेतु
माह। अकिंचित्कृदिति अविद्यमानं किंचित् विकृर्वैरी रपाटवादि रक्षणं साधनं यस्य सः अकिंचित्॥४१॥

पितवदिति॥ राक्षसमर्पितवद्वेत्तिजानाति॥ डाकिनीं राक्षसीं विशेषं मातवद्वेत्ति। यूयं चत्वारः वदेतिग्रज्ञाना
त्। विवेकशून्यत्वात् उपलक्षणं चैतदित्याह। दीर्घेति। शिशोर्भावः शैशवं तत् दीर्घं कष्टं च दुःखं यस्मिन् ताद
शं॥ ईशानः कश्चिदर्थो ज्ञातश्चेत्तथापि सवक्तुं न शक्यते। येन दुःखादिप्रैआम्नः प्रवर्त्तरेरन्नित्याह।
श्लेष्मणेति अपिहितेति। छेदःपिहितेनिवा। वक्ति जागुरिरश्लोपमावाप्योरुपसर्गयोरिति वैकल्पिक

पितृवद्राक्षसं वेत्ति मातृवड्डाकिनीमपि॥ यूयं पयो वदज्ञानादीर्घकष्टं तु शैशवं॥४२॥ श्लेष्म
णापिहिता नाडि सुषुम्ना यावदेव हि। व्यक्तवर्णं च वचनं तावद्वक्तुं न शक्यते॥४३॥ अत
एव च गर्भेपि रोदितुं नैव शक्यते॥ दृप्तोथ यौवनं प्राप्य मन्मथज्वरविक्लवः॥४४॥
गायत्यकस्मादुच्चैस्तु तथाकस्माच्च वल्गति॥ आरोहति तरून्वेगात् शांतानुद्वेजय
त्यपि॥४५॥ ॥

अकारलोपः अत एवेति श्लेष्मणा आच्छादनादेवेत्यर्थः। दृप्तो गर्वितः वल्गति विकत्थ इत्यर्थः॥४४॥ शां
तान् निभृतान् दीर्घायान् स्विनोपि उद्वेजयति उद्विग्नान् करोति। कांश्चिदपि मातापित्रादीन् पूज्यवर्गा
न् वीद्यते अवजानीत इत्यर्थः॥४५॥

अस्थीति॥ अस्थि च मांसं च शिरा च अस्थिमांसशिरं तत्॥ आसमंतात् त्वातीत्यस्थिमांसशिरत्ता॥
तया त्वतायाः॥ वामायाः स्त्रियाः मन्मथालये योनौ आसक्तः स्मर आत्मनैव भृशं दह्यत इति संबंधः। की
दृशे मन्मथालये उत्तानं अथ च पूतिदुर्गंधं इदृशं यत् मंडूकस्य पाटितं विशीर्णं उदरं तत्सन्निभे
विवेकदशायां जुगुप्सितमे इत्यर्थः॥५६॥ वामानां वपुः शरीरं अस्थिमांसप्रभृतिभ्योन्यद्वर्त्तते किंनास्ये

॥अस्थिमांसशिरात्वाया वामाया मन्मथालये। उत्तानपूतिमंडूकपाटितोदरसन्निभे।
॥५६॥ आसक्तः स्मरबाणार्त आत्मना दह्यते भृशं। अस्थिमांसशिरात्वाग्भ्यः किमन्यद्व
॥र्त्तते वपुः॥ वामानां मायया मूढो न किंचिद्वीक्ष्यते जगत्॥५७॥

वेत्यर्थः। यद्यप्येवं तथापि मायया मूढो युवा किमपि जगत् न ईक्षते यथावज्जानाति किंतु निःसा
रमेव सारवत्तया गृह्णातीत्यर्थः। यद्यपि अस्मादीनां वैयाकरणाभिमतप्राणंगत्वसंज्ञाविदेकव
द्भावः प्राप्नोति तथापि मुखनासिकावचन इति सौत्रनिर्देशादनित्यत्वमाश्रित्य राजहंसास्त्वतेवं ७४
बुचरणे र्लोहितैः सिता इत्यादिवत् समर्थनीयं छंदोवदय इति वा॥ लैकवद्भावाभावात् मेकशेष इति वा॥
॥५७॥

निर्गत इति प्राणपवने निर्गते सति पंच निःषड्वा इति पंचषैर्दिनैः कतिपयैरेव दिवसैः शीघ्रमेवेत्यर्थः।
मृगीदृशो देहो यया जायते यामवस्थां प्राप्नोति तत् न वीक्ष्यते न पर्यालोच्यत एवेति मायया मूढतायाः पूर्व
श्लोकोक्तायाः प्रपंचमुक्तं च स एव कालेन तेनैव स्वैवरोविट्कृमिभिः समसंज्ञित इति॥५८॥ वार्द्धके दुर्दश
माह॥ महेति जग्धं भक्षितं अन्नं ओदनादि जीर्यते न जीर्णत्वं व्रजतीत्यर्थः। जग्धमित्यत्र अदो जग्धिरि

॥निर्गते प्राणपवने देहो हंत मृगीदृशः। यथा हि जायते नैव वीक्ष्यते पंचषैर्दिनैः॥५८॥ म
॥हापरिभवस्थानं जरां प्राप्यातिदुःखितः। श्लेष्मणा पिहितोरस्को जग्धमन्नं न जीर्यति।
॥५९॥ सन्नदंतो मंददृष्टिः कटुतिक्तकषायभुक्। वातभुग्नकटिग्रीवाकरोरुचरणो ब
लः॥६०॥ ॥

ति जग्ध्यादेशः। अन्नमित्यत्र तु बलेर्ङः संज्ञा छंदसोरिति कात्यायनवचनाददादेशो न भवति॥५९॥
सन्ना विशीर्णाः दंताः यस्य स तथा कटुतिक्तादीन् व्याधिनिवृत्तये भुंक्त इति तथाभूतः॥६०॥ ॥

गदा व्याधयः रोगव्याधिगदामया इत्यमरः॥ तेषामयुतेन दशसहस्रेण समाविष्टो व्याप्तः नि:
शौचः शौचरहितः अत एव मलैर्दिग्धं उपचितं अंगं यस्य स तथाभूतः आलिंगितं प्राप्तं वरं महत्तम
नुषितं दाहो येन सः आलिंगितवरोषितः दुःखवान् अत्यार्द्रं दह्यमान इत्यर्थः। उपदाहे। अस्माद्
तो ज्ञावेक प्रत्ययः॥५१॥ वल्गतीत्युक्तेति विबलः बालकैरपि हस्यते उपहस्यते किमुत तरुणैरित्यर्थः।

॥गदायुतसमाविष्टः परिभूतः स्वबंधुभिः॥ निःशौचो मलदिग्धांग आलिंगितवरो
॥षितः॥५१॥ ध्यायन् सुखं तान् भोगान् केवलं वर्त्तते बलः॥ सर्वेंद्रियक्रियालोपाद्धस्य
॥ते बालकैरपि॥५२॥ ततो मृतिज दुःखस्य दृष्टांतो नोपलभ्यते॥ यस्माद्भिद्यन्ति भूतानि
॥प्राणान्यपि परां रुजां॥५३॥ नीयते मृत्युना जंतुः परिष्वक्तोपि बंधुभिः॥ सागरांतर्ग
॥तगतो गरुडेनेव पन्नगाः॥५४॥

॥५२॥ तत इति ततः वार्द्धक्यानंतरं मृतिर्मरणं तेन जातस्य दुःखस्य नास्त्येव दृष्टांतः परां रुजं
प्राणान्यपि भूतानि यस्मात् मृतिज दुःखाद्भिद्यन्ति त्रयं प्राप्नुवंति॥५३॥ नीयत इति बंधुभिः परिष्वक्तो ७५
पि आलिंगितोपि जंतुर्मृत्युना नीयते अत्र दृष्टांतः सागरस्य अंतर्जलमध्ये गतः स्थितोपि पन्नगः
पश्चान्न गच्छतीति पन्नगः स सर्पो गरुडेनेवेति॥५४॥

सुतरां दारुणं यथा भवति तथा हा कांते इत्यादि क्रंदमान आक्रोशन्नपि यानश्रमस्य योनतु शानसून
रोमृत्युना यमदूतेन नीयते॥५५॥ मर्मस्थलेषु उत्तरुध्यमानेषु प्राणवायुना वियोज्यमानेषु हृ
त्पादादीनां च संधिषु मुच्यमानेषु यद्यत् दुःखं संजायते तत् म्रियमाणस्य दुःखं मुमुक्षुभिः स्मर्य॥
५६॥ दृष्ट्वा विति॥ दृष्टौ यमदूतैराक्षिप्यमाणायां क्षीयमाणया संज्ञया अनुपलक्षितस्य निःसंज्ञस्येत्य

॥हा कांते हा धनं पुत्राः क्रंदमानः सुदारुणं॥ मंडूक इव सर्पेण मृत्युनानीयते नरः॥५५॥
॥मर्मस्वत्तुद्ध्यमाणेषु मुच्यमानेषु संधिषु॥ यद्दुःखं म्रियमाणस्य स्मर्यतां तन्मुमुक्षुभिः
॥५६॥ दृष्टावाक्षिप्यमाणायां संज्ञया क्षीयमाणया॥ मृत्युपाशेन बद्धस्य त्राता नैवोपलभ्य
॥ते॥५७॥ संरुध्यमानस्तमसा महच्चित्तमिवाविशत्॥

र्थः मृत्युपाशेन बद्धस्य जंतोस्त्राता रक्षकः नोपलभ्यत एव॥५७॥ संरुध्यमान इति तमसा अज्ञाने
न निरुध्यमानः महत् चित्तं विवेकं आविशन्निव कथंचित् सावधानतां प्राप्तः संन्नित्यर्थः॥ उपाकृतः
हे देवदत्तेत्यादिनामग्रहणपूर्वकं संबोधितः सन् तदा तस्यामवस्थायां दानचतुष्पाज्ञानानीकृतापरि
भाषणे समर्थत्वादेव लक्षणमात्रं करोतीति तदेतन्महतो विवेकस्य कार्यं तदलाभे उद्धरणमिति दुर्लभ

मितिभावः॥चितीसंज्ञानेचावेक्षतःतुनाक्षतइतीपाठेतुतत्रापिचेत्यर्थः॥आक्षतइतितुप्राग्वत्॥५८॥अ
यःपाशेनेतिकालेनबंधुभिश्चयथाक्रमंअयःपाशस्नेहपाशाभ्यामाकृष्यमाणंतंपूर्वोक्तावस्थाप
न्नमात्मानंवीक्ष्यतेचिंतयतीतिसावधानत्वादशायांम्रियमाणस्यक्वचिदितिकथनंमूर्छावस्थापन्न
स्यतुएतावदपिनास्तिसंसारोपायचिंतनंतुतस्यामवस्थायांदूरायास्तमितिभावः॥५९॥इत्य

॥तुपाक्षतस्तदाज्ञातीनीक्षतेदीनचक्षुषा॥५७॥अयःपाशेनकालेनस्नेहपाशेनबंधुभिः।
॥आत्मानंकृष्यमाणंतंमीक्षतेपरितस्तथा॥५८॥हिक्कयाबाध्यमानस्यश्वासेनपरिशु
॥ष्यतः॥मृत्युनाकृष्यमाणस्यनखल्वस्तिपरायणं॥६०॥

तेपरितस्तथैतिपूर्वश्लोकेउक्तंकिमीक्षतइत्याकांक्षायांसार्धश्लोकद्वयेनाहहिक्कयेतिपरायणंस ७६
रक्षकः॥६०॥

व्य
॥६१॥किंकरोमीत्यादिकिंचित्कार्यंचिंतयित्वातत्तइतिकर्तव्यतामूढःसन्असून्प्राणान्त्यक्त्वा
तत्यजति॥६२॥यातनेति॥इतोस्माल्लोकाद्यमलोकंगत्वायातनायैतीव्रवेदनायैदेहोयातना
अनुभववतितासुसुमध्येयत्रदेहस्तेनसंबद्धःसन्यमदूतैरधिष्ठितश्चसन्यायास्ताविशिष्य
वक्तुमशक्यायसंबंधिनीयातनाअनुभववतितासुमध्येयत्दुःखंअयःकुंभीपाकक्रौंचदारणा क ४

१२ ॥संसारयंत्रमारूढोयमदूतैरधिष्ठितः।क्वयास्याम्यतिदुःखार्त्तःकालपाशेनयोजि
॥तः॥६१॥किंकरोमिक्वगच्छामिकिंगृह्णामित्यजामिकिं।इतिकर्तव्यतामूढःकृच्छ्राद्देह
॥त्यजत्यसून्॥६२॥यातनादेहसंबद्धोयमदूतैरधिष्ठितः।इतोगत्वानुभवतियाया
॥स्तायमयातनाः॥तासुयल्लभतेदुःखंतद्वक्तुंसहतेकुतः॥६३॥

दिजन्यंलभतेतदेकमपिवक्तुंकुतःसहतइत्यन्वयः॥सर्वायातनाअनुभवितुंनरःशक्नोतीतिकिमु
वक्तव्यंयत्रएकैकव्यक्तिरपिअनुभवैकवेद्यानतुविशिष्यवक्तुंशक्येतिभावः॥६३॥

कर्पूरेति। यद्वपुः शरीरं कर्पूराद्यैर्लिप्यते सुवस्त्रैरुत्कृष्टैर्वस्त्रैः परिवार्यते वेष्ट्यते। तदेव वपुः जीवे
न त्यक्तं सत् सदा अस्पृश्यं स्पर्शायोग्यं अप्रेक्ष्यं दर्शनायोग्यं च जायते। अत एव निलयात् गृहात् निष्का

॥कर्पूरचंदनाद्यैर्यल्लिप्यते सततं हि यत्। भूषणैर्भूष्यते चित्रैः सुवस्त्रैः परिवार्यते।
॥६४॥ अस्पृश्यं जायते प्रेक्ष्यं जीवत्यक्तं सदा वपुः। निष्काशयंति निलयात् क्षणं न स्था
॥पयंत्यपि॥६५॥ दह्यते च ततः काष्ठैस्तद्भस्म क्रियते क्षणात्। भक्ष्यते वा शृगालेन गृध्रक
॥कूटवायसैः॥६६॥ पुनर्न दृश्यते सोथ जन्मकोटिशतैरपि॥६७॥

शयंति दूरीकुर्वंति क्षणमपि न स्थापयंति॥६४॥६५॥६६॥ पुनर्नेति तस्मात् मृतो वा। जंबूकादिभि ११
र्भक्षितो वा देहः पुनर्न दृश्यते॥६७॥

जि
मानेति मायोपमे ऐंद्रजालिक निर्मित माया हस्त्यादिसदृशेऽस्मिन् जगति मम पितेति इत्यादिक
पा प्रतिज्ञा कस्य भवेत्। न कस्यापीत्यर्थः। अयं प्रमाता कर्मपुरःसरः सन्नेक एव यतो व्रजति न तु माता
पित्रादिभिः सह तथा वा नादौ संसारे सर्वेषां परस्परं मातृपितृभावश्च दृष्ट इति भावः। जीवलो
को मनुष्यादिशरीरात्मको विश्रामार्थेन वृक्षे लग्नसदृशः खलु पृष्टस्थायं चोत्तरश्लोके विवरिष्यति।

॥माता पिता गुरुजनः स्वजनो ममेति मायोपमो जगति कस्य भवेत्प्रतिज्ञा। एकोय
॥तो व्रजति कर्मपुरःसरोयं विश्रामवृक्षसदृशः खलु जीवलोकः॥६८॥

अत्र यद्यपि विश्राम इति प्रयोगः पाणिनीयमते विरुद्ध नोदात्तोपदेशस्येति वृद्धिनिषेधात्॥ तथापि चंद्र
व्याकरणे वा श्रमेर्विश्राविश्रेति सिद्धांततत्वात्र दोषः॥ न जानिर्दिष्टमनित्यमिति वा संज्ञापूर्व
को विधिरनित्य इत्यवा कुशकाशावलंबनेन तु पाणिनीयमते समर्थयितव्यं विश्रामवृक्षे तिसं ली
मासस्थनाप्वरीत्या षष्ठी तत्पुरुष एव परमंजरीकारवीत्यानु चतुर्थी तत्पुरुषः साधुः अत्र च
बहुवक्तव्यं ग्रंथगौरवभयान्नोच्यते॥६८॥

सायमिति। यथा विहंगाः पक्षिणः सायंकाले वासवृक्षं प्राप्ताः संतः प्रातःकाले अन्योन्यं प
रस्परं त्यक्त्वा च वृक्षं त्यक्त्वा तेन तेन यथा प्रयांति तद्वद्देवज्ञातयो बान्धवा अज्ञातयो मित्राणि आत्मादयः स्वस्वकर्मानु
रोधात् किंचित्कालमेकत्र स्थित्वा यथायथं प्रयांति॥६९॥ मृतीति जन्ममृते बीजं पूर्वरूपं भवेत् तथा
मृतिरपि जन्मनो बीजं भवेत्। अत एव घटयंत्रवदनिशं नरो बम्भ्रमीति पुनःपुनर्भ्राम्यति॥ [illegible]

॥ सायं सायं वासवृक्षं समेताः प्रातःप्रातस्तेन तेन प्रयांति। त्यक्त्वान्योन्यं तं च वृक्षं विहंगा
॥ स्तद्वत्तद्वज्ज्ञातयोऽज्ञातयश्च॥६९॥ मृतिर्बीजं भवेज्जन्म जन्म बीजं भवेन्मृतिः। घटयंत्रव
॥ दजस्रं तो बम्भ्रमीत्यनिशं नरः॥७०॥ गर्भे पुंसः शुक्रपाताद्यदुक्तं मरणावधि। तदेतस्य म
॥ हाव्याधेर्मत्तो नान्योऽस्ति भेषजं॥७१॥ ॥इति श्रीपद्मपुराणे शिवगीतासु० वैराग्य
॥ योगो नामाष्टमोध्यायः॥

रूपं नुगत इति नुमागमः॥७०॥ शुक्रपातादारभ्य मरणावधि यदुक्तं सर्वासां वेषवेति कर्मधारयः ७८
तस्यैतस्य महाव्याधेर्भेषजं मत्तोऽन्यत् पूर्वोऽनास्ति भेषजशब्दो नित्यनपुंसकः॥ ॥इति श्रीशिवगी
ताव्याख्यायामष्टमोध्यायः॥ ॥८॥ ॥

अष्टमाध्यायोपक्रमे पांचभौतिकदेहस्योत्पत्तिविलयः स्थितिः। स्वरूपं च कथमिति रामेण पृष्टं तत्रोत्पत्ति
र्निरूपिता स्वरूपं तु इह प्राधान्येन निरूप्यत इति प्रतिज्ञानाने देहस्वरूपमिति। श्रृणुष्व श्रृणु तदुत्पा
दीन् पि प्राकृष्यान् तु चिकटाहन्यायेन क्रमेण संक्षिप्य कथयति। मत्तो हीति। मद्विषयकाज्ञानान्म
त्तो बाध्यस्तं विश्वं मद्विषयकसाक्षात्काराद्विलीयते शुक्त्यवच्छिन्नचैतन्यविषयकाज्ञानकार्यरूप्यं

॥ श्रीभगवानुवाच॥ देहस्वरूपं वक्ष्यामि श्रृणुष्वावहितो नृप। मत्तो हि जायते विश्वं म
॥ य्येवैतत्प्रधार्यते॥१॥ मय्येवेदमधिष्ठाने लीयते शुक्तिरूप्यवत्। अहं तु निर्मलः पू
॥ र्णः सच्चिदानंदविग्रहः॥२॥ असंगो निरहंकारः शुद्धं ब्रह्म सनातनं। अनाद्यविद्या
॥ युक्तः सन् जगत्कारणतां व्रजे॥३॥

यथा शुक्तिसाक्षात्काराद्विलीयते तद्वदित्यर्थः। नचैतावता मम विकारित्वमित्याह अहंत्विति तिनन्वस्य
स्वरूपस्य मोक्षकालेप्यवस्थानात् पुनः प्रपंचापत्तिरित्याशंक्याह। अनाद्यविद्ययेति तथा चाविद्यारू
पसहकारिविरहान्न मुक्तस्य पुनःसंसारापत्तिरित्यर्थः। व्रजे व्रजामि अनाद्यविद्यया युक्तः सन्नि
मुक्तरीत्या उभयोरेकरूपमेव कारणत्वमिति। तमेवाव वर्णयति। अविद्यापरिणामिनीति स्वज्ञाना

वाध्यंप्रत्युपादानंहिपरिणामीत्युच्यतेननुसपरिणामःकार्त्स्न्येनवाएकदेशेनवानाद्यःदधित्वद
शायांक्षीरस्येवप्रपंचदशायामज्ञानस्यानुपलंभापत्तेःनद्वितीयःअनादित्वेननिरवयवत्वात्इ
त्याशंक्याह।अनिर्वाच्येति।तथाचानाद्यवच्छिन्नेअनिर्वचनीयेसहत्वान्नद्वितीयपक्षासंगतिः।
कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपोवेतिव्याससूत्रेतथैवनिर्णीतत्वादितिभावः।महाविद्येत्यने

॥अनिर्वाच्यामहाविद्यात्रिगुणापरिणामिनी।रजःसत्त्वंतमश्चेतित्रिगुणाःपरिकी
र्त्तिताः॥४॥ ॥

नमूलाज्ञानमेवजगदुपादानंनतुमूलाज्ञानमेवजगदुपादानंनतुमूलाज्ञानंशुक्तिज्ञानात्तन्निरस्तौ ७९
सकलप्रपंचनिवृत्त्यापत्तेरितिदर्शयति।ननुगुणेतितथाचगुणानामविद्यांशरूपत्वादंशांशिनोश्चानिर्व
चनीयतादात्म्यान्नकोपिदोषइतिभावः॥४॥

तत्रगुणानांकार्यविशेषंप्रतिकारणानांविविच्यदर्शयतिसत्त्वमितिसुखज्ञानयोःसुखशब्दवाच्यज्ञा
नशब्दवाच्ययोर्द्वयोरास्पदंकारणंरजस्तुरक्तवर्णंदुःखकारणंच॥५॥तमइतितमःकृष्णवर्णंतथाज
डंयद्यपिचिद्भिन्नत्वस्वरूपंजडत्वंसत्त्वरजसोस्तत्कार्येचास्तितथापिआवरणप्रयोजकत्वंतमसएवे
त्यर्थः।उदासीनमितिसुखादिजननासमर्थमित्यर्थः॥६॥त्रिगुणात्मिकाअविद्यापरिणामिनीत्युक्तंअधि

॥सत्त्वंशुक्लंसमादिष्टंसुखज्ञानास्पदंनृणां।दुःखास्पदंरक्तवर्णंचंचलंचरजोमतं॥५॥
॥तमःकृष्णंजडंप्रोक्तमुदासीनंसुखादिषु॥अतोममसमायोगाच्छक्तिःसात्रिगुणात्मि
॥का॥अधिष्ठानेतुमय्येवभजतेविश्वरूपतां॥शुक्तौरजतवद्रज्जौभुजंगोयद्वदेवतु॥७॥

ष्ठानंत्वहमेवेत्याह॥अधिष्ठानेतिति अधिष्ठानंब्रह्मैवपरिणामिनीत्वविद्याकार्याश्रयस्तुपरिणामि
कार्येणतादात्म्यवत्कारणमुपादानंतादात्म्यंतुभिन्नत्वेसत्यभिन्नसत्ताकत्वमितिविवेकः॥७॥ ॥

एतत्षट्कौशिकं शरीरं जाति। पितृतस्त्रीणि मातृतस्त्रीण्यस्थिस्नायुमज्जानः पितृतस्त्वङ्मांसरु
धिराणि मातृत इति गर्भोपनिषदर्थमतः पठन्ति द्वाभ्यां पितृभ्यामिति पितृभ्यां मातृभ्यामशितान्न
ह्रितादन्नाद्देहः नादेः षट्कोशा इव कोशाः यस्मिन् तथाभूतं वपुर्जायते॥८॥ भावाः स्युरिति

॥आकाशादीनि जायन्ते मत्तो भूतानि मायया॥ तैराब्धमिदं सर्वं देहोऽयं पाञ्चभौतिकः।
॥८॥ पितृभ्यामशितादन्नात्षट्कोशं जायते वपुः॥ स्नायवोऽस्थीनि मज्जा च जायन्ते पि
॥तृतस्तथा॥९॥ त्वङ्मांसं शोणितमिति मातृतश्च भवन्ति हि॥ भावाः स्युः षड्विधास्तस्य
॥मातृजाः पितृजास्तथा॥१०॥

मातृजाः तथा पितृजाश्च मिलित्वा षड्विधास्तस्य भावः भावयन्ति शरीरमिति भावाः कोशपञ्च॥
॥१०॥

मृद्व इति। मृद्वो भावो मातृजा वा मताः इत्यन्वयः। केते शोणितं रक्तं मेदः वपा मज्जा सारः स्नेहो धातुवि
शेषः। प्लीहा गुल्मः यत्तत् दक्षिणपार्श्वे कालखण्डापरपर्यायः स्नेहमांसं गुदमपानं हृदयं इत्येव
माद्याः। तथा चामरः रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितमिति। द्रव्ये मेदस्तु वपावसेति च। सा
रो मज्जा स्नसावितिच गुल्मस्तु प्लीहा पुंसीति च कालखण्डयकृती तु समे इमे इति च अन्ये मज्जा। शब्दे

॥मृद्वः शोणितं मेदो मज्जा प्लीहा यकृत् गुदं॥ हृन्नाडीत्येवमाद्याश्च भावा मातृजवा
॥मृताः॥११॥

नान्तः पुल्लिङ्गः नाडि इत्यत्र प्रत्ययकाराद्दक्षिन् इति डीप्। तथा च मुरारिः प्रावृक्कं नाडीपल्लवलपुंडरी
कमुकुलैः कल्लोलैः सपत्नीनत इति। विरमति महाकल्पे नाडीपथे कनिकेतन इति च द्विपदृशानस
नाडी नाडीपथे नेति च श्रीहर्षः। तथा च लिङ्गानुशासनसूत्रं। नाडिरवृत्रिय इति स्त्रीलिङ्गशेष
मरोप्याह॥ सा लिः कथा तथा संदीनाडिराजसजापि चेति। अत एव समुद्गसत्यं कज कोशकोमसै
रूपाहितश्रील्पुपनी विना निशिरितिमारवेः प्रमाद इति बोध्यं॥ ॥११॥ ॥श्री॥ ॥

श्मश्रुः पुरुषस्य मुखे रोमवृद्धिः लोम शिरसोऽन्यत्र शरीरे रूढं। कचाः शिरोरुहाः तथा चामरः तनुरु
हं रोम लोम तद्वृद्धौ श्मश्रु पुंमुखे इति कचः केशः शिरोरुह इति च स्नायुः वस्नसा पर पर्यायो धा
तुविशेषः अथ वस्नसा स्नायुः स्त्रियामित्यमरः। शिरा धमनय इति व्यपि नाडी तु धमनिः शि
रेत्यमरसिंहेन पर्यायत्वात्तथापि रक्तस्थनाधः स्थूला रक्तधमनी साऽधश्याद्धमनयो बोध्याः॥

॥श्मश्रु लोम कच स्नायु शिरा धमनयो नखाः॥ दशनाः शुक्रमित्यादि स्थिराः पितृस
॥मुद्भवाः॥१२॥ शरीरोपचितिर्वर्णो वृद्धिर्वह्निर्बलं स्थितिः॥ अलोलुपत्वमुत्साह इ
॥त्यादीन् रसजान् विदुः॥१३॥

विज्ञानेश्वरस्त्वाह। मन्यः प्राणादिवायुवाहिन्यः शिरा रक्तवाहिन्यः पित्तश्लेष्मवाहिन्यः अंगप्रत्यं ८२
गसंधिबंधनार्थस्तिरस्नायव इति ता एव नाड्यस्त्रिधाभिधीयंत इति॥१२॥ शरीरेति। उपचि
ति। इच्छेति इच्छाप्रयत्नयोर्भावना आत्मजः स्वकृतप्राग्जन्मविपकर्मप्रभवाः न तु मातापि

तृनिरपेक्षाद्वेषादिप्रभवा इत्यर्थः। भावना स्मृतिजनकी कृतः संस्कारः। अत्र पूर्वोक्त
श्मश्रुलोमेत्यादिश्लोकत्रयेऽपि नाना इत्येतदनुवर्तमाने पितृसमुद्भवा इत्यादेर्विशेष्यं॥
अन्यथा नपुंसकमनपुंसकेनेत्यस्य प्रवृत्तौ पुल्लिंगनिर्देशानुपपत्तेरिति बोध्यं॥१४॥ तत्रेंद्रि
याणि द्विधा ज्ञानेंद्रियाणि कर्मेंद्रियाणि चेति तत्र ज्ञानेंद्रियाणि विभजते ज्ञानेश्रवणमित्यादि

॥इच्छा द्वेषः सुखं दुःखं धर्माधर्मौ च भावना॥ प्रयत्नो ज्ञानमायुश्च इंद्रियाणीत्येवमात्म
॥जाः॥१४॥ ज्ञानेंद्रियाणि श्रवणं स्पर्शनं दर्शनं तथा॥ रसनं घ्राणमित्याहुः पंच तेषां
॥तु गोचराः॥१५॥ शब्दः स्पर्शस्तथा रूपं रसो गंध इति क्रमात्॥ वाक्करांघ्रिगुदोपस्थान्या
॥हुः तेषां गोचराः विषयास्त्वाहुः कर्मेंद्रियाणि हि॥१६॥

नि। पंच ज्ञानेंद्रियाण्याहुः तेषां गोचराः विषयास्तान्यथाक्रमं शब्दस्पर्शादयः पंच वागादीनि तु
पंच कर्मेंद्रियाण्याहुः॥१६॥ वचनेति तेषां वागादीनां कर्मेंद्रियाणां क्रमात् वचनादयः पंच क्रियाः

एवं ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकं च निरूप्य उभयात्मकमिंद्रियमाह॥ मनः ततः प्रागुक्तेभ्यो दशभ्यः पृ
थक् तत् उभयात्मकत्वादित्यर्थः। तदाह याज्ञवल्क्यः हस्तौ पायुरुपस्थं च जिह्वापादौ च पंचकं कर्मे
न्द्रियाणि जानीयान्मनश्चैवोभयात्मकमिति बुद्धिरहंकारोंतःकरणं चित्तं चेति चतुष्टयमपि मन एवे
त्यन्वयः। एकस्यैव मनसोवस्थाचतुष्टयेन संज्ञाचतुष्टयमित्यर्थः॥ ननु मनसो बुद्धींद्रियत्वम
नुपपन्नं असाधारणविषयाभावात् वैशेषिकनैयायिकादिभिर्मनस्त्वेनाभ्युपगतानां सुखा

॥ पर्चनादानगमनविसर्गरतयः क्रमात्॥ क्रियास्तेषां मनोबुद्धिरहंकारस्ततः परं॥१७॥
॥ अंतःकरणमित्याहुश्चित्तं चेति चतुष्टयं॥ सुखं दुःखं च विषयौ विज्ञेयौ मनसः क्रियाः॥
॥१८॥

दीनामस्मन्निर्दिष्टानां साक्षिमात्रभास्यत्वादित्याशंक्याह॥ सुखमिति॥ अंतःकरणोपहितस्यैव साक्षि
त्वात् सुखादिज्ञानोपयोगोस्त्येव मनसः। तावन्मात्रेणैवेंद्रियत्वं परिभाष्यत इति भावः स्मृतिनीति ८२
प्रभृतयः मनसः क्रिया इत्यन्वयः। अनेन कर्मेंद्रियत्वं समर्थितं बुद्धिकर्मेंद्रियसहकारित्वादुभयात्म
कत्वं परिभाष्येति तु विज्ञानेश्वरः॥१८॥

बुद्ध्यादिसंज्ञाचतुष्टयमेकस्यैवेत्युक्तं तत्प्रयोजकमाह॥ बुद्धिः स्यादिति निश्चयात्मिका बुद्धिः अ
भिमानात्मकोहंकारः विचारात्मकं चित्तं इति त्रयाणां लक्षणं श्लोके उक्तं। चेतयत इति द्वयाणां
लक्षणं श्लोके उक्तं विचारयतीत्यर्थः॥ मनस्तु संकल्पविकल्पात्मिकेयोध्यंतरेव चांतःकरणं।
स्यादेतत् अंतःकरणं साक्ष्युपाधित्वात् सुखादिज्ञानोपयोगीत्युक्तमसंगतं सत्वस्यैव साक्ष्युपा

॥ स्मृतिर्नीतिर्विकल्पाद्याः बुद्धिः स्यान्निश्चयात्मिका॥ अहंममेत्यहंकारश्चित्तं चेतयते
॥ नियतः॥१९॥ सत्वाख्यमंतःकरणं गुणभेदात्त्रिधा मतं॥ सत्वं रजस्तम इति गुणाः स
॥ त्वात्तु सात्विकाः॥२०॥

धित्वात् श्रवणात् तथाच पैंगीरहस्यब्राह्मणे तदेतत्सत्वं येन स्वप्नं पश्यतीति स्वात्मगजादिना
सकलसाक्षिणं प्रत्युपाधितया सत्वमेव निर्दिष्टमित्याशंक्याह॥ सत्वाख्यमिति॥ अंतःकरणं दे
वसत्वाख्यमित्यन्वयः। अयं भावः उक्तं श्रुतावपि तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्वमित्यनेन
भोक्तृतया सत्वस्य॥

निर्देशात्प्रमातैव सत्वबुद्ध्यर्थः अत एव नातिप्रसंगोपि एतेनाविद्योपहित एव साक्षीत्यपि
परास्तं। अतिप्रसंगपरिहाराय प्रमातृत्वे दस्यावश्यकत्वे विद्यया किंचित्करत्वात्। स्फु
टं चैतन्न सिंहाश्रमग्रंथे इति दिक्॥ प्रसंगादाह॥ गुणभेदेति। उपादानीभूता विद्यागुणभे
दादंतःकरणमपि त्रिधेत्यर्थः। तत्र सत्वात् सात्विकाः आस्तिक्यप्रसन्नतयोमताः। आस्तिपरलो

॥कइत्येवंरूपमतिरास्तिक्यं शुद्धिर्मनोनैर्मल्यं धर्मे एका असाधारणरुचिः॥२१॥२२॥ दे

॥आस्तिक्यशुद्धिधर्मैकरुचिप्रसन्नतयोमताः॥ रजसो राजसा भावाः कामक्रोधमदादयः
॥२२॥ निद्रालस्यप्रमादादिवंचनाद्यास्तु तामसाः। प्रसन्नेंद्रियतारोग्यानालस्याद्यास्तु
॥सत्वजाः॥२२॥ देहो मात्रात्मकस्तस्मादाधत्ते तद्गुणानिमान्॥२३॥

कइत्येवंरूपा मतिरास्तिक्यं शुद्धिर्मनोनैर्मल्यं धर्मे एका असाधारणरुचिः॥२१॥२२॥ देह इति देहः स्थूलः
मात्रात्मकः प्रमातृतादात्म्येनाध्यस्तः अत एव तस्य प्रमातुर्गुणानादत्ते। अंतःकरणसत्वादिगुणोद्रे २३
कानुसारेण स्थूलदेहेपि तथा कार्याणि भवंतीत्यर्थः। कस्मात्कं धर्ममादत्ते इत्येतदेव विवेचयति॥२४॥

शब्द इति शब्दः श्रोत्रं चेत्यादीन् सप्त गगनादादत्ते इति संबंधः वैचित्र्यस्वभावो वैचित्र्यं क
र्मविशेषकुशलत्वेत्यर्थः। सूक्ष्मतेति लंघनक्रियोपयोगी लाघवविशेष इत्यर्थः। यद्यपि वायु
कार्यमध्ये लाघवं गणयिष्यति तथापि तत्तत्कार्यत्वान्न विरोधः न चैतत्नयादि सूक्ष्म
ताशब्दस्यार्थांतरं कल्प्यं आकाशकार्येषु लाघवस्य स्पष्टमेव सूत्रकृन्निरूपादानात्॥ तदाह याज्ञ

॥शब्दः श्रोत्रं मुखरता वैचित्र्यं सूक्ष्मता धृतिः॥ बलं च गगनाद्वायोः स्पर्शं च स्पर्शनें
॥द्रियम्॥२५॥ उत्क्षेपणमवक्षेपाकुंचने गमनं तथा॥ प्रसारणमितीमानि पंचकर्माणि
॥रूक्षताम्॥२६॥

वल्क्यः॥ आकाशाल्लाघवं सौक्ष्म्यमिति। सौक्ष्म्यं सूक्ष्मत्वमिति विज्ञानेश्वरोक्तव्याख्या वा इहापि
योज्या। वायोस्तु स्पर्शं स्पर्शनेंद्रियं पंचकर्माणि रूक्षतां प्राणादिदशवृत्तीः लाघवं चेति एको
नविंशतिपदार्थान् गृह्णातीति मध्ये कृतस्य पूर्वोक्तैः सर्वैः सह संबंधः रूक्षतां कर्कशत्वं स्पष्ट
मन्यत्॥२६॥

॥२५॥२६॥ प्राणादीनां वायुविशेषाणां स्थानानि चाह॥ तेषामित्यादिभिः सप्तभिः श्लोकैः तेषां पूर्वोक्तवायुका
र्याणां मध्ये प्राणो मुख्यतरः॥ स च नासे: कंठात्॥ नासिकं ठं च व्याप्य अवस्थितः स्यश्रो पेकर्माति
पंचमी अ सौ नासिकयोर्नासारंध्रयोः नाभौ हृदयं पंकजे च चरति॥ शब्दोच्चारणादीनां कारणं च प्र

॥ प्राणापानौ तथा व्यानसमानोदानसंज्ञकान्॥२५॥ नागं च कूर्मं च कृकलं देवदत्तं धनं
॥जयं॥ दशेति वायुविज्ञैस्त्यागग्रहातिलाघवं॥२६॥ तेषां मुख्यतरः प्राणो नाभेः कंठा
॥दवस्थितः॥ चरत्यसौ नासिकयोर्नाभौ हृदयपंकजे॥२७॥ शब्दोच्चारणनिश्वासोच्छ्वा
॥सादेरपि कारणं॥ अपानस्तु गुदे मेढ्रे कटिजंघोदरेष्वपि॥२८॥ नाभिकंठे वृषणयोरू
॥रूजानुषु तिष्ठति॥ प्राणायाम धृतित्यागग्रहणाद्यस्य कर्म च॥२९॥

८४

ण इत्यनुवर्त्तते॥ अपानस्त्विति गुदप्रभृतिषु अपानस्तिष्ठतीत्यन्वयः॥ प्राणायामप्रभृति अस्य
अपानस्य कर्म॥२९॥

समान इति निखिलं शरीरं व्याप्य संचरन् भुक्तस्य ओदनादेः पीतस्य च जलस्य रसान् सारांशान्
तान् परिणामविशेषान् सम्यक् तत्तदवयवानुरूप्येण आनयन् सन् देहस्य पुष्टीकरोतीति त
यान्नतः सन् समान इत्युच्यते अशरीरं व्याप्य संचरन्निति वदता अवस्थानं तु स्थलविशेषे इति सू
चितं। सर्वशरीरं व्याप्यावस्थानेव्यानेन सह अजेतपत्तेः यदाऽऽः हृदि प्राणो गुदेपानः समानो नाभि

॥ समानो व्याप्य निखिलं शरीरं वह्निना सह। द्विसप्ततिसहस्रेषु नाडीरंध्रेषु संचरन्॥
॥३०॥ भुक्तपीतरसान् सम्यक् आनयन् देहपुष्टिकृत्। तस्मात् द्विभेदं तु नाडिनां नित्य पंचकं नामंदक
॥३१॥ उदानः पादयोरास्ते हस्तयोरंगसंधिषु॥३१॥

संस्थितः। उदानः कंठदेशे स्यात् व्यानः सर्वशरीरग इति नियतस्थानान्यप्येते क्रियावशाच्छरीरं व्याप्नुवं
ति चक्षुरादिवदिति हीरस्वामी सम्यक् आनयन्नित्यनेन वानयते र्वं प्रत्यय नस्यैतानि रूपाणीति
योगशास्त्रसंमतोर्थः। स्फुटितत्तः अनित्यनेनेति अनितेः। करणे घञन्तानि रूपाणीति तु धातुवृ
त्तिकारास्य घपिनाडीरंध्राणां द्विसप्ततिसहस्रादाधि अपि स्मर्यते एकोनविंशत्सहस्राणि तथा
नवशतानि चाष्टपंचाशज्जानीतासिराधमनिसंज्ञिताः। इति याज्ञवल्क्याद्युक्तेः तथा पिहिता

स्थनाडीविशेषपरतयेदं बोध्यं।तथाच याज्ञवल्क्यः।छिद्रमतिसूक्ष्मालिहृदयादन्तिनिःसृताः हिता नाम ना
ड्यस्तासां मध्ये शशिप्रभं।मंडलं तस्य मध्यस्थ आत्मा दीप इवाचल इति इहापि दशमे वक्ष्यति हितं बलं प्र
यच्छंतीति यस्मात्तस्मात्तेन हिताः स्मृताः छिद्रमतिसूक्ष्मस्तैस्ताः संख्याता योगवित्तमैरिति॥३०॥३१॥३२॥३३॥
तेजसः कार्यमाह।अग्नेस्त्विति।अग्नेः रोचकप्रभृतीनाधत्ते इत्यन्वयः रोचयति प्रकाशयति घटादीनिति
रोचकं चक्षुरिंद्रियमित्यर्थः।तथाच गर्भोपनिषदि श्रूयते।शौर्यामर्षं तैक्ष्ण्यं पंक्तौष्ण्यं भ्राजिष्णुतासंतापव
र्णरूपं चेंद्रियाणि तैजसानीति।रूपमिति।स्वाभिकादौ स्यार्थ इति विज्ञानेश्वरादयः।दीप्तं दीप्तिः सुकरूप
विशेष इति यावत् गोबलीवर्दन्यायेन रूपात्पृथगुपादानं दीप्तौ दीप्तौ।नपुंसके भावे क्तः।पाकं भुक्त
स्यान्नस्य पचनं प्रकाशयतीति प्रकाशः तस्य भावः प्रकाशता स्फूर्त्ति विशेषः प्रतिभेति यावत्।अम

॥अग्नेस्तु रोचकं रूपं दीप्तं पाकं प्रकाशतां।अमर्षतीक्ष्णतासूक्ष्मामोजस्तेजश्च शूरतां॥३४॥

मर्षः कोपः तीक्ष्णः तीक्ष्णत्वं परिभवासहिष्णुत्वमिति यावत्।सूक्ष्मेत्यपि भावप्रधानो निर्देशः सू
क्ष्मत्वमिति।कारकशेषे षष्ठी न माषाणामश्नीयादितिवत्।ईदृशे विषये तु रूपशब्दाध्याहार इ ८५
ति तु चेतु वर्द्धमानमिश्राः।ओज इति शरीरस्थितिप्रयोजकतया पूर्वोक्तं तपश्चान्यत्रापि स्मर्य ८५
ते॥हृदि तिष्ठति यच्छुद्धमीषदुष्णं सपीतकं।ओजः शरीरं संख्यातं तन्नाशान्नाशमृच्छतीति।ते
जः संतापः शूरता पराक्रमः॥३४॥

मेधावितां धारणावत्वं।धीर्धारणावती मेधेत्यमरः॥अस्मायेत्यादिना विनिप्रत्ययः रसनं रस
यास्वकमिंद्रियं स्नेहं स्निक्कणता।गात्रस्य शरीरस्य आदिशब्दात्तदवयवानां मृदुता॥३५॥गौरवं
गरिमाणं।प्रसंगाच्छरीरधारकान् सप्तधातून् विवेचयति।त्वगिति।त्वक्प्रभृतयः सप्तधात
वः दधति शरीरमिति व्युत्पत्त्या एतेन च कदलीस्तंभवत् इव बाह्याभ्यंतररूपेणाव्यवस्थिताः आयुर्वे

॥मेधावितां तथाधत्ते जलाच्चरसनं रसं।शैत्यं स्नेहं द्रवं स्वेदं गात्रादिमृदुतामपि॥३५॥भूमे
॥घ्राणेंद्रियं गंधं स्थैर्यं धैर्यं च गौरवं।त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः॥३६॥

देतु त्वक्स्थाने रसशब्दः पठितः तथा चात्र रसो जठराग्निना।पच्यमानोऽसृक् भवतीत्यादि।पित्त
कोशस्थेनाग्निना पच्यमानं मांसं भवति॥तदपि स्वकोशस्थेनाग्निना पच्यमानं मेदो भवतीत्यादि शुक्रं
क्रुचरमो धातुः इत्यादि निलीनं स्मृति विशेषेषु असृगादयः षडेव धातुत्वेन परिगणिता इति दिक्।सि
तनिगमीत्यादिना कर्त्तरि तुप्रत्यये कृते क्त्यादिने धातुशब्दो व्युत्पादितः॥३६॥

उक्तानां धातूनां तत्प्रसंगाच्च शरीरांतर्गतानामन्येषामपि परिणामिकारणं प्रपंचयति। अन्नमित्यादिना। अनेयं कृतिसिद्धा प्रक्रिया पुरुषेणाशितं भक्षितं। अन्नमोदरादिजठराग्निना पच्यमानं त्रेधा जायते। स्थूलमध्यमासूक्ष्मभेदात्। अत्र स्थूलो भागः पुरीषं जायते मध्यमो मांसं कनिष्ठः सूक्ष्मं मनो जायते अत एवाह श्रुतिः। अन्नमयं हि सोम्य मन इति एवा पृथिव्याः स्थूलातिश

॥अन्नं पुंसाशितं त्रेधा जायते जठराग्निना। मलः स्थविष्ठो भागः स्यान्मध्यमो मांसतां व्रजेत्॥
॥३७॥ मनः कनिष्ठो भागः स्यात्तस्मादन्नमयं मनः। अपां स्थविष्ठो मूत्रं स्यान्मध्यमो रुधिरं
॥भवेत्॥३८॥ कनिष्ठो भागः प्राणः स्यात्तस्मात्प्राणो जलात्मकः। तेजसोस्थि स्थविष्ठः स्यान्मज्जा
॥मध्यसमुद्भवः॥३९॥

एवं अपामपि स्थूलो भागो मूत्रं भवति। मध्यमस्तु रुधिरं कनिष्ठस्तु प्राणो भवति एवं तेजः स्थूलो भा
गोस्थि मज्जा स्वधातुर्मध्यात्॥ तेजसो मध्यमभागात्समुद्भवो यस्य तथा भूतः कनिष्ठस्तु चक्षुरिंद्रि ८९
यादीन्यन्यतो बोधव्यं॥३७॥३८॥३९॥

नाड्योपीति मांससंघातान्नाड्यो भवंति॥ अपि शब्दोनेदं धातुः शुक्रं चरमधातुरूपं मज्जः समुद्भवो यस्य तथाभूतं किंच अत्र शास्त्रे वातादयोपि धातव इति कीर्तिताः तेषामपि शरीरधारणहेतुत्वात्॥४०॥ इदानीं सार्द्धश्लोकद्वयेन शारीराणां रसादीनां परिमाणमुच्यते॥ मूत्रपुरीषादिप्राचुर्यज्ञानस्यापि वैराग्यहेतुत्वात् तत्र रसादिपरिमाणं यद्यप्यनवस्थितं वैलक्षण्यात्

॥नाड्योपि मांससंघाताच्छुक्रं मज्जसमुद्भवं। वातपित्तकफाश्चात्र धातवः परिकीर्ति
॥ताः॥४०॥ दशांजलिर्जलं ज्ञेयं रसस्यांजलयो नव। रसस्याष्टौ पुरीषस्य सप्त स्युः श्ले
॥ष्मणश्च षट्॥४१॥

शारीराणामवस्थायित्वात्तथैव च दोषधातुमलानां च परिमाणं न विद्यत इत्याशंक्य आयुर्वेदस्मरणात्तथापि स्त्रौ सर्गिकीरीतिमनुरुध्य परिमाणाभिधानं न दोषाय दशेति शरीरे पार्थिवजलानां परस्परसंश्लेषनिमित्तं तस्य उपष्टंभकजलस्य दश अंजलयः प्रमाणम् इत्यर्थः। सम्यक् परिणतस्याहारस्य सारो विकारो रसः तस्य परिमाणं नवांजलयः श्लेष्मणः कफस्य षडंजलयः॥४१॥ ॥

पित्तस्य पंच अंजलयः मूत्रस्य चत्वारः वसायाः मांसस्नेहस्य त्रयो ऽंजलयः मेदसो मांसरसस्य
द्वावंजली मज्ज्ञास्तु अंजलिपरिमितो बोध्यः सारो मज्जा नरीत्यमरः नरी पुंसीत्यर्थ इति स्वामी॥४२॥
अर्द्धं इति शुक्रं तु अर्द्धांजलि तच्च बलप्रदत्वाद्बलमुच्यते। अस्थ्नां तु षष्ट्युत्तरं शतत्रयं बोध्यं तच्च स्ख
त्रैः सह चतुःषष्टि र्दंता वै विंशतिर्नखा इत्यादिश्लोकषट्केन याज्ञवल्क्यस्मृतौ। प्रपंचितं अनतिप्र

॥पित्तस्य पंच चत्वारो मूत्रस्यांजलयस्त्रयः। वसाया मेदसो द्वौ तु मज्जा त्वंजलिसंमिता।
॥४२॥ अर्द्धांजलि ततः शुक्रं तदेव बलमुच्यते। अस्थ्नां शरीरसंख्या स्यात्षष्टियुक्तं शत
॥त्रयं॥४३॥ जलजानि कपालानि रुचकास्तरुणानि च। नलकानीति तान्याहुः पंचधा
॥स्थीनि सूरयः॥४४॥

योजनत्वान्नेह प्रपंच्यते॥४३॥ जलजानीति॥ अस्थीनि पंचधा पंचप्रकाराणि तद्यथा जलजा
नि कवः कर्णयोश्च मध्यप्रदेशे शंखाकारमस्थिद्वयं जलजः शंखवत्तदाकारत्वात् जलजशब्देनो ७
क्तं कपालानि शिरःसंबंधानि चत्वारि यथाह याज्ञवल्क्यः द्वौ शंखकौ कपालानि चत्वारि शिरसा
स्तथेति॥४४॥

षपार्थः॥ रोम्णां सार्द्धकोटित्रयं तिस्रः कोट्यः ऽर्द्धकोटिश्चेत्यर्थः श्मश्रूणि केशाश्च मिलित्वा त्रिलक्षमान
म्॥ यस्मादिति यस्माद्देहस्वरूपात्सारःपदार्थो भुवनत्रये पि नास्ति तादृशं देहस्वरूपं एवं पूर्वोक्त
प्रकारेण वर्णितमिति संबंधः॥४८॥ देहेस्मिन्निति॥ अस्मिन्निति अस्मिन् उक्तरूपे देहे अहंकारेण कर्त्रा
पापेन क्रियते हंत सांप्रतं॥ तं हेतुना महोपाये मोक्षोपाये बुद्ध्या विचाराः न क्रियंते॥ हंतेति खेदे अनु

॥द्वेशते त्वस्थिसंधीनां स्यातां तत्र दशोत्तरे॥ रोरवाः प्रसरा स्कंदसेचनाः स्युरुलूखल
॥लाः॥४५॥ समुद्गा मंडलाः शंखावर्त्ता वायनकुंडलाः। इत्यष्टधा समुद्दिष्टाः शरीरे
॥ष्वस्थि संधयः॥४६॥ सार्द्धकोटित्रयं रोम्णां श्मश्रुकेशास्त्रिलक्षकाः। देहस्वरूपमेवं
॥ते प्रोक्तं दशरथात्मज॥४७॥ यस्मादसारो नास्त्येव पदार्थो भुवनत्रये। देहेस्मिन्नभि
न ॥मानेन महोपायबुद्धयः॥४८॥ अहंकारेण पापेन क्रियते हंत सांप्रतं॥ तस्मादेत
॥स्वरूपं तु विबोधव्यं मनीषिभिः॥४९॥ ॥इति श्रीपद्मपुराणे शिवगीतायां नव
मोध्यायः॥ ॥

चितमेतदित्यर्थः। पद्मामहः उद्धव उत्सव इत्यमरवचनात् महो मोक्षोत्सवः तदनु॥ महसः जीवनरूपस्य

इतियावत् उक्तरीत्यादिकश्रमस्तेनतुगुरेवदेहे अजरामरत्वबुद्ध्यः क्रियत इति महदेतदनुचितमि
तेजोविशेषस्य अपायोगमः मरणमितियावत्। महोपायोनविद्यतेमरणं यस्येतितथा अजरा
मरइत्यर्थः। तस्मादेतस्याहंकारास्पदीभूतस्य स्वरूपमवश्यंबोध्यं॥ विरक्तिदार्ढ्यायेतिभावः॥४९॥
॥इतिश्रीशिवगीताव्याख्यायांनवमोध्यायः॥ ॥अत्रअस्मिन्पूर्वोक्तेजंतोर्देहेजीवः॥ किम
वतिष्ठतेजायतेवा॥ वद॥ किंचजीवः कुतः जीवत्वं किंस्वात्माविकं आविद्यकंवेतिवद॥ अस्यजीवस्य
॥श्रीरामउ०॥ भगवन्नत्र जीवोसौजंतोर्देहेवतिष्ठते॥ जायतेवा कुतोजीवः स्वरूपंवस्यकिं
॥वद॥१॥ देहांतेवाकुत्रयातिगत्वावाकुत्रतिष्ठति॥ कथमायातिवादेहं पुनर्नयदिवाव
॥द॥२॥ श्रीभगवानु०॥ साधुपृष्टंमहाभागगुह्याद्गुह्यतमंत्वहि। देवैरपिसुदुर्ज्ञेयमिंद्राद्यैर्वामहर्षिभिः॥३॥
स्वरूपंवाकिंसच्चिदानंदात्मकंतद्भिन्नलक्षणंवेत्यर्थः॥ देहांतइति देहांतेचजीवः कुत्रगच्छतिकुत्र
वतिष्ठतिइत्यादिसर्वंवद॥ पुनर्देहंकथमायातियदिवापुनर्देहंनायाति। तदपिवद। अत्रसर्वेषुप
क्षेषुदूषणंनिष्प्रत्यूहंन इतिभावः॥ तथाहि। यदिजीवोव्यापकः सन्नवतिष्ठते। तर्हिमरणं देज
वस्यगमनादिकंश्रूयमाणंबाध्येत यदिजायते तर्हिकृतहानमकृताभ्यागमश्चस्यात्॥ एवंजीव ८८
त्वस्यस्वाभाविकत्वे अमरणंस्यात् जीवस्यानेकत्वेपिसाम्यभावविकल्पस्यात्। विरुद्धधर्माध्यासात्। आवि
द्यकत्वेतज्जन्यतापत्तौप्रागुक्तदोषानतिवृत्तिः एवंजीवसच्चिदानंदत्वरूपेमुक्तिदशातोविरोधा

॥अन्यस्यैनैववक्तव्यंमयापिरघुनंदनः। त्वद्भक्त्याहंपरंप्रीतोवक्ष्याम्यवहितः शृणु॥४॥ मूलनोल्लोकले१
पत्तिः॥ तद्विपरीतत्वेतुपरीतत्वेतुपरमप्रेमास्पदत्वाद्यनुपपत्तिः गमनागमनादिसत्वेपरिच्छिन्नत्वा
पत्तिः तद्विरहेतुस्वर्गनर्कादिप्रतिपादकबहुलरवचनविप्लवापत्तिरिति॥२॥ साधुपृष्टमिति। प्रा
गुक्तसर्वपक्षेषुबाधकस्फूर्तिसंभवात् तदुद्धारस्यचगुरूपदेशंविनास्वतंत्रेक्षितुमशक्यत्वात्।
५ इतिभावः इंद्राद्यैर्देवैरपिसुदुर्ज्ञेयंमहर्षिभिश्चसुदुर्ज्ञेयमित्यर्थः। वाशब्दःसमुच्चये॥३॥४॥ अव्यक्तइति।
अविद्ययाजीवान्प्रत्यावृतइत्यर्थः व्यक्तिकारणं घटादिजासकः॥५॥ विशुद्धः बंधरहितः निर्लेपश्चपचय
॥सत्यज्ञानात्मकोनंतः परमानंदविग्रहः। परमात्मापरंज्योतिरव्यक्तोव्यक्तिकारणं॥५॥
॥नित्योविशुद्धःसर्वात्मानिर्लेपोहंनिरंजनः। सर्वधर्मविहीनश्चनग्राह्योमनसापिच॥६॥
॥नाहंसर्वेंद्रियग्राह्यः सर्वेषांग्राहकोह्यहं। ज्ञाताहंसर्वलोकस्यममज्ञातानविद्यते॥७॥
शून्यः लिपउपदेहोवृद्धिरितिधातुवृत्तिकाराः निरंजनः गमनरहितः अंजुव्यक्तिम्रक्षणकांतिगतिषु
इतिधातोःस्मृतेः। अतः सर्वधर्मविहीनश्चेत्यनेनसहविरुद्धनिर्लेपनिरंजनशब्दानांनपौनरुक्त्यं
नाहंसर्वेतितथाचश्रुतिः। नचक्षुषागृह्यतेनापिवाचानान्यैर्देवैरितिदेवैः इंद्रियैरित्यर्थः। नचैवं
सर्वप्रयत्नवेद्येचब्रह्मरूपेमयवस्थितेइतिवार्त्तिकविरोधः प्रपंचतादात्म्यापन्नस्यसकलप्रमा
णगोचरत्वेपिशुद्धस्योपनिषदेकगम्य॥ ॥ज्ञातइतस्त्रयोनित्याधिकरणद्वितीयवर्णकेन
वेवसिद्धांतितत्वात्॥७॥

परिणामादिकस्येत्यादिपदद्वारं तन्निरासः। विवर्त्तस्तु पूर्वाध्याये स्फुटमभ्युपगतोधिष्ठानेनु
मय्येवेत्यादिना॥४॥ यतो वाच इति। षष्ठाध्याये व्याख्यातमेतत्।८। न विजुगुप्सत इति। आत्मात्मनै
व सर्वग्रहणात् किंचदपि निंदतीत्यर्थः॥९॥ गूढात्मेति। गूढः आत्मेति पदच्छेदः पृषोदरादि

॥ईशः सर्वविकाराणां परिणामादिकस्य च॥ यतो वाचो निवर्त्तंते अप्राप्य मनसा स
॥ह। आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चन।८। यस्तु सर्वाणि भूतानि मय्येवेति
॥प्रपश्यति॥ मां च सर्वेषु भूतेषु ततो न विजुगुप्सते।९। यस्य सर्वाणि भूतानि ह्या
॥त्मैवाभूद्विजानतः। को मोहस्तत्र कः शोक एकत्वमनुपश्यतः॥१॥ एषु सर्वेषु भूते
॥षु गूढात्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदृष्टिभिः॥२॥ अनाद्य
॥विद्यया युक्तस्तथाप्येकोहमव्ययः। अव्याकृतब्रह्मरूपो जगत्कर्त्ताहमीश्वरः॥३॥ ८९

प्रकृतेर्निर्वृति

त्वासाधुः। यद्वा गुः गूढात्मा वर्णविशात्पृषोदरमिति॥२॥ ननु अद्वितीयश्चेत्त्वं तर्हि कथं जगदुत्पत्ति
स्त्वत्तः स्यात् परिणामविरहादित्याशंक्याह। अनादीति। अव्याकृतं नाम रूपात्मनानभिव्यक्तस्वरू
पं अविद्याशबलं ब्रह्म तेन तत्स्वरूपोहं जगत्कर्त्तेति संबंधः॥३॥

ज्ञानमात्र इति। ज्ञानमात्रस्यैवाविद्याविषयतयाधिष्ठानत्वात् तत्रैव परिदृश्यमानं जगदध्यस्तं तथा
च जाग्रत्प्रपंचो मिथ्या दृश्यत्वात् स्वप्नप्रपंचवदित्यनुमानमप्यल्पक्लेशेनोपष्टंभकतयोक्तं॥४॥ ननु चे
तावता प्रबंधेन परमात्मस्वरूपे निरूपितेपि अध्यायोपक्रमोक्तेषु जीवविषयेषु मदीयप्रश्नेषूत्तरं
न लब्धमेवेत्याशंक्याह॥ नान्येति। अहमेव जीवत्वेन वसामीति संबंधः। अनेन जीवस्वरूपं कीदृशमिति प्र

॥ज्ञानमात्रे यथा दृश्यमिदं स्वप्ने जगत्त्रयं। तद्वन्मयि जगत्सर्वं दृश्यतेस्ति विलीयते॥४॥
॥नानाविद्यासमायुक्तो जीवत्वेन वसाम्यहं॥५॥

श्ने सच्चिदात्मकमित्युत्तरं सूचितं। उत्पद्यते न वेति प्रश्नेनोत्पद्यत इति चोत्तरितं नानाविद्यास
मायुक्त इत्यनेनानादेरपि जीवत्वस्य अविद्यास्थित्यधीनस्थितिकत्वरूपं आविद्यकत्वं न विरुध्यत इ
ति सूचितं। नानेत्यनेनाश्वकादेर्मुक्ततया इदानीं संसारो नोपलभ्येतेति दूषणमुक्तं। अविद्याशब्देनैवाव
रणशक्तिः सूच्यते। पूर्णानंदः सन् यथावत्तत्त्वाद्यामोक्षं न जानाति पश्चात्तु जानातीति। मुक्तसंसारित्वविं
शेषोप्युपपादितः। लोकांतरगमनादिकं कथमिति परं अवशिष्यते तदपि लिंगशरीरोपहितस्य नानु
पपन्नमिति प्रपंचयति॥५॥

पंचेति। पंचइदमेव आचार्याः संजगुः पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं। अपंचीकृतभूतोत्थंसू
क्ष्मांगंभोगसाधनमिति॥१६॥ तत्रलिंगशरीरे अविद्ययासमायुक्तं अधिष्ठानत्वेनतादात्म्यापन्न
मित्यर्थः॥ एवंभूतंप्रतिबिंबचैतन्यंव्यावहारिकोव्यवहारक्षमोजीवः इत्यन्वयः॥१७॥ अनाद्ययोः
नआद्ये अनाद्ये तयोः प्रवाहरूपेणानादिमतोरित्यर्थः॥१८॥ आत्मापीति। प्रतिबिंबितचैतन्यम
पीत्यर्थः। तथाच औपाधिकरूपामलावदात्मवत्संसारःसर्वेषुलोके अपिव्यवस्थितः इतिभावः।

॥पंचकर्मेंद्रियाण्येवंपंचज्ञानेंद्रियाणिच। मनोबुद्धिरहंकारश्चित्तंचेतिचतुष्टयं॥ वा
॥यवःपंचमिलितायांतुलिंगशरीरतां॥१६॥ तत्राद्यविद्यासमायुक्तंचैतन्यंप्रतिबिं
॥बितं। व्यावहारिकजीवस्तुक्षेत्रज्ञःपुरुषोपिवा॥१७॥ सएवजगतांभोक्तानाद्ययोःपु
॥ण्यपापयोः। इहामुत्रगतीतत्रजाग्रत्स्वप्नादिभोक्तृता॥१८॥ यथादर्पणकालि
॥म्नामालिन्यंदृश्यतेमुखं। तद्वदंतःकरणगैर्दोषैरात्मापिदृश्यते॥१९॥ परस्परा ९०
॥ध्यासवशात्स्यादंतःकरणात्मनोः। एकीभावाभिमानेनपरात्मादुःखभागि
व॥२०॥

दुःखभागिवेति। इवशब्देनदुःखस्यविषमकर्तृकतांसूचयति अरुणइवस्फटिकोदृश्यतइत्याहै
यथा॥२१॥

मूढचित्तस्याविनदिजस्यत्वेनगृह्यमाणामरुणिमरीचयः आर्द्राः किंतुसंतापकारकाएवत
तूस्वाविद्यात्मनास्वविषयकाविद्यारूपेण आत्मदोषेणकर्तृत्वादिधर्मवान्दृश्यतेनत्वेतावता
अकर्तृकत्वादिस्वभावभंगइतिभावः इदमेवाभिप्रेत्याहुर्भाष्यकाराः। यत्रयदध्यासः सतत्कृ
तेनाणुनापिगुणेनदोषेणवानलिप्यतइति अन्येप्याहुः आरोपितेनारुणिम्नास्वाभाविकस्व

॥मरुन्मौजलत्वेनमध्याह्नार्कमरीचिकाः॥२१॥ तद्वदात्मापिनिर्लेपोनैनारूढोदृश्यतेमू
॥ढचेतसां। स्वाविद्यामात्रदोषेणकर्तृत्वादिकधर्मवान्॥२२॥ तत्रचान्नमयेपिंडेहृदि
॥जीवोवसतीष्यति॥

रिकस्वच्छतानपायादिति। मिथ्यानुघटकीभूतभावंगृहीत्वा अकर्तृकत्वादिव्यवहारा अपितप
र्यंतइतिफलितोर्थः॥२२॥ छांदोग्यस्याष्टमाध्याये अथयदस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्म
दहरोस्मिन्नंतरआकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यंतद्वावविजिज्ञासितव्यमित्यादिनादहर
विद्याश्रूयतेतद्विवरणमुखेनव्यापकस्याप्यौपाधिकपरिच्छेदं॥ पूर्वोपदिष्टंद्रढयति। तत्रैव

त्यादिना। अत्र अविद्यावच्छिन्ने अन्नमयो यः पिंडः तस्मिन् देहे आनखाग्रं व्याप्यापि जीवो हृद्यवति
ष्ठते। तुपाध्यंतरेणात्यंतं अल्पपरिमाणत्वान्न जतइत्यर्थः। तदेतत् अग्रे विवृणोमि अवहितः सन्
शृणु॥२३॥ सोयमिति। सोयं मांसपिंडः तदभिमानेन तत्तादात्म्याध्यासबलेन विराजते मनुष्योहं
गौरोहमिति स्फूर्तिं लभते। तथाच आनखाग्रं स्थूलदेहव्याप्तौ नसंदेग्धव्यं अन्यथा साक्षित्वात्माभा तू

॥आनखाग्रं व्याप्य देहे तद्ध्रुवे वहितः शृणु॥२३॥ सोयं तदभिमानेन मांसपिंडो विराजिते॥
॥नाभेरूर्ध्वमधः कंठाद्व्याप्य तिष्ठति यत्सदा॥२४॥ तस्य मध्येस्ति हृदयं सनालं पद्मकोश
॥वत्॥ अधोमुखं च तत्रास्ति सूक्ष्मं सुषीरमुत्तमं॥२५॥

वाद्देहस्य ज्ञानानुपपत्तेरित्यर्थः। इदानीं हृदयावच्छेदप्रयुक्तामल्पतां प्रपंचयितुं हृदयस्वरूपं
तावदाह॥ नाभेरूर्ध्वमिति यत्प्राणवायुस्वरूपं नाभेरूर्ध्वं कंठाच्चाधस्तिष्ठति तस्य मध्ये पद्मकोश २४
निभं अधोमुखं हृदयं अस्ति तत्र हृत्पद्मे सुषीरमस्ति॥२५॥

त्र
दहरशब्दोल्पपर्यायः तदेवं तत्र चान्नमये इत्यादिना साई श्लोकद्वयेनोक्तिः स्यात् ब्रह्मपुरपदं ब्रह्मणःपु
रमिति। कृत्स्नस्य ब्रह्मोपलब्धिस्थानत्वात् विद्याधिकारिशरीरं पुरमिति स्फुटीकृतं। उक्तं च उपलब्धेरु
रधिष्ठानं ब्रह्मणो देह उच्यते। तेनासाधारणत्वेन देहो ब्रह्मपुरं भवेदिति तत्रास्ति सुषिरं इत्यपत्नाम्न
दहराकाशमित्युक्तमाय यद्यपि श्रौत आकाशशब्दः छिद्रपर इति प्रतीयते तत्र जीव इत्युक्तं च तस्मि

॥दहराकाशमित्युक्तं तत्र जीवो वतिष्ठते॥२५॥

न्यदंतरिति श्रुतौ तत्र च्छिद्रपरौ यत्तत्र जीवपर इति प्रतीयते तत्र वायुक्तं दहर उत्तरेभ्य इ
त्यधिकरणे ब्रह्मैवात्राकाशशब्दार्थ इति निर्णीतत्वात् आकाशोवै नाम रूपयोर्निर्वहिता आका
प्र शाद्वसमुद्यंत इत्यादिश्रुतिष्वाकाशशब्दस्य ब्रह्मपरतया सुप्रसिद्धत्वाच्च आकाशस्तल्लिंगादिति
सूत्रे तथैवाभिधानाच्च न चैवं तस्मिन् यदंतरित्यादेरन्वयः तत्र हृदयस्थव्यवहितपुंडरीकपराम
र्शकत्वात्। तथाच स्कंदपुराणे ब्रह्मगीतायामुक्तं अस्मिन् ब्रह्मपुरे वेश्म दहरं यदिदं सु[illegible]पुं रा॰ ॥३॥
डरीकं तु तन्मध्ये आकाशो दहरोस्ति तु स शिवः सच्चिदानंदः सो न्वेष्टव्यो मुमुक्षुभिः इति तथापि
[illegible]च्छिद्रं रंध्रं श्वभ्रं वपा सुषिरित्यमरः। तां रात्रिमारत्नेष्वधिष्ठानत्वादिति सुषिरं अधिष्ठानं अत
सुषिच्छि

एवोत्तमं। तदेव च हृदाकाशमिति श्रुत्या उक्तमिति शिवगीताश्लोको व्याख्येयः तत्र पूर्वोक्ते हृदये
योवतिष्ठते सजीव एवेति जीवब्रह्मणोरनेदपरश्रुत्यर्थवरणः अ नत एवास्मिन्प्रकरणेनेनेअ
स्मिन् द्यावापृथिवी अंतरेवसमाहिते इत्यादिना अशेषजगद्धारत्वं स सेतुरिति च जगन्मर्यादा द्रा
धारकत्वमिति ब्रह्मलिंगानि तथा एव संप्रसादोस्माच्छरीरात्समुत्थायेति सुषुप्त्यादि जीवलिंगा

॥वालाग्रशतभागस्य शतधा कल्पितस्य च॥ भागो जीवः स विज्ञेयः स चानंत्याय
॥कल्प्यते॥२६॥

२५

नि च श्रूयमाणानि न विरुध्यंत इति दिक् वालाग्रं केशाग्रं तस्य शतभागः शतांशः सोपि शतधा रि
कल्प्यः। तस्यापि यो भागः स जीवो विज्ञेयः। उपाधिवशादतिसूक्ष्म इत्यर्थः॥ वास्तवं तु जीवस्वरूप
माह। स चेति। आनंत्याय परिछेद विरहाय कल्प्यते उपाध्यपगमे सतीति भावः॥२६॥

अथ यत्रैतस्माच्छरीरादुत्क्रामति अथैतैरेव रश्मिभिरूर्ध्व आक्रमते इति च तयोर्ध्वमायन्निति
च दहरविद्याशेषश्रवणात्तत्प्रसंगादुपासकानां मूर्धन्यया नाड्या उत्क्रमणं पूर्विकां क्रम
मुक्तिं कथयितुं नाडीस्तावत् प्रपंचयति कदंबेति॥२७॥ हितमिति हितशब्दस्य विवरणं बलमि
ति। प्रयच्छंति यस्मादिति तथा च हितं कुर्वंति हितयंतीति हिताः। तत्करोति णिच् तात् पचाद्यच्

॥कदंबकुसुमोद्भूतकेसरा इव सर्वतः॥ प्रसृता हृदयान्नाड्यो याभिर्व्याप्तं शरीरकं॥२७॥
॥हितं बलं प्रयच्छंति तस्मात्तेन हिताः स्मृताः॥ द्वासप्ततिसहस्रैस्ताः संख्याता योगवि
॥त्तमैः॥२८॥ हृदयात्ताः स्म निष्क्रांता यथार्काद्रश्मयस्तथा॥ एकोत्तरशतं तासु मुख्या
॥विष्वग्विनिर्गताः॥२९॥

इति भावः। हिता नाम हृदयस्य नाड्य इति श्रुतिसिद्धैषा संज्ञा॥ याज्ञवल्क्यस्त्वाह द्वासप्ततिसहस्रा
णि हृदयादभिनिःसृताः हिताहिता नाम नाड्य इति तत्रापि हिताः हिताकार्यः। अत एव हितानामेति श्रु
वीतनैकवाक्यतयैव व्याख्येयं हितमाप्तिहितं दत्तं याभिस्ताभि हिताहिता इति संज्ञांतरमेव तत्रोक्तमि
ति केचित्॥२८॥ विष्वगिति सर्वतः इत्यर्थः॥२९॥

एकानाडी सुषुम्णाख्या अंजसा आंजस्येन मूर्धपर्यंतं ऊर्ध्वं गच्छतीति ऊर्ध्वगा अनंतफल
त्वाच्चानंता सैवोच्यते ॥२०॥ अनंतफलत्वमेव विशदयितुं इतरासां फलं तावदाह ॥ प्रतीन्द्रियमि
ति ज्ञानकर्मेंद्रियाणि मिलित्वा दशेति हि कल्पादितं प्राकृतत्रैकैकमिंद्रियं प्रतिदशनाड्यः नि
र्गताः ताश्च शतनाड्यः शर्मादिहेतुत्वात् । सुखदुःखादौ ज्ञानादौ च हेतुत्वात् स्वप्नवत् तत्राच्च

॥ वदंत्यं तोयथा नद्यो नाद्यः कर्मफलं तथा ॥ अनंतैकोर्ध्वगा नाडी मूर्धपर्यंतमंजसा ॥
२६श ॥२०॥ प्रतीन्द्रियं दशशो निर्गता विषयोन्मुखाः ॥ नाड्यः शर्मादिहेतुत्वात् स्वप्नादिफल
॥ मुक्तये ॥२१॥ सुषुम्णेति समादिष्टा तया गच्छन् हि मुच्यते ॥ तयोपचितचैत
॥ न्यं जीवात्मानं विदुर्बुधाः ॥२२॥

यथायथं जाग्रदादिभोगाय उपयुज्यंते ॥२१॥ सम्यगादिष्टा समादिष्टा अनंतफलत्वात् प्राणु
दाहृता आहृता या नाडी सा तु सुषुम्णा तया गच्छन् हि मुच्यते हि तस्मादनंतत्वोक्तियुक्तेत्यर्थः हि शब्दः ६३
प्रसिद्धौ तथा च श्रुतिः शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमाय
न्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवंतीति न नु सुषुम्णया निर्गमनं मोक्षोपायइत्युक्तिरं

संगता ज्ञानादेव तु कैवल्यमिति शास्त्रसिद्धांतत्वात् प्रसंगादित्याशंक्याह ॥ तयेति उपचि
तं आविर्भूतं चैतन्यं ज्ञातुं उपास्यगोचरं मार्गगोचरं च यस्य तथा भूतं जीवमा उः अ
यं भावः नेह परममुक्तिरुत्क्रमणाजन्येति विवक्षितं तत्रोत्क्रमणस्यैवाभावात् ॥ तथा
च श्रुतिः । न तस्य प्राणा उत्क्रामंतीहैव समवलीयंत इति किंतु ब्रह्मलोकावाप्तिरूपा गौ
णी मुक्तिः तथा चोपासकस्य पुरुषस्य तदेकोग्रज्वलनं तत् प्रकाशितद्वारो विद्यासाम
र्थ्यादित्यत्र वर्णितरीत्या सगुणोपास्यविषयिण्या मार्गविषयिण्या श्रवृत्ते हृदयोम
रणकाले भवतीति शास्त्रसिद्धं ॥ तादृग्वृत्तिविशिष्टस्योत्क्रमणपूर्वोक्तया नाड्या अ
र्चिरादिमार्गेण गमनं च शास्त्रसिद्धं तथा च तदुपर्यपि बादरायणः संभवादिति न्या
येन ब्रह्मलोक एव निर्गुणसाक्षात्कारोपपत्तौ क्रमेण परममुक्तिः । तदुक्तं । ब्रह्मणा
सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यांते कृतात्मानः प्रविशंति परं पदमिति ॥२२॥

ननुजीवस्यशरीरावछेदेनैवज्ञानात्॥मध्यपरिमाणत्वेनोचित॥अन्यथाशरीरानवछे
देनापिज्ञासेतेत्याशंक्यायांआह॥यथेति।सर्वगतस्यापिलिंगशरीरंअभिव्यक्तौप्रयोजक
मित्यर्थः॥३३॥३४॥ज्ञेयंघटादिकंअनतिक्रम्येतिनतिक्रम्येतियथाज्ञेयंअभिव्यक्ताघ

॥यथाराकुरदृशोपिदृश्यतेचंद्रमंडले।तद्वत्सर्वगतोप्यात्मालिंगदेहेपिदृश्यते।
॥३३॥दृश्यमानेयथाकुंभेघटाकाशोपिदृश्यते॥तद्वत्सर्वगतोप्यात्मालिंगदे
॥हेपिदृश्यते॥३४॥निश्चलःपरिपूर्णोपिगच्छतीत्युपचर्यते।जाग्रत्कालेयथात्मे
॥यमभिव्यक्तविशेषधीः॥३५॥व्याप्नोतिनिष्क्रियःसर्वान्ज्ञानुदृशादिशोयथा।ना
॥डीनिर्गतयोयांतिलिंगदेहसमुद्भवाः॥३६॥नत्तत्कर्मानुसारेणजाग्रद्भोगोपलब्धये।

टाद्याकारांतःकरणवृत्त्यानिवृत्तावरणविशेषधीर्घटाद्युपहितचैतन्यंयस्यतथाभूतःसन् ६४
सर्वान्पदार्थान्व्याप्नोतिप्रतिकर्मव्यवस्थाव्युत्पादनेस्फुटमेतत्॥३६॥वृत्तयःइंद्रियजन्यवृ
त्तयःयांतिप्राप्नुवंतिविषयंव्याप्यैवोत्पद्यंतइत्यर्थः॥ ३७

इदमितितद्व्यापीतेःसंसारव्यपदेशादितिसूत्रेस्थितमेतत्॥३७॥अवतिष्ठतइति।समवप्रविभ्यइ
तितङ्अत्रतद्वदितिशेषःपूर्वेणचान्वयः॥३८॥इदंलिंगशरीराख्यमामोक्षान्नविनश्यतीत्युक्तं।त
देवद्रढयितुंअवस्थात्रयेतत्सद्भावप्रतिपादयन्जाग्रदवस्थामभिधायस्वप्नावस्थामाह।जाग्र
दिति।जाग्रद्भोगप्रदंयत्कर्मतस्यक्षयःप्रतिबंधस्तद्वशात्स्वप्नभोगप्रदेकर्मणिउद्बुद्धेसतिअन्यामव

॥इदंलिंगशरीराख्यमामोक्षान्नविनश्यति॥३७॥आत्मज्ञानेननष्टेस्मिन्साविद्येस्वश
॥रीरके।आत्मस्वरूपावस्थानंमुक्तिरित्यभिधीयते॥३८॥उत्पादितेघटेयद्वत्घटाका
॥शत्वमृच्छति॥घटेनष्टेयथाकाशःस्वरूपेणावतिष्ठते॥३९॥जाग्रत्कर्मक्षयवशात्स्व
॥प्नभोगउपस्थिते।बोधावस्थांतिरोधायदेहाद्याश्रयलक्षणं॥४०॥

स्थांप्रयातीतिसंबंधः।किंलक्षणांदेहाद्ययःजाग्रत्कालीनदेहग्रामादयस्तेषामाश्रयणमाश्रयः
साक्षात्कारइतियावत्।तल्लक्षणांतत्स्वरूपांबोधावस्थांपरीत्यज्यतदाकुर्देशोपितत्रनादशाए
वेति॥४०॥

॥कर्मेति॥कर्मणा स्वाप्नभोगप्रदेनोद्भावितः उद्बोधितः संस्कारः स्वप्नगजादिजनकीभूतो यस्येति तथाभूतः स्वप्नरिरंसया स्वप्नेनायं रमतामितीश्वरेच्छयेत्यर्थः। रमेरंतर्भावितण्यर्थात्सन्नंतात् भावे अप्रत्ययादित्यप्रत्ययः। अयं भावः। स्वप्ने तावत् जाग्रतीव घटपटादयः पदार्था अनुभूयंते स चानुभवो न प्रमारूपं जागरणानंतरं बाधात् अतः स्वप्नमस्त्वनिर्वचनीय

॥कर्मोद्भावितसंस्कारस्तत्र स्वप्नरिरंसया॥ अवस्थां च
॥प्रयात्यन्यां मायावी चात्ममायया॥४१॥

ख्यातिरूप एवेति तत्र पदार्थोत्पत्तिः स्वीकार्या तत्र दोषसंस्कारसंप्रयोगजन्यतायां शुक्तिरजतादौ स्वीकारादिहापि तत्रितयमुपपादनीयं तत्र अन्यामवस्थामित्यनेन निद्राख्या स्वप्नावस्थैवात्रागंतुको दोष इत्युक्तं। कर्मोद्भावितेत्यादिना उद्बुद्धः संस्कारोप्युक्तः। आत्ममाययेत्यनेन मूलाज्ञानकार्यं स्वप्नप्रपंच इत्युक्तं। तत्र वं॰(?) यदादिव्यावहारिकापत्तिः निद्रारूपस्य अविद्यातिरिक्तदोषस्यापि सत्त्वेन प्रातिभासिकत्वोपपत्तेः। अत एव देशकालाद्यननुगुणमपि दोषात्तु यत्नत एतस्मात्कारो प्याह। संध्ये सृष्टिराह हि मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वा

ह्नि॥४१॥ २५

ननु तथापि संप्रयोगाभावे कथं स्वाप्नाध्यास इत्याशंक्य संप्रयोगो हि अधिष्ठानसामान्यज्ञानसंपादकतया शुक्तिरजतादावुपयुज्यते। स्वाप्नपदार्थानां तु मूलाज्ञानकार्यत्वात् ब्रह्मैवाधिष्ठानं तत्सामान्यज्ञानं तु आनंदात्मना आवृतं स्वरूपमेवेत्युक्तं संस्फुरितं आत्ममाययेत्युक्तिः। न चैवं जाग्रद्बोधेन बाधो न स्यादिति वाच्यं। सविलासाविद्यानिवृत्तिरूपबाधविरहे इष्टापत्तेः मिथ्यात्वनिश्चय

॥घटादिविषयान् सर्वान् बुद्ध्यादिकरणानि च॥ भूतानि कर्मवशतो वासनामा
॥त्रवस्थितान्॥४२॥ एतान्यपश्यन् स्वयंज्योतिः साक्ष्यात्मा व्यवतिष्ठते॥ अत्रांतः
॥करणादीनां वासनाद्वासनात्मता॥४३॥

मात्रे तु न काचिदनुपपत्तिः तूलाज्ञानानभ्युपगंतृणां शुक्तिरूप्ये एवैवमिति दिक् स्वाप्नपदार्थानां शुक्तिरजतादिवत्केवलसाक्षिभास्यतामाह। घटादीति सार्धश्लोकेन वासनामात्रे प्रमातरि अवस्थितान् अंतःकरणानि च एतान् पदार्थान् पश्यन् भासयन् साक्षिभूत आत्मा व्यवतिष्ठत इति संबंधः। ननु स्वप्नेपि सृष्टेरभ्युपगमे कथं तत्र वासनामात्रमिति व्यवहार इत्याशंक्याह। अत्रेति अत्र अंतःकरणादीनां पदार्थानां वासनातः अध्यस्तत्वेन तन्म

वस्त्वापनाद्वासनात्मनेति बोधव्यं न तु संस्कारमात्ररूपत्वं अपरोक्षत्वयान्नावादित्यर्थः॥४३॥ वासना
शब्दसंस्कारप्रजन्यवृत्त्यादितथाव्यपदेश इत्याह। वासनाभिरिति। यथा जाग्रद्भूमौ तद्वत्स्वापे कर्तृकर्मक्रि
यात्मकः प्रपंचो दृश्यते यद्यपि वासना घटादिव्यावहारिकस्य त्वपि कारणं तथापि तत्र दंडादयोपि
अन्वयव्यतिरेकाभ्यां कारणं न त्विहेति भावः॥४४॥ निःशेषाणां बुद्धीनां बोधविषयाणां कर्मणिक्तिन्

वासनामात्रसाक्षित्वं तेन तत्र परात्मनः॥ वासनाभिः प्रपंचोत्र दृश्यते कर्मचोदितः॥४४
जाग्रद्भूमौ यथा तद्वत्कर्तृकर्मक्रियात्मकः॥ निःशेषबुद्धिसाक्ष्यात्मा स्वयमेव प्रकाश
ते। वासनामात्रसाक्षित्वं साक्षिणः स्वाप उच्यते॥४५॥

साक्षित्वंत आत्मा स्वयमेव प्रमाणजन्यवृत्तिनिरपेक्षः सन्नेव प्रकाशते तदेतत्पूर्वोक्तं वासना ६६
मात्रसाक्षित्वं स्वापः स्वप्न इत्युच्यते॥४५॥ भूतेति भूतानां व्यावहारिणां जन्म निजाग्रत्कालेऽपि इति
यावत्। यद्यद्भुक्तं तत्तदन्यपानकंदुकक्रीडादिकर्म तद्विषयकवासनाप्राबल्याद्बाल्ये वयसि स्वप्नम

मपि प्रायस्तद्रूपं पश्यति अत्र हेतुः नेदीयस्त्वादिति सन्निहितकालीनानुभवगोचरसजातीयत्वादि
त्यर्थः। अतिशयेनांतिकं नेदीयः। अंतीकवाढयोर्नेदसाधाविति नेदादेशः॥४६॥ मध्य इति नारुण्यं इ
द्रियाणां पाटवाद्बहुतरव्यापारतरव्यग्रः सन्वासनासहितं यत्कर्म तद्वशात्प्रायेण जाग्रत्कालानु
भूतान् अध्यापनयुद्धकृषिवाणिज्यादीन्येव वीक्षते॥४७॥ यियासुरिति। परलोकं स्वर्गनरकादिकं पि

भूतजन्मनि यद्भुक्तं कर्म तद्वासनावशात् नेदीयस्त्वाद्वयस्याद्ये स्वप्नं जायः प्रपश्यति॥४६॥
मध्ये वयसि कार्कश्यात्करणानामिहार्जितैः। प्रायेण वीक्षते स्वप्नं वासनाकर्मणो
वशात्॥४७॥ यियासुः परलोकं तु कर्मविद्यादिसंभृतं। भाविनो जन्मनो रूपं स्वप्न आ
त्मा प्रपश्यति॥४८॥

यासुः संभावितपरलोकगमन इति यावत्। आशंकायां वार्त्तिकोक्तः सन्तादृशो जनः कर्मणा विद्यादि
भिश्च संभृतं लब्धप्रायं भाविनो जन्मनो यद्रूपं तत्स्वप्ने पश्यति भाविजन्मसूचकस्वप्नान्पश्यती
त्यर्थः। मिथ्यात्वे तस्यापि सूचकतोपपत्तेः यथाहुः सूत्रकाराः। सूचकश्च हि श्रुतेराचक्षते च तद्विद इति
॥४८॥

यद्वदिति। गगनमंडले प्रकृष्टात्पतनात् वक्रतराक्रमनात् श्रांतः श्येनः नयतीति नीः अमति गृह रोपायं विचारयन्सन् पक्षौ आकुंच्य संकोच्य नीडे नीलयनाय संश्लेषणाय यद्वद्धवति एवं जा ग्रत्स्वप्नावस्थयोः श्रांतो हंकारावच्छिन्नः आत्मा अपीतो नीलः करणानां इंद्रियाणां आमोयस्मि न्सतथोक्तः सन्कारणेन ईश्वरात्मना सह एकतामेति यद्यपि आमो हंजीवब्रह्मणो र्बिंबप्र तिबिंबभावेन औपाधिकोन्ये हेस्त्येव सत्युपाधौ तत्संबंधे च सति औपाधिकस्य निवृत्त्ययोगात्

यद्वत्प्रपतनाच्छ्येनः श्रांतो गगनमंडले। आकुंच्य पक्षौ यतते नीडे निलयनाय नीः॥४९॥

तथापि स्यप्ट दुःखादिजो गोपाधेरहंकारस्य स्वापे विलयात् स्वरूपसुखांशो जाग्रत्काला पेक्षया किंचिदाधिक्येनास्ते दुःखं नास्तीत्येतावन्मात्राभिप्रायेण एकतामेतीत्युक्तं एतेन स्वसंपत्ति श्रुतयोपि व्याख्याताः सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेतीति कैवल्योपनिष त्प्रभृतयश्चात्रानुसंधेयाः॥४९॥ ५९

॥५०॥ ननु एकतां चेत्प्राप्तः तर्हि पुनरुत्थानानुपपत्तिरिति तथाकृतौ पर्याशंकायां प्राशस्त्या माह॥ नाडीमार्गैरिति विज्ञानात्मा प्रमाता सर्वं चक्षुरादिकं ग्रसित्वा ईश्वराख्ये अव्याकृते मा योपहिते चैतन्ये इति यावत् प्रलीयते सूक्ष्मरूपेण स्ते न तु निरन्वयो निरन्वयो निवृत्तेरिच्छा विरहात् अतो नोक्तदोष इति भावः तदेतदुक्तं प्राक् इदं लिंगशरीराख्यमामोक्षात्तवि

॥ एवं जाग्रत्स्वप्नमौ श्रांत आत्मापि संचरन्। अपीतकरणग्रामः कारणेनै
॥ ति चैकतां॥५०॥ नाडीमार्गैरिंद्रियाणां मात्मव्याप्यवासना। सर्वं ग्रसित्वाका
॥ र्यं च विज्ञानात्मा प्रलीयते॥५१॥ ईश्वराख्येऽव्याकृते च तथा सुखमयोऽभवेत्। नस्व
॥ प्रपंचविलयस्तथा भवति चात्मनः॥५२॥

नश्यतीति स्व स्वप्रपंचविलय इति इदं च हिरण्यगर्भाख्यस्य समष्ट्यभिमानिनः प्रतुमातुः सु षुप्तिमत्ति प्रेत्योक्तं व्यष्टिमात्रस्य सुषुप्तौ तु तदीयाहंकारेंद्रियादिमात्रविलय इत्यन्यत्र विस्त रः॥५२॥

ननु यैः सुखमयोऽत्र वेदित्वक्षिर संगतासुखशब्दस्य शुभकर्मोपार्जितांतःकरणवृत्तिविशेषवि
शिष्टस्वरूपसुखेशक्तत्वेनांतःकरणविलयकाले तदयोगात्॥ अथात्र लक्षणया स्वरूपसुख
मात्रं विवक्षितं तर्हि तस्य सार्वदिकत्वाज्जाग्रदादिष्वः को विशेषः। अथ स्वरूपसुखं अन्यदा आवृ
तं सुषुप्तौ त्वनावृतमित्युच्येत तर्हि मोहदशातो न विशेषः स्यात्। अधिष्ठानसाक्षात्कारं विना आ
वरणनिवृत्तेरयोगादित्याशंक्याह। योषित इति। आनंदमयः अबाह्यः वृत्तिरूपो नेत्यर्थः। अनांतरमोहा
वस्थायामिव निवृत्तमूलावरणोपि नेत्यर्थः॥ ननु कस्तर्हि इत्याकांक्षायामाह। अबाह्यः वृत्तिरूपो नेत्य

॥ योषितः काम्यमानायाः संयोगांते यथा सुखं। आनंदमयो बाह्यो नांतरः केवलस्तथा॥ ५३॥

र्थः। अनांतरमोहावस्थायामिव निवृत्तमूलावरणोपि नेत्यर्थः। ननु कस्तर्हि इत्याकांक्षायामाह। काम्यमा
नायायोषितः संयोगांते संभोगे यथा सुखं तथा केवलः स इति। अयं भावः विषयसंबंधजनितवृत्त्या
यास्वरूपमानंदलवइव इदानिव्यज्यते सर्वात्मना निव्यक्तौ मोक्षविशेषात् इषदव्यनभिव्यक्तौ अनु
भवविरोधात् द्विषयानुपादानप्रसंगाच्च तथैवान्वयव्यतिरेकाभ्यां कृत्वाव सुषुप्तावपीषत् स्वरूप
सुखमभिव्यज्यते तदेव च केवल आनंदमयशब्देनैर्हे प्राज्ञेति प्राज्ञात्मानं इश्वरात्मानं समासाद्य

सुषुप्तौ प्राप्यापि सः सुषुप्तविज्ञानात्मा जीवः तथा जाग्रदादौ यथा तत्तद्विज्ञानात्मैव तत्तद्भेदापगम
इत्यर्थः। तथापि तिष्ठन्नसन् कारणात्मेत्युच्यते दुःखराहित्यसाधर्म्यादित्यर्थः। यथा चैव न तु तथोक्तमध
स्तात् ननु सुषुप्तौ अंतःकरणस्य विलीनत्वेनेयाजन्यज्ञानाभावात् संस्कारासंभवे प्रोत्थितस्य सुखं
महमस्वाप्सं न किंचिदवेदिषमित्याद्यनुसंधानं न स्यादित्याशंक्याविद्यावृत्त्या तत्समर्थयते अ

॥ प्राज्ञात्मानं समासाद्य विज्ञानात्मा तथैव च। विज्ञानात्मा कारणात्मा तथा तिष्ठन्न
॥ थापि सः॥ ५४॥ अविद्यावृत्त्यानुभवत्येव सुखं यथा। अज्ञानमपि साक्ष्यादि
॥ वृत्तिभिश्चानुभूयते॥ ५५॥

थापि स इत्यादिना तस्योपपद्यत इत्यंतेन अथापि अंतःकरणस्य विलीनत्वेपि सः सूक्ष्मावस्थांतःकर
णोपहितः यथा यथावत् सुखमनुभवत्येव॥ ५४॥ अज्ञानमपीति न केवलं सुखमेव किंतु अज्ञानमपि सा
क्ष्यादि च वृत्तिभिः स्वापकालीनाभिरविद्यावृत्तिभिः अनुभूयते विषयीक्रियते॥ ५५॥

अविद्यावृत्तेः फलमाह। तथासतीत्यर्थः। यद्यपि यदृत्यवच्छिन्नचैतन्यं यावदर्थसत्तानिश्चयरूपं तन्नाश
स्यतावच्छोचरसंस्कारजनकत्वादविद्यावृत्तेरविद्यादिसकलविषयकत्वं नावश्यकं तथापि नाप्यनु
संधानगोचरः। सर्वोपि निगमकाभावादविद्यावृत्तेर्गोचरतया स्वीकर्त्तव्य इति भावः॥५६॥ तदेवं अवस्था
त्रयं निरूपितं इदं चेहलोकपरलोकयोः साधारणमित्याह। जाग्रदिति। पश्चात्सुषुप्त्यनंतरमित्य

॥तथाहं सुखमस्वाप्सं नैव किंचिदवेदिषं। इत्येवं प्रत्यभिज्ञापि पश्चात्तस्योपपद्यते॥५६॥
॥जाग्रत्स्वप्नसुषुप्त्याख्यमेवेहामुत्र लोकयोः। पश्चात्कर्मवशादेव विस्फुलिंगा इवानलात्।
॥५७॥ जायंते कारणादेव मनोबुद्ध्यादिकानि तु॥५७॥ पयःपूर्णो घटो यद्वन्निमग्नः सलिला
॥शये॥ तैरेवोद्धृत आयाति विज्ञानात्मा तथैत्यजात्॥५८॥

र्थः॥५७॥ ननु सुषुप्तावहंकारादेर्विलये पुनरुत्पत्त्यहंकारांतरोत्पत्तौ कृतहानाकृताभ्यागमौ स्यातामित्या
शंक्याह॥ पयःपूर्णेति अयं भावः निरन्वयनाशाभ्युपगमे त्वेवोक्तदोषः॥५८॥ ९९

सुषुप्तौ तु सूक्ष्मरूपेण अहंकारादिसत्त्वात्तस्यैव पुनःस्थूलावस्थाभ्युपगमान्न कोपि दोष इति तत्र्कं च
पंचपादिकायां सुषुप्त्यादौ वा अहंकारादिविक्षेपसंस्कारमात्रशेषं स्थित्वा पुनरुद्भवतीति स्पष्टतरं वेद
उत्तरमीमांसायामप्येवं तु कर्मानुस्मृतिशब्दविधिभ्य इत्यधिकरणे॥५८॥ अध्यायोपक्रमे उक्तस्य जीव
स्वरूपप्रश्नस्योत्तरं एतावत्पर्यन्तं यदुक्तं तदेव विशदयति। विज्ञानेति। सः परमात्मैव विज्ञानात्माकारण

॥विज्ञानात्मा कारणात्मा तथा तिष्ठंस्तथापि सः। दृश्यते सर्वमेवैष नष्टेष्वायात्यदृश्यताम्॥५९॥
॥एकाकारोर्यमा तत्तत्कार्येष्वेवं परः पुमान्॥ कूटस्थो दृश्यते तद्वद्गच्छत्यागच्छतीव सः॥६०॥

त्मा च तिष्ठन्तद्रूपद्वयेन तिष्ठन्नित्यर्थः। यतः एष अज्ञानादिषु सत्स्वेव सर्वप्रपंचजातं दृश्यते। नष्टेषु तु
अज्ञानादिषु अदृश्यतामायाति॥५९॥ एकेति यथा एकाकारोपि सूर्यः नतत्तत्कार्येषु जलादिषु दृश्य
ते एवं परः पुमान् कूटस्थोपि तदुपाधिवशेन गच्छत्यागच्छतीव दृश्यते॥६०॥ ननु विरुद्धधर्मास
र्व एकत्र कथं स्वीकर्त्तव्या इत्याशंक्याह। मोहमात्रमेवांतरायः स्वरूपावभासप्रतिबंधकः आवर
णं स्थितिप्रयोजक इत्यावत्। तथा च तोयस्मिन् तस्य भावः मोहमात्रांतरायत्त्वं तस्मात्तस्य सर्वप्र

पपद्यते विरुद्धधर्माणां स्वसमानसत्ताकत्वे पि धर्मिसमानसत्ताकभेदप्रयोजकत्वं नास्तीति
भावः॥६१॥ ॥इति श्रीशिवगीताव्याख्यायां दशमोध्यायः॥ ॥गमनागमने कथमिति प्रश्ने लिं
गशरीररूपेणाधिवसाद्दित्य तरं दत्तं तद्देव विशदयितुमेकादशोध्याय आरभ्यते॥ देहांतरे
ति॥१॥ यत् इति प्रथमांतात्तसिः यच्छुक्तं पीतं च तस्य रसात्परिणामविशेषात्॥ स्थूलदेहलिंग

॥मोहमात्रांतरायत्वात् सर्वं तस्योपपद्यते॥ देहाद्यतीत आत्मापि स्वयंज्योतिः स्वभावतः॥
॥एवं जीवस्वरूपं ते प्रोक्तं दशरथात्मज॥६१॥ ॥इति श्रीपद्मपुराणे शिवगीतासूपनिष
॥त्सु ब्रह्मविद्यायां योगशास्त्रे जीवस्वरूपनिरूपणं नाम दशमोध्यायः॥ ॥श्रीभगवानुः॥
॥देहांतरगतिं तस्य परलोकगतिं तथा॥ वक्ष्यामि नृपशार्दूल मत्तः शृणु समाहितः॥१॥
॥भुक्तं पीतं यदेतस्य तद्रसात् आमबंधनं॥ स्थूलदेहस्य लिंगस्य तेन जीवनधारणं॥२॥ ॥

देहयोः परस्परं आमबंधनं न तैनं बंधनं जवतिनेन दृढबंधनेन जीवनस्य प्राणवायोर्धारणं भवति।
॥२॥

व्याधिनेति व्याधिना जरया वा प्रेरितेन श्लेष्मणा जाठरोनलः पीड्यते पीडितश्चानलः भुक्तमन्नं पीतं वा अन्य
पर्याप्तं न पचति॥ श्लेष्मजतपीडया कुंठितशक्तिकत्वात् भुक्तेति। यद्यपि नित्यं धातवः भुज्यंत एव तथापि
दीप्तेन जाठरानलेनोपष्टंभ्याः प्राणवायवः पुनर्धातून् भुक्तपीतयोः रसेन सारभूतपरिणामविशेषेण
लिंपंति उपचयं प्रापयंतीति यावत् वायुविशेषस्तु लिप्तान् धातून् समीकुर्वन् समं आनयतीति व्या

व्याधिना जरया वापि पीड्यते जाठरोनलः॥ श्लेष्मणा तेन भुक्तान्नं पीतं वा न पचत्यलं॥३॥ भु
क्तपीतरसाभावात् शुष्यंति धातवः॥ भुक्तपीतरसेनैव देहे लिंपंति नित्यशः॥४॥ समीक
रोति यस्तस्मात् समानो वायुरुच्यते॥ इदानीं तद्रसाभावादामबंधनहानितः॥५॥

त्वा समान इत्युच्यते। एषां च स्वस्वमतावस्थायां जायमानास्थितिरुक्ता। इदानीं जठरानलपीडाकाले तु
तेषां भुक्तपीतानां रसस्याभावात् आमस्य नूतनसंबंधनस्य पूर्वोक्तहानितः विरहतः इति एतत् लिंगंत
नोर्देहे दिव्यनेन वक्ष्यमाणेन संबध्यते॥५॥ परिपक्वेति। यथा कूष्मांडादिफलं गौरवतः गुरुत्वात्स्व
यमेव पुरुषप्रेरणां विनैव पतति तथा लिंगशरीरं परिपक्वः भुक्तोरसो यस्य तथात्वेन तनोः स्थूलदे

हात्।तत्तदितिहृषीकाणामिंद्रियाणां वासना तथा आध्यात्मिकानिर्जीवानामन्यध्यस्थानिषु
द्वीप्रस्नतीनि तथा आधिजौतिकानि ताविदेहारंभकानि तानि सौमाज्यपयःप्रभृतीनां तत्सूक्ष्म
रूपाणि इत्थं त्रितयमप्याकृष्य एकतांगतः पांशरहृत्कवत् पीडितः स्वरूपः एष प्राणवायुः इतरै
र्नवभिर्वायुभिः।संयुक्तः सन् ऊर्ध्वो श्वासि भवति।तथा तेन प्राणवायुना एकतां गतत्वादात्मा

॥परिपक्वरसत्वेन यथा गौरवतःफलं।स्वयमेव पतत्याशुतथा लिंगंतनोर्व्रजेत्॥६॥
॥तत्तत्स्थानादपाकृष्य हृषीकाणां तु वासनाः अध्यात्मिकाधिभूतानि दैवत्यधिदैवैक
॥तांगतः॥७॥तदोर्ध्वगः प्राणवायुः संयुक्तो नवभिर्वायुभिः।ऊर्ध्वोच्छ्वासि भवत्येष तथा
॥तेनैकतांगताः॥८॥

पन्नो जीवो विजपसर्पतीति वक्ष्यमाणेन संबध्यते अत्र च भाविदेहारंभकानां तैः सहोपक्रमणं वे १७१
त्थं यथा पंचम्यामाहुतावापः पुरुषवचसो भवंतीति प्रश्नावतारणे पूर्वं कं धुपर्जन्यपृथिवीपुरु
षयोषित्सु पंचस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पंचाहुतिर्हुत्वा हुतिर्तु पंचम्यामाहुतावा
पः पुरुषवचसो भवंतीति श्रुत्या दर्शितं न दंतरं प्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्या

मित्यधिकरणे च निर्णीतं तत एव बोध्यं॥८॥विद्याकर्मभ्यां समायुक्तः वासनाभिश्च पूर्वप्रज्ञानुसा
रिणीभिः संयुतः तथा च श्रुतिः तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति॥९॥प्रज्ञात्मानं ईश्वरं स
माश्रित्य तदाश्रितः सन्नित्यर्थः।उपसर्जेति औपाधिकगमनमागमनं भवति तथा च श्रुतिः।प्राज्ञेनात्म
नान्वारूढ उत्सर्जन्याती ति उत्सर्जन्नदित्यादि शब्दं कुर्वन्निति भाष्यकारः अन्यथा यतीत्यनेनपौ

॥प्रज्ञात्मानं समाश्रित्य नाडीमार्गं समाश्रितः।विद्याकर्मसमायुक्तो वासनाभिश्च संयु
॥तः॥९॥प्रज्ञात्मानं समाश्रित्य विज्ञानात्मोपसर्जति।यथा कुंभो नीयमानो देशाद्देशांतरं
॥प्रति॥१०॥स्वपूर्ण एव सर्वत्र स आकाशोपि तत्र तु।घटाकाशाख्यतां याति तद्वल्लिंगं परात्मनः॥११॥

नरुक्तं स्यादिति तदाशयः॥१०॥यथेति देशाद्देशांतरं नीयमानः कुंभो यथा सर्वत्र स्वपूर्ण एव सः पूर्वं घ
टानवच्छिन्नः आकाशः तत्र तस्मिन् घटानयने सति घटाकाशाख्यतां याति।तद्वत्परात्मनो लिंगं पु
नर्देहांतरं याति तत्रापि चित्संबद्धमेव वास्ते इति भावः॥ ॥११॥

यथा मत्स्यः कूलद्वयं संचरत्येवं यथाकर्म कर्मानतिक्रम्य अनुसरन् उपाध्यनुसारेण आमोक्षात् संच
ति॥११॥१२॥ पापयेति केवलं पापभोगाय गच्छेत्। तेन हि नरकानेवेत्यर्थः। उभयभोगाय तु मनुष्यलोकं
गच्छतीति भावः। तथा च श्रुतिः। उभाभ्यां मनुष्यलोक इति। इष्टेति॥१३॥ याम्यं यमसंबंधिनं दूतं आश्रित्य
तेन नीयमानः सन्नित्यर्थः। बर्हिषच्छ्रौतस्मार्तो वाग्नेः यागस्याग्निसाध्यत्वात् सोपि तत्र परंपरया प्र

॥पुनर्देहांतरं याति यथा कर्मानुसारतः। आमोक्षात्संचरत्येवं मत्स्यः कूलद्वयं यथा॥१२॥पा
॥पभोगाय चेद्गच्छेत् यमदूतैरधिष्ठितः। यातनादेहमाश्रित्य नरकानेव केवलं॥१३॥इ
॥ष्टापूर्तानि कर्माणि यो नुतिष्ठति सर्वदा। पितृलोकं व्रजत्येष याम्यमाश्रित्य बर्हिषः॥१४॥

योज्य इति भावः। बर्हिः शुष्मा कृष्णवर्त्मेत्यमरः। अत्र बर्हिरिति पृथक्पदं बर्हिर्मुखा इति दर्शनादिति स्व
मी। कर्मणा पितृलोक इति श्रुतिश्चैतदनुसंधेया॥१४॥ अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते १०२
धूममभिसंभवंतीत्युपक्रम्य आकाशाच्चंद्रमसमित्यंतेन धूमादिः पितृयानः पंथाः श्रुतावुक्तः इह श्रा २
कारिणां तदेतदाह। धूममिति धूमो रात्रिः कृष्णपक्षो दक्षिणायनं चैत्याद्या आतिवाहिका निर्दिश्यंते

आतिवाहिकास्तल्लिंगादिति न्यायात्॥ यद्यपि यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः प्रयाता
यांति तं कालं वक्ष्यामि भरतर्षभेति कालप्राधान्येनैवोपक्रम्याहरादयो रात्र्यादयश्च स्मृतौ निर्दि
ष्टास्तथापि तत्राप्याभिमानिदेवतानामेव विवक्षितत्वान्न विरोध इति भाष्यकाराः॥१५॥धू

॥धूमं रात्रिं गतः कृष्णपक्षं तस्माच्च दक्षिणं। अयनं च ततो लोकं पितृणां च ततः परं॥१५॥
॥चंद्रलोके दिव्यदेहं प्राप्य भुंक्ते परां श्रियं। तत्र चंद्रसमानोसौ यावत्कर्मफलं वसेत्॥१६॥
॥तथैव कर्मशेषेण यथेतं पुनराव्रजेत्॥१७॥

तथैवेति कर्मणः शेषो नाम भांडानुवर्त्तिन्यशेषसदृश इति केचित्। भाष्यकारास्तु भिन्नमेवैहिकफ
लं कर्मशेषशब्दार्थ इत्याहुः॥ यथेतमिति यथागतमित्यर्थः॥१७॥ उपलक्षणं चेदं तद्विपर्ययेण चेति
बोध्यं धूमाकाशयोरवरोहेपि संकीर्तनाद्यथागतत्वं रात्र्यादिसंकीर्तनादभ्रादुपसंख्यानाच्च त

तद्विपर्ययोऽविबोधः। तथा च सूत्रं तत्त्वयेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं चेति जीवता
मासाद्येति पूर्वोक्तोक्रमः कालेइव संधी नाव ज्ञापेत्यर्थः। आकाशं आकाशात्वं वायुं वायुत्वं एवम
ग्रेपि नाव प्रधानता बोध्या तथा च वाक्यशेषः। ततो वृष्टिर्भवेदस्या विति अत्र चाकाशादिसाम्यं
भवतीत्यभिप्रेत्तं न तु तत्त्वभेदः इदं चोत्तरमीमांसायां साभाव्यापत्तिरुपपत्तेरित्यधिकरणे निरूपितं अ

वपुर्विहाय जीवत्वमासाद्याकाशमेति सः। आकाशाद्वायुमागत्य वायोरंभो व्रजत्यथ॥१८॥
अद्भ्यो मेघं समासाद्य ततो वृष्टिर्भवेदसौ। ततो धान्यानि तस्याणि जायते कर्मचोदितः॥१९॥

नं वायोरनंतरं धूमोऽप्यप संहर्तव्यः। विपदाद्यधिकरणन्यायात् तथा च श्रुतिः। अथैतमेवाध्वानं पुन
र्निवर्त्तंते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवतीत्यादि। ॥१८॥ आयत इति प्रवृत्तिप्राधान्ये १०३
न निर्देशः। संधी भवति ब्राह्मणादि भवति ता॥१९॥

इयं च धूमादिमार्गेण गतानां पुनरावृत्तिर्न नियंता किं तु कादाचित्कीत्याह॥ योनिमिति। मुक्तिमिति तु
पर्यपातीन्यायेन चंद्रलोकाद् दौश्रवणादिसंभवादिति भावः॥२०॥ ततः परं अंतत्वं समासाद्य स्थितः स
न्नपि तत्त्वां भुज्यते॥२१॥ मुक्तिरिति। क्रममुक्तिरित्यर्थः॥२२॥२३॥ देवयानं पंथानमेवाह। अर्चिरिति त
था च श्रुतिः। तेऽर्चिषमभिसंभवंत्यर्चिषोऽहरह्न आपूर्यमाणपक्षं आपूर्यमाणपक्षाद्यान् षडुदङेति

योनिमन्ये प्रपद्यंते शरीरत्वाय देहिनः। मुक्तिमन्ये तु संयांति यथाकर्म यथाश्रुतं॥२०॥ ततो
न्नत्वं समासाद्य पितृभ्यां भुज्यते परं। ततः शुक्रं रजश्चैव भूत्वा गर्भे हि जायते॥२१॥ त
तः कर्मानुसारेण भवेत् स्त्रीपुंनपुंसकं। एवं जीवगतिः प्रोक्ता मुक्तिं तस्य वदामि ते॥
२२॥ यस्तु शांत्यादियुक्तः सन् सदा विद्यारतो भवेत्। स याति देवयानेन ब्रह्मलोका
वधिं नरः॥२३॥ अर्चिर्भूत्वा दिनं प्राप्य शुक्लपक्षमथो व्रजेत्। उत्तरायणमासाद्य सं
वत्सरमथो व्रजेत्॥२४॥

मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यं आदित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पुरुषोऽमानवः।

स एतान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तंत इति। अ
र्चेति दिव्यः पुमानश्रुत्युक्तो मानवः पुरुषः इह विद्युल्लोके इतीति संबंधः। अत्र संवत्सरादित्य
योर्मध्ये देवलोकवायुलोकौ श्रुत्यंतरोक्तावुपसंहर्त्तव्यौ। विद्युदनंतरं च कौषीतकीश्रुतिपठिता
वरुणेंद्रप्रजापतय उपसंहर्त्तव्या इति उत्तरमीमांसायां वायुमब्दादविशेषविशेषाभ्यां तडि

आदित्यचंद्रलोकौ तु विद्युल्लोकमतः परं। अथ दिव्यपुमानकश्चित् ब्रह्मलोकादि
हैति सः॥२५॥

तोधिवरुणः संबंधादित्यधिकरणाभ्यां आगंतुनामंते निवेश इति पूर्वमीमांसान्यायेन च सि
धांतयितव्यं॥ आतिवाहिकास्तल्लिंगादिति न्यायेन वाहिकपुरुषपरता निर्लेया। एवं चार्चिरा
दिमार्गेण ब्रह्मलोकं प्राप्तस्योपासकस्य तदुपर्यपि बादरायण इति। न्यायेन तत्रैव चज्ञानोदये १०४
ब्रह्मणा सह मुक्तिः। न तु पुनरावृत्तिः एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तंत इति श्रुते
रिति फलितोर्थः॥२४॥२५॥

पापात्तो गायचेरूर्ध्वं धाम ह तैरधिष्ठिता। इत्यादि पूर्वोक्तरीत्या नरकं गतस्य पश्चात्तानि नीमव
स्थामाह। भुक्त्वा चेति॥२६॥२७॥२८॥२९॥ भगवन्निति॥ ज्ञानकर्मणोरनुपासनायाः इष्टापूर्त्तादिकर्म
णश्च फलं यथाक्रमं ब्रह्मलोके चंद्रलोके च भोगान्भुंक्ते इत्येवं रूपं त्वयोक्तं गंधर्वसूर्येंद्रादि

दिव्यैव हुपुष्पि संधाय जीवमेनं नयत्यसौ॥ ब्रह्मलोके दिव्यदेहे भुक्त्वा भोगान्यथे
॥प्सितान्॥२६॥ तत्रैव तिष्ठत्याचिरं कालं ब्रह्मणा सह मुच्यते। विद्याकर्मविहीनोयस्तृतीयं
॥स्थानमेति सः॥२७॥ भुक्त्वात्र नरकान्घोरान्महारौरवरौरवान्॥ पश्चात्त्वाकनरोषेण
॥क्षुद्रजंतुर्भवेदसौ॥२८॥ यूकामशकदंशादिजन्मासौ लभते भुवि॥ एवं जीवगतिः प्रोक्ताकि
॥मन्यच्छ्रोतुमिच्छसि॥२९॥ रामउ०॥ भगवन्यत्त्वया प्रोक्तं फलं तु ज्ञानकर्मणोः॥ ब्रह्मलोकेचं
॥द्रमौलोके भुंक्ते भोगानिति प्रभो॥३०॥ गंधर्वादिषु लोकेषु कथं भोगः समीरितः॥ देवत्वं प्रा
॥प्युवाल्कश्चित्कश्चिदिंद्रत्वमंतिरा॥३१॥ एतत्कर्मफलं वास्तु विद्याफलमथापि वा॥ तद्ब्रू
॥हि गिरिजाकांत तत्र मे संशयो महान्॥३२॥

लोकप्राप्तिस्तु किमियं फलं वदेति प्रश्नार्थः॥३०॥३१॥३२॥ ॥

तद्विद्येति। तत्रापि विद्याशब्द उपासनापरः तथा च गंधर्वलोकादिकं विद्याकर्मणोरेव फलं भवेदिति सं-
बंधः। ननु विद्यानामुपासनापरं पर्यायपाठं कालादितारतम्येनोत्कर्षापकर्षसंभवात्॥ कर्मणामपि तथा-
त्वात् पूर्वं च विद्याकर्मणोः फलांतरोपन्यासात् कथं भवत्येषा कांक्षा यामाह॥ अनुसारत इति फलस्य कर्म-
निष्पन्नेरिति जैमिनिसूत्रोक्तन्यायश्चेहानुसंधेयः तद्व्याख्याकृः। कर्मणामस्य महतां फलानां च स्वर्गादेर्वि

॥श्रीभगवानुवाच॥ तद्विद्याकर्मणोरेवानुसारेण फलं भवेत्॥३०॥ युवा च सुंदरः शूरो नि-
सप्त ॥रोगो बलवान् भवेत्॥ सप्तद्वीपां वसुमतीं भुंक्ते निष्कंटकं यदि॥ स प्रोक्तो मानुषानंद-
॥स्तस्माच्छतगुणो मतः॥३१॥ मनुष्यास्तपसा युक्ता गंधर्वा जायते स्फुटं॥ तस्माच्छत-
॥गुणो देवगंधर्वाणां न संशयः॥३२॥ एवं शतगुणानंद उत्तरोत्तरतो भवेत्॥

भोगेऽपि चोदित इति तत्र विद्याकर्मणोरन्यत्वं महत्त्वेन तत्स्वरूपपर्यालोचनयानिर्णेतुमशक्य-
त्वे। फलानां तत्कर्षापकर्षौ निरूपयितुं श्रुतिसिद्धं मानुष्याद्यानंदानां तारतम्यमाह॥ युवा चे- १०५
त्यादिना यौवनादिसंपन्नस्य मनःसार्वभौमस्य य आनंदः। स मानुषानंद इत्यर्थः। यस्तु मनु-
ष्यस्तपसा गंधर्वो जायते तस्य त्वानंदः प्रागुक्तान्मानुषानंदाच्छतगुणो मत इत्यन्वयः। देवगंधर्व-

र्वाणां तु हाहाहूहूप्रभृतीनां तस्मादपि शतगुणः॥३२॥ एवमिति व्याख्यायमानानां पित्रादीनामथानं-
दः क्रमेणोत्तरोत्तरं शतगुणो बोधव्य इत्यर्थः॥ षष्ठ्यर्थे तसिप्रत्ययः॥ चिरलोकानां पितॄणां अर्य-
मादिप्रभृतीनां साधारणपितॄणामित्यर्थः॥३३॥ पुरस्तात् पूर्वस्मादित्यर्थः। दिक्शब्देभ्यः सप्तमी-
पंचमीत्याद्यधिकारे अस्ताति चेति सूत्रेण पंचम्यंताद् अस्ताति प्रत्यये पुरादेशः॥३४॥ ज्ञानाधि-

॥पितॄणां चिरलोकानामाजानसुरसंपदां॥ देवतानामथेंद्रस्य गुरोस्तद्वत्प्रजाप-
॥तेः॥३४॥ श्रोत्रियो वृजिनो कामहतो यश्च द्विजोत्तमः॥ तस्याप्येवं समाख्याता
॥आनंदाश्चोत्तरोत्तरं॥३५॥

क्यादिति। सुरालये स्वर्गे यत्सुखाधिक्यं तत्। ज्ञानाधिक्यात् उपासनातारतम्यप्रयुक्तमित्य-
र्थः। कर्मतारतम्यप्रयुक्तमित्यपि बोध्यं। श्रुतौ सार्वभौमाद्यानंदविशेषमुपन्यस्य तत्र तत्र श्रो-
त्रियस्याकामहतस्य चेत्याम्नातं तस्याशयं मंगलः श्रोत्रियइति छंदोधीत इति श्रोत्रियः वेदपा-
रग इत्यर्थः। श्रोत्रियश्छंदोधीते इति निपातनात्साधुः अवृजिनो निष्पापः कामैर्हत उपहतो नेत्य-
कामहतः एवंभूतो यो द्विजः तस्य पूर्वोक्ताः सार्वभौमादि हिरण्यगर्भांताः सर्वे ह्यानंदाः पूर्णानंदस्वरू-
पस्य ब्राह्मण भवंतीति तेषां तदंतर्भावादिति भावः॥३५॥ ३८

ज्ञात्वा यः कुरुते कर्म तस्याक्षय फलं भवेत् ॥३९॥ ४०

ब्राह्मणं वेत्तीति युक्तस्यात्तत्वज्ञानी कर्मभिर्ज्योतिष्टोमादिभिर्न वर्द्धते तथा ब्रह्महत्यादिभिर्निषि
द्धैरपि प्रारब्धवशादनुष्ठितैर्न हीयते आवरणं वंतं प्रत्येवं विधिनिषेधप्रवृत्तेरिति भावः ॥३६॥
न लिप्यत इति यदि ज्ञानवान् न तर्हि पातकेन नैव लिप्यः पुण्यपुंजशालिभिरेवासौ दृश्यत इत्यर्थः ॥
३७॥ ज्ञात्वेति यः पुनः तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्तीत्यादिवाक्यैः कर्मणां तत्व

॥ आत्मज्ञानात्परं नास्ति तस्माद्दशरथात्मज ॥ ब्राह्मणः कर्मभिर्नैव वर्द्धते नैव हीय
॥ते ॥३६॥ न लिप्यपातकेनैव कर्मणा ज्ञानवान्यदि ॥ तस्मात्सर्वाधिको विप्रो ज्ञानवाने
॥व जायते ॥३७॥ यत्फलं लभते मर्त्यः कोटिब्राह्मणभोजनैः ॥ तत्फलं समवाप्नोति ज्ञानि
॥नं यस्तु भोजयेत् ॥३८॥ यत्फलं लभते मर्त्यः कोटि ॥३९॥ ज्ञानवंतं द्विजं यस्तु द्विष्यते च न
॥राधमः ॥ स शुष्यमाणो म्रियते यस्मादीश्वर एव सः ॥४०॥

नोपाय तां निश्चित्य ज्ञानकामनया कर्म कुरुते तस्य कर्म अक्षयं फलं भवेत् ॥ परंपरया मो १०६
क्षपर्यवसायि स्यादित्यर्थः ॥३८॥३९॥ द्विष्यते द्वेष्टि यस्मात् ज्ञानी ईश्वर एव तस्मात् ॥
॥४०॥

तदेवमुत्पन्नतत्वज्ञानः तत्क्षणं एवं स्थितं कर्मानुष्ठता पिद्वि विधः ॥ भोगकामः विरक्तश्च
तत्राद्यस्य पुनरावृत्तिरुक्ता द्वितीयस्यापि ज्ञानकामनया कर्मानुष्ठानेन परंपरया मोक्षसंभ
वात्तेन रूपेण तिष्ठति निष्कामितया कर्म एव नु तिष्ठेनिस्तु चितं ॥ उपासकस्तु ततोप्यत्यर्हितत रइ
त्याह ॥ उपासक इति उपासकः अर्चिरादि मार्गेणोर्ध्वां गतिमेव गच्छति अधोगतिं न पुन

उपासको न यात्येव यस्मात्पुनरधोगतिं ॥ उपासनरतो भूत्वा तस्मादास्व सुखी
नृप ॥४१॥ ॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु एकादशोऽध्यायः ॥
॥ ॥ श्रीराम उवाच ॥ ॥ भगवन्देवदेवेश नमस्ते स्तु महेश्वर ॥ उपासनवि
॥धिं ब्रूहि देशकालं च तस्य तु ॥१॥

र्न गच्छति यस्मात्तस्मिन् उपासनायां रतो भूत्वा आस्व ॥ वा शब्देन श्रवणादीन् ततोप्युत्कृष्टान्
सूचयति ॥४१॥ ॥ इति श्रीमद्विमुक्ताद्वैतसिद्धांतप्रतिष्ठापनैकधुरंधरश्रीकेवलदीवेंकटाद्रिनाथ
कविरचितायां शिवगीताव्याख्यायामेकादशोऽध्यायः ॥ ॥११॥ ॥ तस्य उपासनस्य देशश्च का
लश्च अनयोः समाहारः देशकालं तदपि ब्रूहि ॥१॥

मदंशेनेति।मदंशेन अहंकारेण परिछिन्ना पृथक्कृताः वस्तुतस्तु मत्स्वरूपात्मका एव ममैव
सर्वाधिष्ठानत्वात्॥ यद्वा सर्वे दिवौकसां परिछिन्ना देहा मदंशेन ममैवांशत्वेन प्रतिबिंबत्वेन
न्येनोपलक्षिताः॥२॥ ततः किं तत्राह। येत्विति। ये तु अन्यदेवतायजनं ते मामेव यजंति किंतु
अविधिपूर्वकं अत एव फलं न्यूनं प्राप्यत इति भावः। इदमेवाभिप्रेत्योक्तं प्रथमेध्याये। तं त्यक्त्वा तादृशान् दे

॥ईश्वर उवाच॥ शृणु राम प्रवक्ष्यामि देशकालमुपासनं। मदंशेन परिछिन्ना देहाः सर्व
॥दिवौकसां॥२॥ येत्वन्यदेवताभक्ता यजंते श्रद्धयान्विताः। तेपि मामेव राजेंद्र यजंत्यवि
॥धिपूर्वकं॥३॥ यस्मात्सर्वमिदं विश्वं मत्तो न व्यतिरिच्यते॥ सर्वक्रियाणां भोक्ताहं सर्वस्या
॥हं फलप्रदः॥४॥ येनाकारेण ये मर्त्या मामेवैकमुपासते। तेनाकारेण तेभ्योहं प्रसन्नो वांछि
तं ददे॥५॥ १०१

वयः सेवेतान्यदेवतां। सहित्वा गीरथीं त्यक्त्वा कांक्षते मृगतृष्णिकामिति॥३।४॥ एकं मामेव येना
कारेण चतुर्भुजत्वशंखचक्रादिविशिष्टेन वा त्रिलोचनत्वत्रिशूलादिविशिष्टेन वा ये उपास
ते तेभ्यस्तेनैवाकारेण प्रसन्नः सन् तेषां वांछितमहं ददे प्रयच्छामीत्यर्थः॥५॥

॥६॥ तदेवं यथाकथंचिदप्युपासनं कर्त्तव्यमित्युक्तं॥ अभेदेन निदिध्यासनं तु मुख्यमन्तरमि
त्याह। स्वजीवत्वेनेति। शोधितत्वंपदार्थाभेदेन शोधितं तत्पदार्थं यो ध्यायति सः अभेदेनैष
साक्षात्करोत्यपि न तथ्याविद्यानिवृत्तौ सत्यां तनुत्यागे नैव साक्षात्कारोत्पत्तेः॥ प्रागपि उपासना
महात्म्यान् महांत्यपि पापानि क्षीयंत इत्यर्थः॥६॥ तत्र तस्मिन्निर्गुणसाक्षात्कारो तदर्थमि

१ धि विधिनाविधिना वापि भक्ता ये मामुपासते। तेभ्यः फलं प्रयच्छामि प्रसन्नोहं न संशयः
२ स्रु ॥६॥ अपि चेत्सुदुराचारो भजते मामनन्यभाक्। साधुरेव स मंतव्यः सम्यग्व्यवसि
॥तो हि सः॥७॥ स्वजीवत्वेन यो वेत्ति मामेवैकमनन्यधीः। तं न स्पृशंति पापानि ब्रह्म
॥हत्यादिकान्यपि॥८॥ उपासाविधयस्तत्र चत्वारः परिकीर्त्तिताः॥ संपदारोपसंव
॥र्गाध्यासा इति मनीषिभिः॥९॥

तियावत्। चर्मणि द्वीपिनं हंतीत्यादाविव निमित्तात्कर्मयोगेपीति सप्तमी॥ उपासाविधयः सगु
णोपासनाविधयः कीर्त्तिताः चत्वारः सगुणोपासनाश्चतुर्द्धेति फलितोर्थः॥९॥

रूपमविद्यमानसमंकृत्वा आरोपितविशेषरूपस्यैवध्यानमितियावत्। अधिष्ठानप्रधानाध्यासः। अधिष्ठानंविशेष्यं

अल्पस्यपरिच्छिन्नस्यमनसः अनंतवृत्तिरूपगुणयोगादनंतत्वेनमादृशेपेन अनंतावृत्तिर्वे
इतिचिंतनीयमसोसौसंपद्रूपवाच्योविधिर्विषयइत्यर्थः॥१०॥तथाचप्रतीकोपासनादिविधासंप
दध्यासेतिआरोप्यप्रधानासंपत्।यत्राधिष्ठानंविशेष्यंरूपेणोद्दिश्यआरोपितस्यानमितियावत्।विधा
वितिविधीयतेप्रधानविधिनेतिविधिः।अंगमितियावत्तस्मिन्नन्यदारोप्ययात्उपासना

॥अल्पस्यचाधिकत्वेनगुणयोगाद्विचिंतनं।अनंतंवैमनइतिसंपद्विधिरुदारधीः॥१०॥
॥विधावारोप्ययोपासासारोपःपरिकीर्तितः।यद्वदोंकारमुद्गीथमुपासीतेत्युदाहृतः॥
॥११॥आरोपोबुद्धिपूर्वेणयउपासाविधिश्चतः।योषित्यग्निर्मतिर्यत्तदध्यासःसउ
॥दाहृतः॥१२॥

सात्रारोपः।अंगावबद्धाध्यासइतियावत्।उद्गीथःसाम्नःप्रथमभक्तिः॥११॥आरोपइतिबुद्धिपूर्वे १०८
णबुद्धिपूर्वत्वेनयआरोपःसोसाउपासाविधिस्तत्अध्यासइतिसमुदाहृतः।तमुदाहरति।यत्तु
तवत्यथायोषित्यग्निमतिः।योषावावगोतमाग्निरित्यादिश्रुत्युक्तेत्यर्थः।यद्यपिप्रागुक्तांगाव
बद्धोपासनाप्यध्यासएवांतर्भवतिशास्त्रीयव्यवहारोप्येवंतथापीहपृथक्कथनंनविरुध्यतेप
रिभाषायाअपर्यनुयोज्यत्वादितिदिक्॥१२॥

क्रियायोगेनेतिसवृक्केभूतानिस्वायत्तानिकरोतीतिसंवर्गः।इतिव्युत्पत्त्यावशीकरणरूपक्रिया
योगेनोपासनंसनंसंवर्गोपासनेत्यर्थः।अवसीदतिअवसादयतियस्मिन्लीनानिकरो
तीत्यर्थः॥१३॥उपसंगम्येतिबुध्याश्रवणमननाभ्यांनिवृत्तासंभावनयाचित्तवृत्त्यादेवतात्म
नोपसंगम्यब्रह्मैवाहमितिविषयीकृत्यपत्।आसनंनिदिध्यासनमितियावत्॥१४॥तत्त्वअंतःअं

॥क्रियायोगेनचोपासाविधिःसंवर्गउच्यते।संवर्त्तवायुःप्रलयेभूतान्येकोवसीदति॥१३॥
॥उपसंगम्यबुध्यायदासनंदेवतात्मना।संपन्नदेवतातत्त्वमुपासनमुदीरितं॥१४॥त
॥दुपासनमंतःस्यात्तद्बहिःसंपदादयः।ज्ञानांतरानंतरितसंजातिज्ञानसंततेः॥१५॥

तरंगभूतमुपासनंबोधव्यंसंपदादयस्तुप्रागुक्तास्ततोबहिःबहिरंगभूताः॥१५॥ज्ञानेतिज्ञानांतरेण
विजातीयप्रत्ययेनानंतरितानिअव्यवहितानिसजातीयज्ञानानितेषांसंततेर्निदिध्यासनस्येति
यावत्।उपासनंउपासनत्वसंपन्नःस्वानंदेनसाक्षात्कृतोदेवतात्मायेनतथात्वंउदीरितं।सा
क्षात्काराव्यवधिकंनिदिध्यासनंइत्यर्थत्वात्तंदुर्लभंयेवसाप्युच्यातइतिफलितोऽर्थः।आवृत्तिर
सकृदुपदेशादित्यधिकरणेस्पष्टमेतत्॥१५॥

संपत्सादिष्विति तत्र बुद्धिर्दार्ढ्यमेवावधिरित्यर्थः। तदेवसगुणनिर्गुणोभयविषया।।ली रूपासनाः प्रा
गुक्तः उपसंहरति उपासनमिति प्राग्गुक्तरीत्या।।१६।। स्वचित्तस्य यत्रैव एकाग्रता तत्रासीनो नियत्रैका
ग्रता तत्राविशेषात् आसीनः संभवादित्यधिकरणद्वयार्थोनेनोपनिबद्धः।।१७।१८।। अत्याश्रमस्थ
इति।। विध्युक्तभस्मधारणमाश्रमः तेन सहितः सन्तिष्ठतीत्यत्याश्रमस्थः तथा च स्कांदे ब्रह्मगी

।।संपदादिषु बाह्येषु दृढबुद्धिरुपासनं। उपासनमिति प्रोक्तं तदंगानि ब्रुवे शृणु।।१६।। तीर्थ
।।क्षेत्रादिगमनश्रांतं तत्र परित्यजेत्। स्वचित्तैकाग्रता यत्र तत्रासीनसुखं द्विजः।।१७।। कंबले
।।मृदुतल्पे वा व्याघ्रचर्मणि वास्थितः। विविक्तदेशे नियतः समग्रीवशिरस्तनुः।।१८।। अत्या
।।श्रमस्थः सकलानींद्रियाणि निरुध्य च। भक्त्या च स्वगुरुं नत्वा योगं विद्वान्प्रयोजयेत्।
।।१९।।

तायां।। अत्याश्रमी स्यः परमं पवित्रमिति श्रुतिव्याख्यावसरे तु तत्क्तं। अग्निरित्यादिभिर्मंत्रैर्भस्मो
द्धूलनं तथा। त्रिपुंड्रधारणं चापि वदंत्यत्याश्रमं बुधाः। इति विद्वान्। पातंजलशास्त्रोक्तयोगाभ्यासप्र १०६
काराभिज्ञः सन् योगं चित्तवृत्तिनिरोधं तथा च पातंजलसूत्रं योगश्चित्तवृत्तिनिरोध इति।।१९।।

अविज्ञानवान्योगाभ्यासानभिज्ञः विवेकशून्यो वा अत एवायुक्तेन तावग्रहसमर्थेन मनसोप
हितः।।२०।। विज्ञानिनस्तु पुरुषस्य यत्नेन वश्यमानं भवति यद्भवति तदेवाह मनसा सहेंद्रियाणि
वश्यानीति।।२१।। यस्त्विति। सदाशुचिर्बाह्यांतरशौचवर्जन्सन्नपि विज्ञानरहितो न तत्पदमा
प्नोति।।२२।।२३।। अध्वनः संसारस्य पारं गतं ममैव पदं स्वरूपं प्राप्नोति।।२४।। हृत्पुंडरीकमिति। वि

।।यस्त्वविज्ञानवान्भवत्ययुक्तमनसा सदा। तस्येंद्रियाण्यवश्यानि दुष्टाश्वा इव सार
थेः।।२०।। विज्ञानिनस्तु भवति यत्नेन मनसा सह। तस्येंद्रियाणि वश्यानि सदश्वा इव सा
रथेः।।२१।। यस्त्वविज्ञानवान्भवत्यमनस्कः सदाशुचिः। न च तत्पदमाप्नोति संसारम
पि गच्छति।।२२।। विज्ञानसारथिर्यस्तु मनः प्रग्रह एव च। सोध्वनः पारमाप्नोति ममैव परमं
पदं।।२३।। हृत्पुंडरीकं विरजं विशुद्धं विशदं तथा। विशोकं च विचिंत्यात्र ध्यायेन्मां परमे
श्वरं।।२४।।

रजं रजोगुणरहितं अत एव विशुद्धं हृदयांभोजं विचिंत्य अत्र अस्मिन्हृत्पुंडरीके विशदं विशो
कं च परमेश्वरं मां ध्यायेत्।।२४।।

॥२४॥ एवं तस्यात्मनः साक्षात्कारे कृत्स्नमुपायमाह एवमिति आत्मैवारणिं कृत्वा अयं भावः
॥ यथा अधरोत्तरारण्यां निर्मथनेन दारुमध्ये निलीनमग्निं पश्यति एवं प्रणवेनात्मज्ञानमेवनि

अचिंत्यरूपमव्यक्तमनंतममृतं शिवं। आदिमध्यांतरहितं प्रशांतं ब्रह्मकारणं॥२५॥ ए
वं विज्ञं चिदानंदमरूपमजमद्भुतं। शुद्धस्फटिकसंकाशमुमादेहार्द्धधारिणं॥२६॥ व्याघ्र
चर्मांबरधरं नीलकंठं त्रिलोचनं। जटाधरं चंद्रमौलिं नागयज्ञोपवीतिनं॥२७॥ व्याघ्रच
र्मोत्तरीयं च वरेण्यमभयप्रदं। पराभ्यामूर्ध्वहस्ताभ्यां बिभ्राणं परशुं मृगं॥२८॥ कोटिम
ध्याह्नसूर्याभं चंद्रकोटिसुशीतलं। चंद्रसूर्याग्निनयनं स्मेरवक्त्रसरोरुहं॥२९॥ भूतिभू
षितसर्वांगं सर्वाभरणभूषितं। एवमात्मारणिं कृत्वा प्रणवं चोत्तरारणिं॥३१॥ ज्ञान
निर्मथनाभ्यासात्साक्षात्पश्यति मां जनः। वेदवाक्यैरलभ्योहं न शास्त्रैर्नापि चेत ११०
सा॥ ध्यानेन वृणुते यो मां सर्वदाहं वृणोमि तं॥३२॥

र्मथनं तस्याभ्यासात् मां साक्षात्पश्यतीति॥३२॥ ॥श्री॥ ॥श्री॥ ॥

नाविरत इति। दुश्चरितात् पापाचरणात् अविरतोनुपरतः मां न लभेत नाप्यशांतः इंद्रियलौल्यादनुपरतः
या असमाहितश्चित्तैकाग्र्यरहितो लिमां न लभेत्। तथा अशांतं विषयेभ्यो अव्यावृत्तं मानसं यस्य सोपि
लभते॥३३॥ जाग्रत्स्वप्नसुषुप्त्यादिः प्रपंचो यस्मिन्निति बहुव्रीहिः अवस्थात्रयेपि साक्षितया प्रका
शमान इत्यर्थः॥३४॥३५॥ ऋग्वेदस्य एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूत एकैवेषः

नाविरतो दुश्चरितान्नाशांतो नासमाहितः। नाशांतमानसो वापि प्रज्ञानेन लभेत मां॥३३॥ जाग्र
त्स्वप्नसुषुप्त्यादिप्रपंचो यः प्रकाशते। तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते॥३४॥ त्रिषु धा
मसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्। तेभ्यो विलक्षणः साक्षी चिन्मात्रोहं सदाशिवः॥३५॥ एको दे
वः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा॥ सर्वाध्यक्षः सर्वभूताधिवासः साक्षी चेता केव
लो निर्गुणश्च॥३६॥ एको वशी सर्वभूतांतरात्मा एकं बीजं नित्यदा यः करोति॥ तं मां नित्यं ये
नुपश्यंति धीरास्तेषां शांतिः शाश्वती नेतरेषां॥३७॥

सर्वमिदं बीजात्मकं वा इदं बीजं वस्तु सर्वमिति श्रुतिं चार्थत उदाहरति॥३७॥ ॥श्री॥ ॥

अग्नियथेति भुवनं लोकादि देहं प्रविष्टस्तदुपाधिवशाद्भूतलत्वचतुःकोणादि तज्जलद्
तिनाशो मध्यवा चार्थैरुक्तः॥ जीवनं भुवनं वनमिति जलपर्यायेषु पाठान्नेकत्र प्रतिबिं
बितइत्यपि व्याख्यानं भ्रूशकते॥ रूप्यते अस्मिन्निति रूपं उपाधिः तथा च प्रत्युपाधिप्र
तिरूपो बभूव॥ प्रतिबिंबितइत्यर्थो विरूपो रेव॥ ३८॥ शेषं व्याख्यातप्रायं॥ ४१॥ ॥इतिश्री

॥अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव॥ एकस्तथा सर्वभूतांतरात्मान
॥लिप्यते लोकदुःखेन बाह्यः॥ ३७॥ वेदेह यो मां पुरुषं महांतमादित्यवर्णं तमसः पुरस्ता
॥त्॥ स एव विद्वान्मृतोत्र भूयो नान्यः पंथा अयनाय विद्यते॥ ३८॥ हिरण्यगर्भं विदधा
॥मि पूर्वं वेदांश्च तस्मै प्रहिणोमि योहं॥ तं देवमीड्यं पुरुषं पुराणं निश्चित्य मां मृत्युमु
॥खात्प्रमुच्यते॥ ४०॥ एवं शांत्यादियुक्तः सन्वेत्ति मां यस्तु तत्वतः॥ निर्मुक्तदुःखसं
॥तानः सोंते मय्येव लिप्यते॥ ४१॥ ॥इतिश्रीपद्मपुराणे शिवगीतासूपनिषत्सु उपा १११
॥सननाम प्रपंचो नाम द्वादशोध्यायः॥ १२॥

मद्विमुद्राद्वैतसिद्धांतप्रतिष्ठापनैकधुरंधरश्रीकेलिदिवेंकटाद्रिनायकृतायां शिवगीतायां
द्वादशोध्यायः॥ १२॥ ॥

सालोक्यमिति सलोकस्य भावः सालोक्यं एकलोकवास इति यावत्॥ सारूप्यं स्वरूपत्वं सार्ष्टिं समाने
श्वर्यं॥ ऋष्टिः स्वज्ञातेन चैश्वर्यं लक्ष्यते॥ तत्सहकृतं समानं यस्य तस्य भावः सार्ष्टिं खड्गेन निस्त्रिंश
चंद्रहासासिरिष्टय इत्यमरः॥ ऋत्यकइति प्रत्ययति भाव इति क्षीरस्वामी ऋषेर्गत्यर्थात् क्तिं चित् रूपमि
ति। रिषेस्तु हिंसार्थात् क्तिं चित् रिष्टिरिति रूपांतरं बोध्यमिति स एवाह॥ सयुंहं तेके व्यवहरंतीति सयु

॥सूत उवाच॥ एवं श्रुत्वा कौशलेयस्तुष्टो मतिमतांवरः॥ पप्रच्छ गिरिजाकांतं सुभगं मुक्तिल
॥क्षणं॥ १॥ श्रीराम उवाच॥ भगवन्करुणाविष्टहृदय त्वं प्रसीद मे॥ स्वरूपलक्षणं मुक्तेः प्रब्रू
॥हि परमेश्वर॥ २॥ श्रीभगवानुवाच॥ सालोक्यमपि सारूप्यं सार्ष्टिं सायुज्यमेव च॥ कैवल्यं चे
॥ति तां विद्धि मुक्तिं राघव पंचधा॥ ३॥

क्तस्य युजो भावः सायुज्यं तत्तावेशन्यायेन हिरण्यगर्भादिदेहभोग इत्यर्थः। हिरण्यगर्भत्वपदावाप्तिरे
व सायुज्यशब्दार्थ इत्यपि केचित्॥ अत्र च तुष्टयेपि मुक्तासादृश्यान्मुक्तिशब्दो गौणः॥ इंद्रोमुख्यपदा दा पं३
वाप्तिरेव सायुज्यशब्दार्थ इत्यपि केचित्। इति पंचधा गौणमुख्यमुक्तोः संकलनया पंचविधतां वि
द्धि तत्तच्छब्दनिर्वचनबलेनैव जानीहि॥ तथा च पृथग्लक्षणं न वक्तव्यमिति भावः॥ ३॥

सालोक्यमुक्तिप्रापकमाह॥ मामिति। ज्ञानवर्जितः मत्स्वरूपानभिज्ञः तथापि मां शिवलिं
गादौ पूजयति य स सालोक्यं यातीत्यर्थः॥४॥ सार्ष्टिप्रापकमाह॥ श्लोकद्वयेन इष्टेति॥५।
६॥ सायुज्यप्रापकं तु अहंग्रहोपासनादिकमन्यतो बोध्यं। परममुक्तिप्रापकमाह। यस्त्वि
ति शांत्यादियुक्त इति साधनचतुष्टयः युक्तः श्रवणमनननिदिध्यासनावांश्चेत्य

मां पूजयति निःकामः सर्वदा ज्ञानवर्जितः॥ मया समानरूपः सन् मम लोके
महीयते॥४॥ इष्टापूर्तादिकर्माणि मत्प्रीत्यै कुरुते नयः॥ यत्करोति यदश्नाति य
ज्जुहोति ददाति यत्॥५॥ यत्तु पश्यति तत्सर्वं यः करोति मदर्पणं॥ मल्लोके स
श्रियं भुंक्ते मनुष्यप्राणवंचनन्॥६॥ यस्तु शांत्यादियुक्तः सन् मामात्मत्वेन
पश्यति॥ स जायते परं ज्योतिरद्वैतं ब्रह्म केवलं॥७॥ अतः स्वरूपावस्थानं मुक्ति
रित्यभिधीयते॥८॥ ॥र्थः॥७॥ अत इति। स्वरूपेणावस्थानं मुक्तिरिति तत्र तन्नयदभिधी ११२
यते तत्र अतः पूर्वोक्तात् द्वैतापगमात्। याच स्वरूपस्य संसारदशायामप्यनपायात्तत्र मोक्षल
क्षणमतिप्रसक्तमिति न शंक्यं स्वरूपमात्रेणावस्थानस्य विवक्षितत्वात्। संसारदशायां तु अविद्या
देरप्यवस्थानादिति भावः। ननु मोक्षकालेपि सत्यज्ञानानंदाद्यनपगमात्सत्यत्वादिधर्मोनेवगत
त्वा केवलत्वमाह॥८॥

तमित्याशंक्याह॥ सत्यमिति केवलं यद्ब्रह्म तदेव सत्यं ज्ञानादिवेत्यन्वयः। तथा चानंदादिस्व
रूपमेव मोक्षे अस्ति न त्वानंदत्वादयो धर्मा अपि अतो नोक्तदोष इति भावः। नन्वेवं तत्र कस्या
पि धर्मस्याभावाच्छक्तिरुग्राह्यस्यादित्याशंक्याह॥ सर्वेति। तथा च शक्तिविरहे इष्टापत्तिरिति भा
वः। नन्वेवं वेदादपि कथं तस्यावगम इत्याशंक्य लक्षणयेत्याह॥ सजातीयेत्यादिना सार्द्धश्लो

॥सत्यं ज्ञानमनंतं सदानंदं ब्रह्म केवलं। सर्वधर्मविहीनं च तस्माद्वाचामगोचरं।
॥सजातीयविजातीयपदार्थानामसंभवात्॥१०॥ अतस्तद्व्यतिरिक्तानामद्वैतमिति
॥संज्ञितं॥ मत्वा रूपमिदं राम शुद्धं यदभिधीयते॥११॥

केन॥१०॥ अद्वैतमिति संज्ञितं तत्र अतः इत्यन्वयः अत इत्यस्य विवरणं तद्व्यतिरिक्तानां संभवा
दिति असंभवः अभावः अयमाशयः अद्वैतमिति नाच द्वैतविरहरूपं तद्विशिष्टं वा बोध्यते विर
हस्य अलीकप्रतियोगिकोन संभवति। तथा च वक्तृप्रतियोगिभूत तत्तद्धर्मविशिष्टत्वेन लक्षणीपदानां श
क्तिरस्त्येवेति ननु किमेतावतोत्यत आह॥ मत्वेति। हे राम यदिदं रूपं चिज्जडात्मकं विशिष्टं तन्मत्वावि
चार्य शुद्धं तर्केण विविच्य पृथक्कृतं चिद्भागमात्रं अभिधीयते लक्षणया प्रतिपाद्यत इत्यर्थः। द्वैतत्वा
वच्छेदेन मिथ्यात्वग्रहणं मिथ्याभूतेवदेवस्य

महातात्पर्यायोगाद्विशिष्टघटकीभूतंशुद्धंतर्केणनिष्कृष्यलक्षणयाशब्दात्प्रतीयतइति
तात्पर्यं॥११॥ अदृष्टेन अदृष्टविशेषेणेत्यर्थः॥१२॥ निवर्त्तते अपक्षीयत इत्यर्थः॥ विलीय
तइत्यर्थः॥ विलीयतेनश्यतीत्यर्थः॥१३॥१४॥ सदेति॥ यद्यप्यहंसदापरमानंदादिरूपएवत

मय्येवदृश्यतेसर्वंजगत्स्थावरजंगमं॥ व्योम्निगंधर्वनगरंयथादृष्टेनदृश्यते॥१२॥ अना
द्यविद्ययाविश्वंसर्वंमय्येवकल्प्यते॥ निवर्त्ततेचमय्येवमय्येवेदंविलीयते॥१३॥ मम
स्वरूपज्ञानेनयदाविद्याप्रणश्यति॥ तदैकएववर्त्तेहंमनोवाचामगोचरः॥१४॥ सदै
वंपरमानंदःस्वप्रकाशश्चिदात्मना॥ नकालःपंचभूतानिनदिशोविदिशश्चनः॥१५॥
मदन्यन्नास्तियत्किंचित्तदावर्त्तेहमेकलः॥१५॥

थापियत्कालभूतदिगादिमज्जित्रंसर्वमधिष्ठानसाक्षात्कारेणबाध्यतेतदाएकएववर्त्ते अन्यस्त ११३
त्तुजडेनविशिष्टइतिमोहःसंसारदर्शावैलक्षण्योपपत्तिः॥१५॥

नन्वेकरीत्यालक्षणयाउपनिषद्भिर्ब्रह्मबोध्यतेइत्युक्तनामतथापिशाब्दस्यापरोक्षज्ञानजनकता
भ्युपगमेआपातज्ञानवतामपिमोक्षःस्यादेवअपरोक्षज्ञानस्याविद्यानिवर्त्तकत्वात्॥ शब्दाप
रोक्षज्ञानानभ्युपगमेतुकस्यापिमोक्षोनस्यात्॥ अपरोक्षज्ञानेउपायांतराभावादित्याशंक्यनसंदृशेति
ष्ठतिरूपमस्येत्यादिकांकठवल्लीश्रुतिमर्थतःसंगृह्णातिनसंदृशाइतिममस्वरूपंशुद्धंसंद
शेदर्शनविषयेनतिष्ठतिदर्शेर्घञर्थेकः॥ वस्तुतस्तुसंदृशे॥ दर्शनार्हमित्यर्थः॥ तुमर्थेतवैके

॥नसंदृशेतिष्ठतिमेस्वरूपंनचक्षुषापश्यतिमांतुकश्चित्॥ हृदामनीषामनसाभिक्लृप्तंयेमां
॥विदुस्तेह्यमृताभवंति॥१६॥

इकेन्यन्तनइतिकेशप्रत्ययः अतएवकृदुत्तरपदप्रकृतिस्वरेणमध्योदात्तपाठोपिसंगच्छते
कप्रत्ययेकअंतोदात्ततास्यादितिदिक्॥ अतएवमांशुद्धंकश्चिदपिचक्षुषाउपलक्षणमेतत्चक्षु
रादिसर्वेंद्रियैर्नपश्यतिनसाक्षात्करोतितर्हिकथंद्रष्टव्यत्वमित्याकांक्षायामाह॥ हृदे
तिहृदाहृत्स्थयामनीषामनसःसंकल्पादिरूपस्येष्टइतिमनिष्ठतथाविधयाबुध्यामनसा
मननरूपेणसम्यक्दर्शनेनचाभिक्लृप्तमभिप्रकाशितइतिमाधवाचार्याः॥ वस्तुतस्तुमनीषाम

नीघयाश्रवणेनेतियावत्सुपांसुलुगितिडादेशः।मननसामननेनभावेअसुन्प्रत्ययः।अ
भिख्याभिमुख्येनकृष्णंअवेदेननिदिध्यासीतमितियावत्इहसंमांयेविदुःसाक्षात्ऊर्वंतिमे
अमृताभवंति।तथाचशाब्दापरोक्षस्यप्रागेवजातत्वेपिअसंभावना।विपरीतभावना।भ्यांप्रतिबं
धात्।कार्याक्षमता।श्रवणेनप्रमाणगता।संभावनायाः।मननेनचप्रमेयगतायाःस्तस्यानिदिध्या

॥श्रीरामउवाच॥कथंभगवतोज्ञानंशुद्धंमर्त्यस्यजायते।तन्मेपापहरब्रूहियदितेनुग्रहो
॥मयि॥१७॥श्रीभगवानुवाच॥विरज्यसर्वभूतेभ्यआविरिंचीपदादपि।घृणांवितत्यसर्व
॥त्रपुत्रमित्रादिकेष्वपि॥१८॥श्रद्धालुर्मुक्तिशास्त्रेषुवेदांतज्ञानलिप्सया।उपायनकरो
॥भूत्वागुरुंब्रह्मविदंव्रजेत्॥१९॥सेवाभिःपरितोष्यैनंचिरकालंसमाहितः।सर्ववेदांत
॥वाक्यार्थंशृणुयात्सुसमाहितः॥२०॥

सनेनचविपरीतभावनायानिवृत्तौअप्रतिबद्धशाब्दापरोक्षादज्ञाननिवृत्तौनकश्चिद्दोषइतिभा ११७
वः॥१६॥१७॥आविरिंचीपदादितिब्रह्मलोकमभिव्याप्येत्यर्थः॥घृणांजुगुप्सांवितत्यप्राप्य॥१८॥
॥१९॥२०॥

तात्पर्यनिश्चीयतेनेनेतिकरणव्युत्पत्त्याउपक्रमोपसंहाराद्यनुसंधानरूपतर्कः॥श्रवणशब्दा
र्थः।अतएवज्ञानविधिंनिराकुर्वतामपिश्रवणविध्यभ्युपगमोनविरुध्यते॥२१॥लोहमण्यादिदृ
ष्टांताःश्रुतिप्रसिद्धाः॥२२॥२३॥यत्सदेति।येनध्यानयोगेनध्यानरूपेणोपायेनयोगःसहनोप
यध्यानसंगतियुक्तिःक्षिप्तमरः।आत्मानमीक्षतेतत्ध्यानंनिदिध्यासनंस्मृतमित्यन्वयः॥२४॥न

॥सर्ववेदांतवाक्यानांमयितात्पर्यनिश्चयं।श्रवणंनामतत्प्राहुःसर्वेतेब्रह्मवादिनः॥२१॥
॥लोहमण्यादिदृष्टांतयुक्तिभिर्यद्विचिंतनं।तदेवमननंप्राहुर्वाक्यार्थस्योपबृंहणं॥२२॥नि
॥र्ममोनिरहंकारःसमःसंगविवर्जितः।सदाशांत्यादियुक्तःसन्नात्मन्यात्मानमीक्षते॥२३॥
॥यत्सदाध्यानयोगेनतन्निदिध्यासनंस्मृतं।सर्वकर्मक्षयवशात्साक्षात्कारोपिचात्मनः॥२४॥क
॥स्यचिज्जायतेशीघ्रंचिरकालेनकस्यचित्॥२५॥

नुनिदिध्यासनस्यात्मसाक्षात्कारहेतुत्वेतन्निदिध्यासनानामपिकेषांचित्साक्षात्कारानुत्पत्तिःकथंस
मर्पयितव्येत्याशंक्याह।सर्वकर्मेति।आत्मनःसाक्षात्कारस्तुकस्यचिच्छीघ्रंजायतेसर्वेषांकर्मणांतत्वज्ञानो
त्पत्तिप्रतिबंधकदुरितानांक्षीणत्वात्कस्यचित्तुचिरकालेनजायतेप्रतिबंधकबाहुल्यादितिभावः॥२५॥

कूटस्थानीति॥ अनारब्धकार्याणि अदत्तफलान्येव नश्यंतीत्यर्थः॥२६॥ ज्ञानादूर्ध्वमिति पुण्यं पुण्यजन
कं विहितं कर्मेत्यर्थः॥ पापं पापजनकं निषिद्धं कर्मेत्यर्थः॥ तदेवं तत्त्वज्ञानिनः संचितयोः पुण्य
योर्नाशं आगामिनोश्चानुत्पत्तिं वदता श्लोकद्वयेन तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ
तद्व्यपदेशात्॥ इतरस्याप्येवमसंश्लेषः पाते त्विति अधिकरणद्वयस्यार्थ उपनिबद्धः॥२७॥ अना

॥रब्धकार्ये एव तु पूर्वे तदवधेरित्यधिकरणोक्तिं तां प्रारब्धकर्मणां भोगादेव क्षयं व टीकानी ओ
॥क्तुं प्रारब्धं क्षयति॥ शरीरे तितद्भोगेनैवेति तथा चश्रुतिः तस्य तावदेव चिरमिति यत्तु श्रुत्यं टीकानी ओ लोछे

॥कूटस्थानीति कर्माणि कोटिजन्मार्जितान्यपि॥२५॥ ज्ञानेनैव विनश्यंति न तु कर्मायुतैरपि॥२६॥
॥ज्ञानादूर्ध्वं तु यत्किंचित् पुण्यं वा पापमेव च॥ क्रियते बहु वाप्यल्पं न तेनायं विलिप्यते॥२७॥
॥शरीरारंभकं यत्तु प्रारब्धं धर्म तन्मतं। तद्भोगेनैव नष्टं स्यात् न तु ज्ञानेन नश्यति॥२८॥ ११५

तद्यथा पुष्करपलाशे आपो न श्लिष्यंते एवमेवं विदि पापं कर्म न श्लिष्यत इति श्रुतेः इहैव एतत्तरतीत्या
दावत्प्रारब्धेतरविषयमिति भावः॥२८॥

निर्मोह इति॥ निवृत्तावरण इत्यर्थः॥ संचरतीति यावत्॥ प्रारब्धं विक्षेपस्यानुवृत्तेरिति भावः॥२९॥ यथा अ
हिनिर्ल्वयनी सर्पत्वक् कंचुकनिर्मोकापरपर्याया अहिनिर्ल्वयनी॥ सा यथा इक्षुर्भुजंगस्य पूर्वं सर्पशरी
रे वस्थानदशायां भयप्रदा ततः सर्पत्यागानंतरं तु अस्य इक्षुः किमपि न भयं न तद्वदयं जीवन्मुक्तः पूर्वं ये
षां भयप्रद आसीत् तेषामपि सांप्रतं भयप्रदो नेत्यर्थः॥ एतेन तद्यथाहि निर्ल्वयनी वल्मीके मृता त्यादि वृह

निर्मोहो निरहंकारो निर्लेपः संगवर्जितः॥२८॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि॥ यः प
श्यन् संचरत्येष जीवन्मुक्तो निधीयते॥२९॥ अहिनिर्ल्वयनीयद्वद्दृक्षुः पूर्वं भयप्रदा॥ न तोऽस्य
तत्रायं किंचित् तद्वद्दृक्षुरयं जनः॥३०॥

दारण्यकश्रुतिरिहैवं व्याख्याता॥ स्कंदपुराणे तु यथात्मकां त्वचं सर्पः पुनः स्वात्मभावेन न पश्यति तथाहि
मानपि देहं नात्मत्वेनाध्यवस्यतीत्येवमर्थतया श्रुतिरियं व्याख्याता॥ तदुक्तं ब्रह्मगीतायां अहिनिर्ल्वयनी मुक्ता
यथाहिः स्वात्मना पुनः न पश्यति तथा विद्वान् न देहेऽहंमतिं भजेदिति अयं जनः जीवन्मुक्तो देहः इषु जीव
न्मुक्तदेहस्येत्यादिक्रमेण प्रकृतग्रंथोऽपि तदेकवाक्यतयैव व्याख्येयः॥३०॥

विरज्य सर्वजन्तुभ्य इत्यारभ्य एतावत्पर्यंतं क्रमिकानि साधनान्युपन्यस्तानि तत्र वैराग्यपारम्यं साधनमे
व दुर्लभतरं तस्मिन्सति देवेतरसाधनानि जातप्रायाणीत्याशयेनाह ॥ यदेति ॥ ३२ ॥ ज्ञानोत्पत्तौ स
त्यां मोहेन विलंब इत्याह मोहस्येति । ग्रामांतरप्राप्तिः पश्चादि लोकांतरभोग्यं च स्वर्गादि विलंबेन ल

॥ यदा सर्वे प्रमुच्यंते कामा येऽस्य वशं गताः ॥ अथ मर्त्योऽमृतो भवत्येतावदनुशासनं ॥ ३२ ॥
॥ मोहस्य न हि वासोऽस्ति न ग्रामांतरमेव वा । अज्ञानहृदयग्रंथिर्नाशो मोह इति स्मृतः
॥ ३३ ॥ वृक्षाग्रच्युतपादो यः स तदैव पतत्यधः ॥ तद्वत् ज्ञानवतो मुक्तिर्जायते निश्चिता
॥ पितु ॥ ३४ ॥

भ्यते मोहस्य तु न तथात्वं यतो ज्ञानस्य तत्प्रमुक्तस्य हृदयग्रंथेरज्ञानान्निवृत्तेरेव मोहः ॥ ३३ ॥ वृ
क्षेति यथा वृक्षात्प्रच्युतस्य भूमिप्राप्तौ न विलंबस्तथा ज्ञानिनो मुक्तावपि न विलंब इति भावः ॥ ११९
॥ ३४ ॥

तीर्थे वा श्वपचगृहे वा उभयथाप्यविशेष इति भावः । तथा यदि वा नष्टचेतनो भ्रान्तविषय
कवृत्तिश्च सन् । यदि वा ज्ञानादेव देहं परित्यजन् सर्वथापि जीवन्मुक्तः मुच्यते प्रारब्धक्षयांते पर
ममुक्तिं लभत एवेत्यर्थः । अयं भावः तीर्थादिमरणस्य ज्ञानप्राप्त्युपायत्वात् चंडालगेहादौ मरणस्य
च ज्ञानप्रतिबंधकत्वात् तदुभयस्य तो विधानुत्पन्नतत्त्वज्ञानान् प्रत्येव संभवति तथा भ्रान्त्यनुसंधा

॥ तीर्थे चंडालगेहे वा यदि वा नष्टचेतनः ॥ परित्यजन् देहमेव ज्ञानादेव विमुच्यते ॥ ३५ ॥ संवी
॥ तो येन केनाश्नन् भक्षं वाभक्षमेव वा । शयानो यत्र कुत्रापि सर्वात्मा मुच्यते त्र सः ॥ ३६ ॥

नमत्पि आवरणवत्तं प्रत्येव तन्निवर्तकतया प्रयुज्यते ॥ ३५ ॥ जीवन्मुक्तस्य तु सर्वो ब्रह्मसा
क्षात्कारेणैव निवृत्तावरणतया प्रारब्धक्षयांते प्रागपि व्यक्तचैतन्यमात्रेण विद्यानिवृत्तिसंजाता
लब्रह्माकारवत्त्वात् सत्त्वासत्त्वयोर्न कश्चिद्विशेषः स्फुटं चैतन्यत्वेनेति ॥ ३५ ॥ संवीत इति येन केन उत्कृष्टे
नापकृष्टेन वा वस्त्रेण संवीतः संवृतः संवरणे क्तप्रत्यये संप्रसारणं तथा भक्षमभक्षं वाश्नन्
यत्र कुत्रापि शयानः सः जीवन्मुक्तः प्रारब्धक्षये सति मुच्यते ॥ ३६ ॥

योगी पूर्ववन्न लिप्यत इत्यस्मिन्नर्थे लोकिकं दृष्टांतमाह। क्षीरादिति। यद्वाज्यं क्षीराद्दुद्धृतं तदेव पुनः
पयसि क्षिप्तं सत् तेन पयसा सह एकतां पूर्ववदेकरसतां नयात्येव। तथा ज्ञानवान् संसारे अहं
कारादौ एकतां न याति तटस्थो नैव परकीयशरीरादिकमिव पश्यति न तु स्वात्मतयेत्यर्थः॥३७॥
न तइति हे महीपते संशेते इति संशयं संदेहानं चित्तं यस्य तथाभूतस्त्वं नित्यं इममध्यायं पठ वै १

।क्षीराद्दुद्धृतमाज्यं यत् क्षिप्तं पयसि तत्पुनः। न तेनैकतां याति संसारे ज्ञानवांस्तथा॥३७॥
॥नित्यं पठति योध्यायमिमं राम श्रृणोति च॥ समुच्यते देहबंधादनायासेन राघव॥३८॥
॥ततः संयतचित्तस्त्वं नित्यं पठ महीपते। अनायासेन तेनैव सर्वथा मोक्षमाप्स्यसि॥
॥३९॥ ॥इति श्रीपद्मपुराणे शिवगीतासु त्रयोदशोध्यायः॥१३॥ ॥

तेनैव मोक्षमाप्स्यसि। इत्थं साधनोपन्यासपूर्वकं मुक्तेः प्रपंचितत्वादेतत्परिशीलनेन साधनसंपाद
नमपि सुलभमिति श्लोकान् प्रति प्रकटयितुं इयमुक्तिः रामस्य स्वनएव एकीकृतत्वादिति दिक्॥ ११७
॥३९॥ ॥इति श्रीशिवगीताव्याख्यायां त्रयोदशोध्यायः॥१३॥ ॥श्री॥ ॥छ॥ ॥

भगवन्निति यदीत्यस्य यद्यपीत्यर्थः। तथा च हे भगवन् ते रूपं सच्चिदानंदाद्यात्मकं सर्वतः स्थितमात्मानं स
र्वव्यापितया यद्यपीक्ष्यते। अनावृतस्वरूपं विवीक्षते त्वां प्रति यथावदाप्यते इति यावत्। तथापि अहं
भिन्नोस्मि अविद्याप्रयुक्तत्वेदवानेव सन्तिष्ठामीति वक्ष्यमाणेनान्वयः॥१॥२॥ ननु तत्सर्वावरणानि
वृत्तिसमर्थं तत्वज्ञानं कुतो न संपादयसीति चिंत्यमाह यतः ब्रह्मानंदरूपं भगविषयः तथा अग्राह्यं

श्रीरामउ०॥ भगवन् यदि ते रूपं सच्चिदानंदविग्रहं। निष्कलं निष्क्रियं शांतं निरवद्यं नि
रंजनं॥१॥ सर्वधर्मविहीनं च मनोवाचामगोचरं॥ सर्वव्यापितयात्मानमीक्ष्यते
सर्वतः स्थितं॥ आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परं॥२॥

दुर्विज्ञेयं इति श्लोकोक्तं ब्रह्मलक्ष्यं वा ग्राह्यं च वेत्। अन्योपायं न जानीते इत्यादिनानन्तेन कारणेनेति
तथा च तस्मिन्स्मिन् दुर्विज्ञेये कथं चित्तं प्रवर्तयितव्यं तत्र उपाय ब्रूहीति भावः। ब्रह्म विशिनष्टि आत्म
विद्येति आत्मविद्या च तपश्च तद्द्वयं मूलं ज्ञानोपायभूतं उपनिषदां वरं महातात्पर्यविषयीभू
तं तया च तपसा ब्रह्मजिज्ञासस्व वेदैश्च सर्वैरहमेव वेद्य इत्यादि श्रुतिभिस्तपः प्रज्ञप्ति ज्ञानोपाया

वगमनेपिदुर्ज्ञेयबोधनेनुपायांतरमाकांक्षेद्इतिभावः॥३॥४॥५॥स्थूलेतितत्रदुर्विज्ञेयवस्तुनिस्थू
लसौरांजिकान्यायेनचित्तंप्रवर्त्तयेदित्यन्वयः॥अयंभावः यथासुहृत्स्वच्छंजलमपितृष्णयागवे
षयंतंप्रतिकिंचिद्दूरोपलभ्यमानमरुमरीचिकाजलमेवपरमार्थजलत्वेनोपदिश्यतावद्दूरंनी
त्वाततःपरमार्थजलमीषत्संनिहितमंगुलिनिर्देशेनप्रदर्श्यतेतथाअन्नमयप्राणमय

॥अमूर्त्तंसर्वचिन्मात्रमाकारंकारणकारणं॥३॥यत्रदृष्टश्यमग्राह्यंतत्काष्ठंवाकथंभवेत्॥अ
त्रोपायमजानानस्तेनजिज्ञासुःशिवशंकर॥४॥श्रीभगवानुवाच॥ ॥शृणुरामप्रवक्ष्यामित
त्रोपायंमहाभुज॥सगुणोपासनाजिक्तचित्तैकाग्र्यंविधायच॥स्थूलसौरांजिकान्यायात
त्रचित्तंप्रवर्त्तयेत्॥

मनोमयविज्ञानमयानंदाख्यान्पंचकोशान्क्रमेणोपदिश्यततःस्वस्वांतरमप्युद्दिष्टव्यमितिएतेनशा ११८
खाचंद्रन्यायस्थूलारुंधतीन्यायादयोपिव्याख्याताः॥स्थूलसौरांजिकेत्यत्रशब्दसाधुतालिंत्यं॥

स्वरस्येमेसौराःमरीचयःतेषामुपस्तंभनंःतस्याख्यानंसौरांजिकातत्करोतीतितदाचष्टेइत्या
ख्यानार्थकणिजंताद्धात्वर्थनिर्देशेण्वुल्इक्षुमक्षिकेत्यादिवत्तत्रस्थूलदेहरूपेअन्नपरिण
मत्वादन्नमयेपिंडेआत्मबुद्धिःअहंअस्तिनाचकदापिनपिनह्रीयतेतदपगमायंआत्मात्यवपु
शरीराद्भिन्नइतिसम्यक्वैधर्म्यानुसंधानपूर्वकंचिंतयेदितिव्यवहितेनसंबंधः॥वैधर्म्य

तस्मिन्नन्नमयेपिंडेस्थूलदेहेतनूकृतां॥६॥जन्मव्याधिजरामृत्युनिलयेवर्त्ततेदृढा॥आ
त्मबुद्धिरहंमानात्कदाचिन्नैवहीयते॥७॥आत्मानजायतेनित्योम्रियतेवाकथंचन॥संजा
यतेस्तिविपरिणमतेवर्द्धतेपिच॥८॥क्षीयतेनश्यतीत्येतेषड्भावावपुषःस्मृताः॥आत्मनो
नविकारित्वंघटस्यनभसोयथा॥९॥

मेवोयपादयतिसंजायतइत्यादिनाएतेनषड्भावविकाराःशरीरस्योक्ताःपूर्वोत्तरग्रंथैस्तुआत्म
निस्तद्विरहउक्तः॥६॥७॥८॥९॥

न ७१

एवंप्रागुक्तवैधर्म्यबलेनान्नमयस्यानात्मत्वेनिर्णीतेतोप्यांतरः। प्राणमयेआत्मत्वेनोपदेष्टव्यइ
त्याशयेनतमाह॥मृषेत्यादिनामृषानिःक्षिप्तंदेहमयथातदाकारंततसंश्लिष्टंततोभ्यर्हितंचतथे
तिभावः तथाप्यात्मत्वानिराकरोतिनायमात्मेति अत्र हेतुमाह॥जडोयतइति।यतोयंप्राणमयोजडः

॥एवमात्मावपुस्तस्मादितिसिंचितयेद्बुधः॥मृषानिःक्षिप्तदेहांतःकोशःप्राणमयोन्नतु॥१०॥ कि २
॥वर्ततेंतरतोदेहेबद्धःप्राणादिवायुभिः।कर्मेंद्रियैःसमायुक्तश्चलनादिंयात्मकः॥११॥क्षुत्पि
॥पासापराभूतोनायमात्माजडोयतः॥चिद्रूपआत्मायेनैवस्वंदेहमभिपश्यति॥१२॥

येनतुप्राणमयारव्यंस्वंस्वस्वमदेहंअभिपश्यतिसआत्मातुचिद्रूपःअत्रसंदेहमित्यत्नात्प्राणमयस्यलिं ११९
गशरीरेंतर्भावमभिप्रेतितथाहि।जीवस्यत्रीणिशरीराणिस्थूलंसूक्ष्मंकारणंतत्रजाग्रति तत्रस्थूलशरीरा
विशिष्टोन्नमयःतस्यचात्मत्वोपदेशेनस्वजा॥ ।रादन्यस्यपुत्रमित्रादेरात्मत्व[illegible]गन्तः॥

त यम १

लिंगशरीरंतुसप्तदशात्मकंयत्प्राक्॥प्रपंचितंतत्सूक्ष्मशरीरंतत्रप्राणमयो[illegible]विज्ञानमया न १
णांमंतर्भावः।तत्रसंकल्पविकल्पात्मकत्वरूपदितंमनःनिश्चयात्मकत्व[illegible]पहितंमनःनि
श्चयात्मकत्वरूपहितंविज्ञानंसुषुप्तिकत्व[illegible]नास्ममानमविद्याच्छिन्नंतुकारणशरीरं।सएव

॥आत्मैवाहंपरंब्रह्मनिर्लेपःसुखनीरधीः॥नतदस्तीतिकिंचैनंनतदस्तिकश्चन॥
॥१३॥ततःप्राणमयेकोशेकोशोस्त्येवमनोमयः॥ससंकल्पविकल्पात्माबुद्धींद्रियसमा
॥युतः॥१४॥कामःक्रोधस्तथालोभोमोहोमात्सर्यमेवच॥मदश्चेत्यरिषड्वर्गोममतेच्छा
दयोपिच॥१५॥

चानंदमयःएतेचान्नमयादयःपंचअसिकोशवच्छादकत्वसाम्यात्पंचकोशाइत्युच्यंतेइतिदि
क्॥

विज्ञानमयंकोशमाह॥तत्रत्विति तत्र तस्मिन् प्रागुक्ते मनोमयकोशघटके अहंकारे वेदाद्यशास्त्रा
णि च तेषामर्थे निश्चयरूपाया बुद्धिर्विज्ञानमयकोश इति संबंधः। तथा च मनोमयविज्ञानमय
योः संकल्पाध्यवसायरूपे १७॥१८॥१९॥२०॥२१॥ शक्तिनिश्चयात्मकुक्लशक्तिरूपेणोपाधियुक्तो नेदृ
लें

१३॥ मनोमयस्य कोशस्य धर्मा एतेस्य तत्र तु। या कर्मविषया बुद्धिर्वेदशास्त्रार्थनिश्चिता॥१६॥
सात्तु ज्ञानेंद्रियैः सर्द्धं विज्ञानमयकोशतः। इह कर्तृत्वाभिमानी स एव तु न संशयः॥१७॥
इहामुत्रगतिस्तस्य स जीवो व्यावहारिकः॥ व्योमादिसात्विकांशेभ्यो जायंते धीन्द्रियाणि
तु॥१८॥ व्योम्नः श्रोत्रं भुवो घ्राणं जलाज्जिह्वाथ तेजसः॥ चक्षुर्वायोस्त्वगुत्पन्ना तेषां भौति
कतातत॥१९॥ व्योमादीनां समस्तानां सात्विकांशेभ्य एव तु। जायते बुद्धिमनसी बुद्धिश्चे
न्निश्चयात्मिका॥२०॥ वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि तु। व्योमादीनां रजोंशे १२०
१ घस्ते भ्यो वातेभ्यस्तान्यनुक्रमात्॥२१॥

निभावः॥

सप्तदशकमिति सप्तदशानां संघः सप्तदशकं संख्यार्थे कन् षोडशकलः पुरुषायत्तः पुरुषं प्राप्येति श्रुति
श्रुतिस्थमनोबुद्ध्योर्धर्मैक्यादेकत्वेन गणना मन्तिप्रेत्यर्वत्तेति बोध्यं॥२२॥ एतदिति सार्वविभक्तिकस्त
सिः यतो यस्यामवस्थायां जाग्रत्स्वप्नरूपायां एतत् पूर्वोक्तं लिंगशरीरं तत्प्रायः पिंडवत्परस्पराध्यासा
त्साक्षिचैतन्येन सह संयुतं तदा आनंदमयः कोशो भोक्तृं प्राप्नोति॥२३॥२४॥ आनंदमयंकोशमाह॥

समस्तेभ्यो रजोंशेभ्यः पंच प्राणादिवायवः। जायंते सप्तदशकमेवं लिंगशरीरकं॥२२॥ एत
ल्लिंगशरीरं तु तत्प्रायः पिंडवद्यतः। परस्पराध्यासयोगात्साक्षिचैतन्यसंयुतं॥२३॥ त
दानंदमयः कोशो भोक्तृत्वं प्रतिपद्यते। विद्याकर्मफलादीनां भोक्तेहामुत्र स स्मृतः॥२४॥ य
दाध्यासं विहायैष स्वस्वरूपेण तिष्ठति। अविद्यामात्रसंयुक्तः साक्ष्यात्मा जायते तदा॥२५॥

यदेति यदा सुषुप्तौ एष आत्मा अध्यासं लिंगशरीराध्यासं विहाय तिष्ठति। स्वापे अहंकारादेर्विलयप्र
वाणादिति भावः। तदा स एव जायते नभोक्ते सर्वथः स एवानंदमयः कोश इति भावः इदं च पूर्वश्लोके ए
व स्फुटिकृतं तल्लिंजयशब्दो साक्षी नास्त्येव तथा सत्यवस्थात्रयसाक्षित्वं प्रागुक्तं व्याकुप्येतेत्यतां आ
ह॥२५॥

द्रष्टेति॥अंतःकरणादीनां तथा अनुभवस्मृत्यादिसकलतद्वृत्तीनां स एव द्रष्टा तथा च सुषुप्तौ साक्ष्येवास्ती
ति पूर्वश्लोकार्थो न तु साक्षी सुषुप्तावेवेति नोक्तो दोषः स्यादिति भावः॥२५॥ यद्यप्यविद्योपहितस्य साक्षित्वेन
स्यैव च सुखदुःखादिनाशकत्वे परधायं सुखादिकमप्यपरोक्षतया भासेतेत्यपि प्रसंगः तथाप्यंतःकरणोपहि
तत्वमपि अपेक्षितं अतो नोक्त दोषः अत एवावश्यकत्वादंतःकरणमेव रस्तु जलदृष्टावत्साधारणं साक्षित्वं सु

द्रष्टोंतःकरणादीनामनुभूतेः स्मृतेरपि॥२६॥ अंतोंतःकरणाध्यासाद् अध्यासित्वेन चात्मनः
कूटस्थत्वं साक्षिता चेति द्वैधं तस्योपपद्यते॥२७॥

पाधिः अप्रमाततायां तु विशेषणं तं हितिनस्सिंहात्मम भोपाहान् आकृःत देवं विंबप्रतिविंबसाधारणं चैत
न्यस्यैव न अविद्योपहितस्यांतःकरणोपहितस्य वासाक्षित्वं अंतःकरणताहात्म्यापन्नस्य प्रतिविंबचै
तन्यस्यैवं अप्रमातृतेति स्थितं। इदानीं विंबस्य नजो कूटत्वं किंतु साक्षित्वे वप्रतिविंबस्य त्वहंकारताहा १२१
त्म्याद्धो कूटनेत्याह॥ अत इति॥२६॥ २७

कूटत एवावश्यकत्वादेः आतपश्चेति। न च प्रकाशेतस्मिन्नेव ब्रह्मात्मके प्रकाशो आतप इव आतपः अन
वृतविंबस्वरूपं छायेव छाया आवृतस्वरूपो जीवः इत्युभयं कल्पितं तेन इदं प्रकाशते। वस्तुतस्तु स्वरूपैक
मेवेति भावः। एतेन ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदंति। पंचाग्नयो ये च त्रिणा
पिबंतौ सुकृतस्य गुहां प्रविष्टौ परमे परार्धे छायातपौ ब्रह्मविदो वदंति। पंचाग्नयो ये च त्रिणा

॥आतपश्चापि तच्छाया प्रकाशे न विराजते॥ एको भोजयिता तत्र भुंक्तेऽन्यः कर्मणः फ
॥लं॥२८॥ क्षेत्रज्ञं रथिनं विद्धि शरीरं रथमेव तु॥ बुद्धिं तु सारथिं विद्धि प्रग्रहं तु मनस्तथा॥
॥२९॥ इंद्रियाणि हयान्विद्धि शेविंयत्तेषु गोचराः॥ इंद्रि[illegible]नसा युक्तं भोक्तारं विद्धि पूरुषं॥३०॥

विकेत इति कठवल्लीश्रुतिरर्थत उपनिबद्धा छायातपशब्दयोर्जीवेशपरत्वं गुहां प्रविष्टावात्मा
नौ हि तद्दर्शनादित्यधिकरणे निर्णीतं॥ एक इति एकः ईश्वरः भोजयिता अन्यो जीवस्तु कर्मणः फलं
स्वर्गादि भुंक्ते इत्यर्थः। एतेन ऋतौ पिबदपिबतेपि वच्छत्रिणो गौणः छत्रिनिशब्दवदित्युक्तं। सुकृतस्य कर्म
णः ऋतं सत्यं अवश्यंभावित्वात्फलमिति च वाक्यशेषो व्याख्यातः॥२८॥ आत्मानं रथिनं विद्धीत्यादिकं तदुत्तर
श्रुतिरप्यर्थत उपनिबद्धाति क्षेत्रज्ञमित्यादिना अत्र क्षेत्रज्ञशब्देनोक्तो आत्मशब्दो जीवपर इत्युक्तं। तं जीवं
रथस्वामिनं विद्धि। शरीरं रथं विद्धि। बुद्धिं तु सारथिं विद्धि। बुद्धिरूपेण सारथिना इंद्रियाश्वाः प्रेर्यंते

संकल्पविकल्पात्मकमनस्करसनापन्नं रूपादिविषयास्तद्गोचराः अत्र संचरणप्रदेशाः। तदेवं रथा
दिरूपकल्पनया शरीरेंद्रियादिविशिष्टस्यैव जीवत्वं ननु सुषुप्तिसाधारणस्यानंदमयस्येति प्रक
तार्थः॥ स्फुटितस्तः॥ २९॥ ३०॥ एवमित्तिंउक्तरीत्या अन्नमयाद्यानंदमयांतान्क्रमेण ब्रह्मतयाचउ
पास्ते सः सारभूतमात्मानं विंदति। यथा कदलीतरोर्वल्कजानां मध्ये एकं कं उद्घाटयन्पुरुषः

॥ एवं स तत्त्वादियुक्तः सन्नुपास्ते यः सदा द्विजः॥ उच्चाप्रोध्याद्यैः क्रमेणैव यथैव कदलीत
॥ रोः॥ वल्कलानि ततः पश्चाल्लभते सारमुत्तमं॥ ३१॥ तथैव पंचकोशेषु पूर्वोक्तेषु
॥ क्रमान्मनुजः। मनः संक्रमयन्क्रमात्॥ तेषां मध्ये ततः सारमात्मानमपि विंदति॥
॥ ३२॥

क्रमेणांतर्निगूढसारभूतेन तु प्रथमत एव नहत्॥ ३१॥ तथैवेति॥ पंचकोशेषु पूर्वोक्ते
षु क्रमान्मनः संक्रामयन्तेषां मध्ये सारं तदधिष्ठानभूतमित्यर्थः॥ ३२॥ तदेवं पंचको १२२
शानवतार्य आनंदमयादपि आंतरं ब्रह्म पुच्छं प्रतिष्ठेति श्रुत्या प्रधान्येन निर्दि
ष्टं वास्तवं स्वरूपमाह॥ एवं मनः समाधायेति अस्थूलमनणु अह्रस्वमदीर्घमिति
निःश्रुतिरस्थूलाद्युक्तिः। तद्गोचरं तत्तात्पर्यविषयीभूतमित्यर्थः॥ तदेवमानंदमयो

१८ नस्य प्रधानत्वं तया श्रुतौ निर्दिष्टः। किंतु पुच्छं प्रतिष्ठेति वाक्यार्थभूतसर्वाधारब्रह्मप्रतिप
त्त्युपायतयैवेति श्रुतितात्पर्यं स्फुटीकृतं॥ अत एव स्कांदेपि पंचकोशावतारणप्रसंगेनोक्तं आ
नंदेन सदा पूर्णः कोशो ज्ञानमयः तथानंदमयश्चापि ब्रह्मणान्येन साक्षिणा सर्वांतरेण सं
पूर्णो नान्येन केनचिदिति नाप्यं चैतत् ब्रह्मविदाप्नोति परमिति फलवत् ब्रह्मज्ञानं प्रक्रम्य
८२
॥ एवं मनः समाधाय संयतो मनसि द्विजः। अथ प्रवर्तयेच्चित्तं निराकारे परात्मनि॥ ३३॥
॥ ततो मनः प्रगृह्णाति परमात्मानमेकलं। यत्तदद्रेश्यमग्राह्यमस्थूलाद्युक्तिगोचरं॥ ३४॥ रा
॥ मउवाच॥ भगवन्श्रवणेनैव प्रवर्तंते जनाः कथं। वेदशास्त्रार्थसंपन्ना यज्वानः सत्य
॥ वादिनः॥ ३५॥ भूरूपेणोपि तथात्मानं जानंते नैव केचन॥ ज्ञात्वा दिमन्यते मिथ्या किमेतन्न
वमायया॥ ३६॥

सत्यं ज्ञानमनंतं ब्रह्मणा विपश्चितेति श्रुतिब्रह्मेति चेद्देति ब्रह्मणस्त्वावाप्य समानत्वात्। अनल
योत्तरमीमांसायां आनंदमयोभ्यासादित्यधिकरणे भाष्यकारेरयमेवार्थः सिद्धांतितः एकदेशिनांमा
ख्यानांतरं च दूषितं एतेन भाष्यकाराणां सूत्रकारस्वरसविरोधं दूषणं तयोज्ञापयंतः परस्ताः वक
तरपुंग वचनानुरोधेन सूत्रस्याधिव्याख्येयत्वात्। अन्यथा सूत्रत्वनः स्वोक्तिविरुद्धाभिधायित्वाप

न्नेरितिदिक्।३३।३४॥ अंवणे जनाः न प्रवर्त्तंते एव कथमित्यन्वयः ३५॥ काचनस्थ एवं ततः संतोपि नज्ञा
नने कश्चित् ज्ञात्वापि अचरणादिनां परोक्षनिश्चयवान् सन्नपि मिथ्यात्वं संसारमेव मन्यते
आद्रियत इत्यर्थः॥३६॥३७॥ अनक्ता इति॥ ममअनक्ताः ते फलं कामयमानाः संतः तिष्ठंतीति
शेषः॥३८॥ यतः यस्मात्कर्मफलं अत एव क्षयादिदोषदुष्टः ततः अपि क्षुत्वादिकं अविज्ञायक

॥श्रीभगवानुवाच॥ ॥एवमेव महाबाहो नात्र कार्या विचारणा॥ दैवी ह्येषा गुणमयी मम
॥माया दुरत्यया॥ मामेव ये प्रपद्यंते मायामेतां तरंति ते।३७।अनक्ता ये महाबाहो मम
॥श्रद्धाविवर्जिताः फलं कामयमानास्ते चैहिकामुष्मिकादिकं॥३८॥ क्षयिष्णु त्वं सातिशयं
॥ततः कर्मफलं मतं॥ तद्विज्ञाय कर्माणि ये कुर्वंति नराधमाः॥३९॥ मातुः पतंति ते गर्भे म
॥त्योर्वक्त्रे पुनः पुनः॥४०॥ नानायोनिषु जातस्य देहिनो यस्य कस्यचित्॥ कोटिजन्मार्जितैः
॥पुण्यैर्मयि भक्तिः प्रजायते॥४१॥ स एव लभते ज्ञानं मद्भक्तः श्रद्धयान्वितः। नान्यः कर्माणि
॥कुर्वाणो जन्मकोटिशतैरपि॥ ततः सर्वं परित्यज्य मद्भक्तिं समुदाहर॥ ॥४२॥ १२३

र्वंति फलकामनयानुतिष्ठंतीत्यर्थः॥३९॥ समुदाहरं कुर्वीत्यर्थः॥४२॥

त्वा इति त्वां अहं मोक्षयिष्यामि अत एव मा शुचः मा शोकेन विशीर्णो भूः शुचिरसौ चैविशरणे छेदे
चैविशरणे छेदे चेति दैवादिकान्माङि लुङ् इति लोवेतित्ते कल्पिकोऽअंडादेशः॥४३॥४४॥ र

॥सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज॥ अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥
॥४३॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्॥ यत्तपस्यसि राम त्वं तत्कुरुष्व
॥मदर्पणं॥४४॥ ततः परतरा नास्ति भक्तिर्मयि रघूत्तम॥४५॥ ॥इति श्रीपद्मे पंचको
॥कोवर्णनं नाम चतुर्दशोध्यायः॥ ॥श्रीराम उवाच॥ भक्तिस्ते कीदृशी देव जायते वा
॥कथं च सा॥ यया निर्वाणरूपत्वं लभते मोहमुत्तमं॥१॥ तद्वद गिरिजाकांत प्राप्यते येन नि
॥निर्वृतिः॥२॥ श्रीभगवानुवाच॥ यो वेदाध्ययनं यज्ञं दानानि विविधानि च॥ मदर्पणधि
॥या कुर्यात्स मे भक्तः स मे प्रियः॥३॥ नर्यत्नमसमादाय विशुद्धं श्रोत्रियालयात्॥ अग्नि
॥शिलादिनिर्मंत्रै रग्निमंत्रय यथाविधिः॥४॥

ध्यन्तमेति रघुशार्दूलहरणया रक्षेपस्य पुवर्त्तते प्रत्तम॥४५॥ ॥इति शिवगीताव्याख्यायां चतुर्दशो
ध्यायः॥ ॥१२॥३॥४॥ ॥

॥५॥६॥७॥ त्वक्करेवांतरभेदान् प्रपंचयितुं पंचदशोऽध्याय आरभ्यते। तत्र ततः परत
रोऽत्र भक्तो मम लोकेन विद्यते॥ इत्यंतं सार्धश्लोकाष्टकं स्पष्टार्थं॥८॥ कंठवल्लीषु द्वितीयवल्ल्यां अ
न्यत्राधर्मादन्यत्रास्मात्॥ कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति न

उद्धूलयति गात्राणि तेन चार्चति मामपि। तस्मात्परतरा भक्तिर्मम राम न विद्यते॥५॥
सर्वदा शिरसा कंठे रुद्राक्षान् धारयेत्तु सः। पंचाक्षरीजपपरः स मे भक्तः स मे प्रियः
॥६॥ भस्मच्छन्नो भस्मशायी सर्वदा विजितेंद्रियः। यस्तु रुद्रं जपेन्नित्यं चिंतयन्मामनन्य
धीः॥७॥ स तेनैव च देहेन शिवः संजायते स्वयं॥ जपेद्यो रुद्रसूक्तानि तथाथर्वशिरः प
रं॥८॥ कैवल्योपनिषत्सूक्तं श्वेताश्वतरमेव च॥ ततः परतरो भक्तो मम लोके न विद्यते॥९॥

चिकेत सामत्वं प्रतिपृष्टे सर्वे वेदा यत्पदमामनंतीत्यादिना ब्रह्मोपदिश्य॥ ॐमित्येतत् इत्यादिना एत १२४
दालंबनं ज्ञात्वा ब्रह्मलोके महीयते इत्यंतेन ॐकारोपासनमेव ब्रह्मप्राप्त्यालंबनानां मध्ये श्रेष्ठतममि

ति प्रतिपादितं तदेतच्चतुर्भिः श्लोकैरनुकारिभिः श्लोकैः संगृह्णाति। अन्यत्रेत्यादिभिः। न चास्य भक्तिस्तेत्री
दशोक्तपक्रमान्निर्गुणत्वशंकां तस्मात् इमं त्रयोर्मांतु प्रणवेन श्रेष्ठेन जयेत्॥ तस्मात्परतरो भ
क्तो मम लोके न विद्यते। इति वक्ष्यमाणां प्रत्यक्षपयोगीतया प्रणवोत्कर्षस्येह प्रस्तूयमानत्वादिति
श्लोकार्थकृत्। धर्मादन्यत्र धर्मफलविलक्षणमितियावत्। अन्यस्मात् अधर्मादप्यन्यत् तथा कृताकृता

अन्यत्र धर्मादन्यस्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताद्भव्याच्च यत्तद्वक्ष्यामि तच्छृणु।
॥१०॥ वदंति तत्पदं वेदाः शास्त्राणि विविधानि च। सर्वोपनिषदां सारं दध्नो घृतमिवोद्धृतं॥११॥ य
दिच्छंतो ब्रह्मचर्यं चरंति मुनयः सदा। तत्ते पदं संग्रहेण ब्रवीम्योमिति यत्परं॥१२॥ एतदेवा
क्षरं ब्रह्म चैतदेवाक्षरं परं॥ एतदेवाक्षरं ज्ञात्वा ब्रह्मलोके महीयते॥१३॥

त् कार्यकारणादन्यत् भूताच्च भव्याच्च कालात् अन्यत् कालत्रयापरिच्छिन्नमित्यर्थः। ईदृशं वस्तु वक्ष्यामि
शृणु॥१०॥ वदंतीति। पदं प्रापणीयं यद्वस्तु वेदाः वदंति तत्पदं प्रविष्यामि वक्ष्यामि छांदसोऽयं प्रयोगः इ
ति इत्थं प्रतिज्ञाय परं अनंतरं पंक्तिर्दिष्टं कठवल्लीश्रुतौ ॐमित्येतदित्यनेन एतदेवाक्षरं ब्रह्म सगुणं
ब्रह्मेत्यर्थः। एतदेव परं निर्गुणं ब्रह्म एतदेवाक्षरं ज्ञात्वा ब्रह्मत्वेनोपास्य ब्रह्मलोके महीयते इति श्रुतिम्

यत उपनिबध्नन् । प्रणवस्य मंत्रांतरापेक्षया अभ्युत्कर्षं स्फुटीकृतवान् ॥ १३ ॥ ओमिति यत् इदमेव परं ब्रह्म इत्यन्वयः । यः छंदसां वैदिकवाग्रूपाणां धेनूनां गवां ऋषभत्वेन चोदितः कथितः उपदिश्यते यतः पतिः नियामकः अमृतस्य मोक्षस्य धारणः संसारस्य सेतुरिव सेतुः । इदृशं यत् ब्रह्म

छंदसां यस्तु धेनूनामृषभत्वेन चोदितः । इदमेव पतिः सेतुरमृतस्य च धारणम् । १४ । मे
दसा पिहिते कोशे ब्रह्म तत्परमोमिति । चतस्रस्तस्य मात्राः स्युरकारोकारकौ तथा ॥ १५ ॥
मकारस्यावसाने धर्मात्रेति परिकीर्तिता ॥ पूर्वत्र तु भवेदृग्वेदो ब्रह्मा वसवस्तथा ॥
गार्हपत्यश्च गायत्री गंगा प्रातःसवस्तथा । द्वितीया च भुवो विष्णू रुद्रो त्रिष्टुप् यजुस्तथा ॥ १६ ॥

मेदसा पिहिते कोशे उपास्यत्वात् अथवा एतेन ओंकाराभेदेन ध्येयमिति फलितोऽर्थः ॥ तस्य प्रणवस्य १२५
चतस्रो मात्राः तत्र अकारस्य उकारस्य मकारस्य च मात्रात्रयं अवसाने चतुर्थी ॥ १७ ॥

अर्धमात्रेत्यर्थः ॥ यद्यपि नेदं व्याकरणानुगुणं तथाप्यारोपितेनापि रूपेणोपासनान्न कोऽपि विरोधः तत्र प्रथममात्रायां भूः ऋग्वेद ब्रह्मेत्यादयो ध्येयाः द्वितीयस्यां तु भुवर्लोको विष्णुरित्यादयो ध्येयाः तृतीयस्यां तु स्वर्लोकः सामानि चेत्यादि देवता ध्येयाः ॥ १८ ॥ अग्निरिति आहवनीयसंज्ञिको योऽग्निः स

यमुना दक्षिणाग्निश्च माध्यंदिनसवः स्मृतः । तृतीया च सुवः सामान्यादित्यश्च महेश्वरः ॥ १९ ॥
अग्निराहवनीयश्च जगती च सरस्वती । तृतीयं सवनं प्रोक्तमथर्वत्वेन यन्मतं ॥ २० ॥ चतुर्थी याव
सानेऽर्धमात्रा सा सोमलोकगा । अथर्वांगिरसः संवर्तकोऽग्निर्मरुतस्तथा ॥ २१ ॥ विराट्सभ्या
वसथ्यौ च स्मृता शुभ्रयज्ञपूरुषाः । प्रथमा रक्तवर्णस्या द्वितीया भास्वरा मता ॥ २२ ॥ तृतीया वि
द्युदाभासा चतुर्थी शुक्लवर्णिनी ॥ सर्वं जातं जायमानं तदोंकारे प्रतिष्ठितं ॥ २३ ॥

इत्यर्थः ॥ १९ ॥ चतुर्थीति अवसाने विद्यमाना चतुर्थी अर्धमात्रा सोमलोकगा इत्यादि ध्येयं । तत्र प्रथमा मात्रा रक्तवर्णा द्वितीया भास्वरा । तृतीया विद्युन्निभा चतुर्थी शुक्लवर्णा तस्य स्यामीति शुक्लवर्णा ध्येया ॥

नधर्मधारयान्मत्वथा यइतिनुप्रायिकं जातं जायमानं च सर्वं ॐकारे प्रतिष्ठितमिति पूर्वं तत्र मात्रासु

विश्वं भूतं च भुवनं विचित्रं बहुधा तथा। जातं च जायमानं यत्तत्सर्वं रुद्र उच्यते॥२३॥ त्रेताग्नेः स्मा
र्तवह्नेर्वा शैवाग्नेर्वा समाहृतं। भस्माभिमंत्र्य यो मां तु प्रणवेन प्रपूजयेत्॥२४॥ तस्मात्परत
रो भक्तो मम लोके न विद्यते। शालाग्नेर्दाववह्नेर्वा भस्मानीयाभिमंत्रितं॥२५॥ यो वलिंपति गा
त्राणि स शूद्रोपि विमुच्यते॥ कुशपुष्पैर्बिल्वदलैः पुष्पैर्वा गिरिसंभवैः। यो मामर्चयते नित्यं
प्रणवेन प्रियो हि सः। पुष्पं फलं समूलं वा पत्रं सलिलमेव वा। यो दद्यात्प्रणवैर्मह्यं तत्कोटिगु
णितं भवेत्॥ अहिंसा सत्यमस्तेयं शौचमिंद्रियनिग्रहः॥ यस्यास्त्यध्यापनं नित्यं स मे भक्तः स मे
प्रियः॥ प्रदोषे यो मम स्थानं गत्वा पूजयते तु मां। स परां श्रियमाप्नोति पश्चान्मयि विलीयते॥२६॥ १२९

ध्येयमुक्तं। संप्रति तु मात्राविशेषमनालंब्य संपूर्णे ॐकारे ध्येयं निर्दिश्यते॥२३॥ एवं यस्योंकारस्य प्रसंसा ह
तां विनियुंक्ते प्रणवेन प्रस्तूयेदिति॥२४॥२५॥२६॥२७॥२८॥

अष्टम्यां च चतुर्दश्यां पर्वण्यारूढयोरपि॥३०॥ भूतिभूषितसर्वांगो यः पूजयति मां निशि॥
कृष्णपक्षे विशेषेण स मे भक्तः स मे प्रियः॥ एकादश्यामुपोष्यैव यः पूजयति मां निशि।
सोमवारे विशेषेण स मे भक्तः स मे प्रियः॥३१॥ पंचामृतैः स्नापयेद्यः पंचगव्येन वा पुनः।
पुष्पोदकैः कुशजलैस्तस्मान्नान्यः प्रियो मम॥३२॥ पयसा सर्पिषा वापि मधुनेक्षुरसे
न वा॥ पक्काम्रफलजेनापि नालिकेरजलेन वा॥३३॥ गंधोदकेन वा मां यो रुद्रमंत्रम
नुस्मरन्॥ अभिषिंचेत्ततो नान्यः कश्चित्प्रियतमो मम॥३४॥ आदित्याभिमुखो भूत्वा ऊर्ध्व
बाहुर्जले स्थितः। मां ध्यायन्रविबिंबस्थमथर्वांगिरसं जपेत्॥३५॥ प्रविष्टो मे शरीरे
सौ यथा गृहपतिर्यथा। बृहद्रथंतरं साम देवव्रतानि च॥३६॥ तद्योगयाज्यदोहांश्च
यो गायति ममाग्रतः॥ इह श्रियं परां भुक्त्वा मम सायुज्यमाप्नुयात्॥३७॥ ईशावास्या
दिमंत्रान्यो जपेन्नित्यं ममाग्रतः। मत्सायुज्यमाप्नोति मम लोके महीयते॥३८॥

भक्तियोग इति नन्वेतावता यज्ञदानादीनां विभूतिधारणादीनामहिंसादीनां च भक्तिरूपत्वोक्तात
था च नानार्थतापत्तिः भक्त्या मामभिजानाती त्यादावावृत्तिप्रसंगश्चेति चेन्न। भजसेवायामिति धा
तोः भक्तिनिलुत्पन्नस्य भक्तिशब्दस्य तदाज्ञाकारित्वरूपसेवापर्यायतया प्रवृत्तिनिमित्तैक्येन नाना
र्थत्वाभावात्॥ श्रुतिस्मृती ममैवाज्ञे इति भगवदुक्त्या विधिनिषेधयोस्तदाज्ञात्वाध्यवसायात्
यथा विक्लित्यनुकूलव्यापारत्वेन रूपेणाधिश्रयणादीनधःश्रयणांतां बहूनपि दधतोपि पचेर्ननार्थ

भक्तियोगो मया प्रोक्त एवं रघुकुलोद्वह॥ सर्वकामप्रदो मत्तः किमन्यच्छ्रोतुमिच्छति॥ ॥
इति श्रीपद्मपुराणे भक्तियोगो नाम पंचदशोध्यायः॥१५॥

त्वमन्यत्र विस्तरः। उक्तं च हरिणा नत्रलक्षणेन नानार्थो यथा घट्टाणि च पचेरिति। तथा च काष्ठानि पचं
ति स्थालीपचतीत्यादौ प्रज्वलनधारणाद्यर्थपरत्वाध्यवसायवद्भक्तिशब्दस्याप्युपपदविशेष
वशेन तत्तद्रूपविशेषपरताध्यवसाय इति दिक्॥ ॥इति श्रीमद्द्विजाद्वैतसिद्धांतप्रति १२९
ष्ठापनैकधुरंधरश्रीकेवरदीवेंकटाद्रिनायकविरचितायां शिवगीताव्याख्यायां पंचदशोध्यायः॥
॥१५॥

अन्योपहासेति। अज्ञान् उपहसंतीत्यज्ञोपहासाः शोच्येष्वनुग्रहयोग्येषु उपहासस्तत्पराः। य
ज्ञोपहासाश्च भक्ताश्चेति द्वंद्वः। ते अत्र चाधिकारिण इति संबंधः। तथा भूतिरुद्राक्षधारिणः
पुरुषान्योद्वेष्टि स च ते च ते अनधिकारिणः योमामिति॥ मां गुरुं पाशुपतं व्रतं च यो द्वेष्टि

श्रीराम उ०॥ भगवन्मोक्षमार्गो यस्त्वया सम्यगुदाहृतः। तत्राधिकारिणं ब्रूहि तत्र मे सं
शयो महान्॥१॥ श्रीभगवानुवाच॥ ब्रह्मक्षत्रविशः शूद्राः स्त्रियश्चात्राधिकारिणः॥ ब्र
ह्मचारी गृहस्थो वानुपनीतोथवा द्विजः॥२॥ वनस्थो वाऽवनस्थो वा यतिः पाशुपत
व्रती॥ बहुनात्र किमुक्तेन यस्य भक्तिः शिवार्चने॥३॥ स एवात्राधिकारी स्यान्नान्य
चित्तः कथंचन। जडोंधो वधिरो मूको निःशौचः कर्मवर्जितः॥४॥ अज्ञोपहा[illegible] द्वेष्टि
सा भक्ताश्च भूतिरुद्राक्षधारिणः। लिंगिनो यस्य वा द्वेष्टि ते नात्रैवाधिकारिणः॥५॥
यो मां गुरुं पाशुपतं व्रतं द्वेष्टि नराधिप। विष्णुं वा स न मुच्येत जन्मकोटिशतैरपि॥६॥
विष्णुं वा यो द्वेष्टि सः जन्मनां कोटिशैरपि न मुच्यते संबंध॥२६॥ ॥ ॥ ॥ ॥

अनेन कर्मेति बहुतरेषु काम्यकर्मस्वासक्त इत्यर्थः॥७॥ अविमुक्त इति अविमुक्तं काशीक्षेत्रं पुंड
रीकं व्याघ्रपुरं अत्र यद्यप्यविशेषेण तारकं तत्र तत्र इत्युक्तं तथापि अविमुक्ते उं तु मात्रस्य तार
कोपदेशः तत्रापि पापीनां यातनांते। पापिनामिह जंतूनां यातनांते दिशेन्मतिमिति वचनात्॥
निष्पापानां तु प्राणोत्क्रमणकाल एवोपदेशः द्वारकाश्रीशैलादिक्षेत्रांतरेषु तु सन्मार्गनिष्ठाना
मधिकारिणां मरणकाल एवोपदेशः पापवतां तु जन्मांतरे काशीप्राप्तिद्वारेति वचनांतरबला

अनेककर्मसक्तोपि शिवज्ञानविवर्जितः। शिवभक्तिविहीनश्च संसारी नैव मुच्यते॥७॥
२ग आसक्ताः फलरागेण ये त्ववैदिककर्मणि। दृष्टमात्रफलास्तेन मुक्ताव्यधिकारिणः॥८॥
अविमुक्ते द्वारकायां श्रीशैले पुंडरीकके। देहांते तारकं ब्रह्म लभंते मदनुग्रहात्॥९॥

द्विवचनीयं तथा च मात्स्ये अविमुक्तसमं क्षेत्रं न भूतं न भविष्यति॥ ज्ञेयं विहीत निष्ठानां परमा
नंदमिच्छतां॥ या गतिर्विहिता सद्भिः सा विमुक्ते मृतस्य तु इति तथा च तत्रैव हत्वा पापसहस्रा
णि पश्चात्संतापमेत्य वै। यो विमुक्ते विमुच्येत स याति परमां गतिं॥ उपध्यानविहीनानां ज्ञानव १२८
र्जितचेतसां॥ तथा दुःखहतानां च गतिर्वाराणसी नृणामिति स्कांदेपि श्रीशैलादीनि तीर्थान्युपक्र
म्य। अन्यानि मुक्तिक्षेत्राणि काशीप्राप्तिकराणि वै। काशीं प्राप्य विमुच्येत नान्यथा तीर्थकोटिभिः॥

तथा तत्रैव रागादिदोषपरिपूर्णमनोवृत्तयः काशीपुरीमतुलदिव्यमहाप्रभावां। ये वा स्वयं त्वप
रतीर्थसमं तत्र पापिनो न सहते परिभाषणीयं। पुण्यवानितरो वापि मम क्षेत्रस्य सेवया। मुक्तो भ
वति देवेशि नात्र कार्या विचारणा॥ तथा बहुजन्मसु तत्साभ्यासाद्योगी मुच्येत वा न वा॥ मृतमा
त्रोपि मुच्येत काश्यामेकेन जन्मनेत्यादि। तथा जाबालोपनिषदि श्रूयते। अविमुक्तो वै दे
वानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनं। अत्र हि जंतोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं
ब्रह्म व्याचष्टे येनामृती भूत्वा मोक्षी भवतीत्यादि अत्र हि जंतुपदोपादानात् क्रिमिकीटादि
साधारण्येनैव मुक्तिर्लभ्यते तथा रामतापनीयेपि क्षेत्रेत्र तव देवेश यत्र कुत्रापि वा मृताः।
क्रिमिकीटादयोप्याशु मुक्ताः संतु न चान्यथेति तथा तत्रैव। मुमूर्षोर्दक्षिणे कर्णे यस्य क
स्यापि वा स्वयं। उपदेक्ष्यसि यन्मंत्रं स मुक्तो भविता शिवेत्यादि इदं च हेमाद्र्यादिमहानिबं
धेषु स्पष्टमिति विस्तरभयादुपरम्यते॥९॥

प्रविश्येति अत्र विप्रपदं त्रैवर्णिकोपलक्षणं अनुपनीतस्य विप्रस्य त्रैवर्णिकस्य एवं वक्ष्यमाण
रीत्या विधिरुदाहृतः। तमेव विधिमाह। नाभिव्याहरयेदिति ब्रह्म सवेदं नाभिव्याहरयेत् नोच्चारये
त्। अत्र व्याहरयेदिति युक्तः पाठः ह्रस्वपाठस्तु संज्ञापूर्वकत्वादृद्धेरप्रवृत्त्या आर्षत्वया वा समाधेयः स्व
धानिनयनादिति इदं च पित्र्यस्य सर्वस्य कर्मण उपलक्षणं अन्यत्रोदककर्मस्वधापितृसंयुक्तेभ्य इ
ति वसिष्ठोक्तेः अगृहीतात्सरः पुत्रः पित्रोः संस्कारमर्हतीति स्मृत्यंतराच्चेति हरदत्तः स्मृतिचंद्रिकायां

यस्य हस्तौ च पादौ च मनश्चैव सुसंयुतं॥ विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते॥१०॥
विप्रस्यानुपनीतस्य विधिरेवमुदाहृतः। नाभिव्याहरयेद्ब्रह्म स्वधानिनयनादृते॥११॥

तु कृतचूडोऽनुपनीतस्तु पित्रोः श्राद्धं समाचरेत्। उदाहरेत्स्वधाकारं न तु वेदाक्षराण्यसाविति स्मृति १२९
मुदाहृत्य कृतचौलस्तु कुर्वीत उदकं पिंडमेव च स्वधाकारं प्रयुंजीत वेदोच्चारं न कारयेदिति व्याघ्र
वचनं चोदाहृत्य मंत्रोच्चारणं वैकल्पिकमिति सिद्धांतितं॥११॥

स इति। सोऽनुपनीतस्तावच्छूद्रेण समः यावत्पर्यंतं वेदान्नजाननेन जानाति अर्थः छांदसं रूपं यक्ष
नजाननेन बोधयंति। याव तावदसौ शूद्रेण सम इति अत्र तर्भावित एवार्थस्तावोध्य। तथा च स्त्रीशू
द्रानुपनीतादीनां भाषाप्रबंधादीनां च पुराणादीनां च यथार्थज्ञानं संभवतीति भावः॥१२॥ यथे
तिय

स शूद्रेण समस्तावद्यावद्वेदान्न जानते। नामसंकीर्तने ध्याने सर्व एवाधिकारिणः।
॥१२॥ संसारान्मुच्यते जंतुः शिवदीतोत्मुजावनात्॥ यथा दानं तपो वेदाध्ययनं चा
न्यकर्म वा॥१३॥ सहस्रांशं तु नार्हंति सर्वदा ध्यानकर्मणः। जातिमाश्रममंगानि
देशकालमथापि वा॥१४॥ आसनादीनि कर्माणि ध्यानं नापेक्षते क्वचित्। गच्छंस्ति
ष्ठन् चरन् वापि शयानो वान्यकर्मणि। पातकेनापि वा युक्तो ध्यानादेव विमुच्यते॥१५॥

तियथा॥ पापाचनविधुक्तप्रकारेण क्रियमाणं दानादिध्यानस्य सहस्रांशं नार्हति॥१३॥१४॥१५॥

नेहेति। इह निदिध्यासने अभिक्रमस्य उपक्रमस्य नाशो विघ्नो नास्ति ईश्वर एव विघ्नान्वारयतीत्यर्थः। तथा
प्रत्यवायो न विद्यते नित्यकर्म परित्यज्य वेदांतश्रवणं विना। वर्तमानस्य संन्यासीपतत्येव न संशय इति
स्मृत्युक्तः प्रत्यवायो पि श्रवणं गीभूत मनन निदिध्यासनानि विद्यते स्वल्पमपि तु अस्य निदिध्यासन
रूपस्य धर्मस्य संबंधि अल्पमपि निदिध्यासनैकदेशो पीति यावत्। महतः संसारभयात् त्रायते वासनाद्वा
राजन्मांतरे पि ज्ञानोत्पत्तावुपयुक्तत्वादिति भावः॥ तदुक्तं भगवद्गीतासु तत्र तं बुद्धिसंयोगं लभते पौर्वदेहि

॥नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते॥ स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्॥१६॥

कं यतते च ततो भूयः संसिद्धौ कुरुनंदन॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशो पि सः॥ इति यद्यपि गीतांतरे
नेहाभिक्रमेत्ययं श्लोको निष्कामस्य कर्मपरतया व्याख्यातस्तथापीह निदिध्यासनमात्रमुपक्रम्यां १३०
भिधानादेवं व्याख्यातमिति बोध्यम्॥१६॥

आश्चर्ये वा भये शोके क्षुते वा मम नामयः॥ व्याजेनापि स्मरेन्मर्त्यः स याति परमां गतिं॥
॥१७॥ महापापैरपि स्पृष्टो देहांते यस्तु मां स्मरेत्॥ पंचाक्षरीं वोच्चरति स मुक्तो ना
त्र संशयः॥१८॥ विश्वं शिवमयं यस्तु पश्यत्यात्मानमात्मना। तस्य क्षेत्रेषु तीर्थेषु
किं कार्यं वान्यकर्मसु॥१९॥ सर्वेण सर्वदा कार्यं भूतिरुद्राक्षधारणं॥ युक्तेनाथाप्ययु
क्तेन शिवभक्तिमभीप्सिता॥२०॥ नर्यन्त्रिस्म समायुक्तो रुद्राक्षान्यस्तु धारयेत्॥ महापा न ६
पैरपि स्पृष्टो मुच्यते नात्र संशयः॥२१॥ अनन्या निशिव कर्माणि करोति करोति वा। शिव
नाम जपेद्यस्तु सर्वदा मुच्यते तु सः॥२२॥ अंतकाले तु रुद्राक्षान्विभूतिं धारयेत्तु यः॥ म
५धिप हापापोपपापौघैरपि स्पृष्टो नराधमः॥२३॥ सर्वथा नोपसर्पंति तं जनं यमकिंकराः॥२४॥
बिल्वमूलमृदा यस्तु शरीरमुपलिंपति॥२४॥ अंतकाले तकष्टैः सद्वा क्रियते नरः॥
२५॥ ॥श्रीराम उवाच॥ ॥भगवन्पूजितः कुत्र कुत्र वा त्वं प्रसीदसि। तद्ब्रूहि मम जिज्ञासा
वर्तते महती विभो॥२६॥ ॥श्रीभगवानुवाच॥ ॥मृदा वा गोमयेनापि भस्मना
चंदनेन वा॥ सिकताभिर्दारुणा वा पाषाणेनाथ निर्मिता॥२७॥ लोहेन वाथ रंगेण कां

ऊनं धर्मं पुत्रान् पश्यति मैत्रमात्॥२९॥ बिल्वरहेतत्फलैर्वा यो मां पूजयते नरः। परां श्रियं जा

स्या कर्पूरपित्तलैः। ताम्ररौप्यसुवर्णैर्वा रत्नैर्नानाविधैरपि॥२८॥ अथवा पारदेनैव कर्पू
रेणाथवा कृता। प्रतिमा लिंगं वा द्व्यैरेतैः कृतं तु यत्॥२९॥ तेनेत्र मां पूजयेत्तेषु पु
ण्यकोटिगुणं नरम्॥ मृदा कृतं कांस्यलोहैर्वा पाषाणेन विनिर्मिता॥३०॥ गृहीणां
प्रतिमा कार्या शिवं सर्वत्र नाशिता॥ आयुः श्रियं मिह प्राप्य मम लोके महीयते॥३१॥
बिल्ववृक्षं समाश्रित्य यो मंत्रान् विविधान् जपेत्॥ एकेन दिवसेनैव तत्तत्पुरश्चरणं
भवेत्॥३३॥ यस्तु बिल्ववने नित्यं कुटिं कृत्वा विशेन्नरः। सर्वे मंत्राः प्रसिध्यंति जपमा
त्रेण केवलं॥३४॥ पर्वताग्रे नदीतीरे बिल्वमूले शिवालये। अग्निहोत्रे केशवस्य सन्नि
धौ च जपेत्तु यः॥३५॥ नैवास्य विघ्नं कुर्वंति दानवा यक्षराक्षसाः। तं न स्पृशंति पापानि
शिवसायुज्यमृच्छति॥३६॥ स्थंडिले वा जले वह्नौ वायवाकाश एव वा। गिरौ स्वात्मनि
वा यो मां पूजयेत्प्रयतो नरः॥३७॥ सतत्फलमाप्नोति लवमात्रेण राघव। आत्म १३१
पूजा समानास्ति पूजा रघुकुलोद्भव॥३८॥

कंबलासन इति। चित्रकंबल इत्यर्थः। यदाह व्यासः कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि
वंशाजि व्याधिनाशः स्यात्सर्वेष्टं चित्रकंबल इति॥३९॥ पत्रनिर्मिता इति॥ कोमलपत्रनिर्मितासने इ
त्यर्थः। तथा च व्यासः। कौशेयं कंबलं चैव अजिनं पट्टमेव च। दारुजं वा जपत्रं च आसनं परिकल्प
येदिति वदन् बालत्वेन पत्रं विशिनष्टि निर्मितिरित्यत्र आतश्चोपसर्गे इति यद्यप्यङ्प्राप्नो

मत्सायुज्यमवाप्नोति चंडालोऽप्यात्मपूजया। सर्वकामानवाप्नोति मनुष्यः कंबलास
ने॥३९॥ कृष्णाजिने भवेन्मुक्तिर्मोक्षश्रीर्व्याघ्रचर्मणि॥ कुशासने भवेज्ज्ञानमारोग्यं पत्र
स्वःप्र निर्मितं॥४०॥ उदङ्मुखो वा जपं पूजां समाचरेत्। पाषाणे दुःखमाप्नोति काष्ठे नानाविधा
न्गदान्॥४१॥

ति तथापि बाहुलकात्क्तिन्॥४०॥ काष्ठे इति। यद्यपि उदाहृतव्यासवाक्ये दारुजं प्राप्तं तथा यैः धर
पि हि काष्ठशब्दो विशेषपरो बोध्यः॥ तथा च व्यासः। वंशासने दरिद्रं स्यात्पाषाणे व्याधिसंभवः। धरण्यां वः २
दुःखसंभूतिर्दौर्भाग्यं छिद्रदारुजे॥ तृणे धनयशोहानिः पल्लवे चित्तविभ्रम इति। अत्र पल्लव
शब्दः प्रागुक्तचारुपत्रेतरपरो बोध्य इति दिक्॥

अक्षमालां विधिं वक्ष्ये इति। अत्र श्लोकोत्तमो विशेषमाह॥ अंगुल्या जपसंख्यानमेकमेकं मुदाहृतं॥ रेख-
याष्टगुणं पुत्रजीवैर्दशगुणं भवेत्॥ शतं स्याच्छंखमणिभिः प्रवालैश्च सहस्रकं॥ स्फटिकैर्दश-
साहस्रं मौक्तिकैर्लक्षमुच्यते। पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते। कुशग्रंथ्या च रुद्राक्षैरनं-

वश्ये स्त्रियमवाप्नोति न मौनं मंत्रो न सिध्यति। अक्षमालाविधिं वक्ष्ये शृणु यावद्धितो
नृप॥४२॥ साम्राज्यं स्फटिकैर्दद्यात् पुत्रजीवैः परां श्रियं। आत्मज्ञानं कुशग्रंथौ रुद्राक्षैः
सर्वकामदः॥४३॥ मुक्ताफलैः कृता माला सर्वविद्याप्रदायिनी॥ माणिक्यरचिता माला
त्रैलोक्यस्य वशंकरी॥४४॥ मुक्ताफ प्रवालैश्च कृता माला सर्वलोकवशप्रदा। मोक्षप्रदा
५द्दा च माला स्यान्मलयाःफलैः कृताः॥४५॥ नीलैर्मरकतैर्वापि कृता शत्रुजयप्रदा। सुवर्णर-
चितां माला दद्याद्धैमहतीं श्रियं॥४६॥ तथा रौप्यमयी माला कन्यां यच्छति कामिकां। उक्तानां १३२
सर्वकामानां दायिनी पारदैः कृता॥४७॥

॥जपफलमुच्यते इति। मलस्तोवाक्लस्युटार्थः॥४१॥

अक्षमालामणिसंख्यामाह॥ अष्टोत्तरशतमिति। अष्टोत्तरशतं ये मणयस्तदात्मिका माला उ-
त्तमा दृष्युत्तमेत्यर्थः॥४८॥ यद्वा चतुःपंचाशता निर्मिता मध्यमेत्यनुषज्यते या तु सप्तविंशतिः साधमा ल-
याया पंचविंशत्या निर्मिता साप्यधमेत्यन्वयः। शतसंख्योत्तमेति प्रागुक्तं तदनुवादेन गुणविशेषं वि-

अष्टोत्तरशतं माला नक्षस्या दुत्तमोत्तमा। शतसंख्योत्तमा माला पंचाशन्मध्यमा मता॥४८॥ च-
तुःपंचाशता यद्वा अधमा सप्तविंशतिः। अधमा पंचविंशत्या यदि स्याच्छतनिर्मिता॥४९॥ पंचा-
शद्भिरक्षरैस्त्वनुलोमप्रतिलोमतः। इत्थं संस्थापयेन्न्यशनकस्मै प्रदर्शयेत्॥५०॥ वर्णैर्विन्य-
स्तया यस्तु क्रियते मालजापकः। एकवारेण तस्यैव पुरश्चर्या कृता भवेत्॥५१॥ सव्यपाणिं गुरोस्था-
प्य दक्षिणं च शिवोपरि। योनिमुद्रावंध एवं भवेदासनमुत्तमं॥५२॥

धत्ते यदि स्यादिना स्थापयेद्दिव्यं तेन॥४९॥५०॥५१॥ शिवोपरीति शिवलिंगं द्विजोपरीति पाठे प्यथमेवा-
र्थो बोध्यः॥५२॥

यंकंचीदपीति। दुष्टमपीत्यर्थः। दोषाश्च छिन्नो रुद्धः शक्तिहीनः पराङ्मुखइतीरितः। बधिरो नेत्रही
नश्च कीलितः स्तंभितस्तथा। दग्धः स्रस्तश्च भीतश्च मलिनश्च तिरस्कृतः। भेदितश्च सुषुप्तश्च मदोन्मत्त
श्च मूर्छितः। हृतवीर्यश्च हीनश्च प्रध्वस्तो बालकः पुनः। कुमारश्च युवा प्रौढो वृद्धो निस्त्रिंशकस्तथा। नि
र्बीजः सिद्धिहीनश्च मंदः कूटस्तथा पुनः। निरंशकः सत्वहीनः केकरो बीजहीनकः। धूमितालिंगितौ स्या

॥ योनिमुद्रासने स्थित्वा प्रजपेद्यः समाहितः। यं कंचिदपि वा मंत्रं तस्य स्युः सर्वसिद्धयः॥५३॥

तां मोहितस्तु क्षुधार्तकः। अतिदृप्तोंगहीनः स्यादतिक्रुद्धः समीरितः॥ अतिक्रूरश्च सव्रीडः शांतमा
नस एव च॥ स्थानभ्रष्टश्च विकलः सातिवृद्धः प्रकीर्तितः। निःस्नेहः पीडितश्चापि मीलितः कृतथैव च। वि
स्तो पद्दौसौ हारितश्च मुकोनग्रो भुजंगमं। श्रन्यश्चापि हतश्चाधमं मंत्रं तेषां समीरिता॥ इतिशारदातिल १३३
कपदार्थादर्शादिग्रंथेषु संगृहीताः। तादृग्दोषोपेता अपि मंत्रा योनिमुद्रासने जपवशात्सिध्यंती
त्यर्थः॥५३॥ ॥

छिन्नाइतिमनोर्यस्यादिमध्यांतेषु अनिलबीजमुच्यते। संयुक्तं वा वियुक्तं वा स्वराक्रांतं त्रिधा पुनः च
तुर्धा पंचधा वाथ स मंत्रश्छिन्नसंज्ञकः। आदिमध्यावसानेषु त्रबीजद्वंद्वलोहितः। रुद्धं मंत्रः सविज्ञे
यो भुक्तिमुक्तिविवर्जितः॥ त्रबीजद्वंद्वलक्षयं। लोहितइतिबंधइत्यर्थः। एकं मध्ये द्वयं मूर्ध्नि यस्मिन्न

छिन्नारुद्धाः स्तंभिताश्च मिलिना मूर्छितास्तथा। सुप्ता मत्ताहीनवीर्या दग्धास्रस्तारिपक्षगाः॥५४ गाः
॥ बालाप्रौढनमत्ताश्च वृद्धा मंत्राश्च ये मताः। योनिमुद्रासने स्थित्वा मंत्रानेवं विधान्जपेत्॥५५॥
तस्य सिध्यंति ते मंत्रा नान्यस्य तु कथंचन॥५६॥

स्या स्तं
त्रपुरंदरौ। विद्येते स तु मंत्रः स्तात् स्तंभितं सिद्धिरोधकः। अस्त्रं फट् पुरंदरः लः आदिमध्यावसानेषु त्रवेम्मा
गं चतुष्टयं। यस्य मंत्रः स मलिनो मंत्रो वै विवर्जयेत्। मालिमवर्णैः इत्यादि आगमग्रंथेभ्यो बोध्यं विस्त
रभयान्नूपरम्यते॥५७

ब्राह्मेति। ब्राह्ममुहूर्त्तलक्षणं चोक्तं विष्णुपुराणे। रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृतीयः स ब्राह्म इ
ति विज्ञेयो विहितः स प्रबोधने इति तं मुहूर्त्तमारभ्य आमध्याह्नं मन्त्रं मंत्रं प्रजपेत्। जप्येतपः पौरं दुपथा
दिति भावयेत्। एवं उक्तः कालः पुरश्चर्याविधौ सर्वकाम्यजपेषु च बोध्यः नित्यादि जपस्तु सर्वदैव कार्यः।

ब्राह्मं मुहूर्त्तमारभ्य आमध्याह्नं प्रजपेन्मनुं। अत ऊर्ध्वं कृते जाप्ये विनाशो भवति ध्रुवं॥५६॥ पुरश्चर्या वि
धावेवं सर्वकामफलेष्वपि। नित्ये नैमित्तिके वापि तपश्चर्यासु वा पुनः॥५७॥ सर्वदैव जपः कार्यो न दो
षस्तत्र कश्चन॥५८॥ यस्तु रुद्रं जपेन्नित्यं ध्यायमानो ममाकृतिं। षडक्षरं वा प्रणवं निष्कामो वि
जितेंद्रियः॥५९॥

१३४

॥५९॥ ध्यायमानो ध्यायन्॥५९॥

वैकल्यं वैकल्योपनिषदमित्यर्थः॥५९॥६०॥ अंतरधीयतेति। अंतर्हित इत्यर्थः। कर्मकर्त्तरि लङ्॥६१॥
यः समाहि

अथाथर्वशिरो मंत्रं कैवल्यं वारुणं तथा। स तेनैव च देहेन शिवः संजायते स्वयं॥५९॥ इमां शिव
गीतां यो नित्यमेतां जितेंद्रियः। शृणुयाद्वा स मुक्तः स्यात् संसारान्नात्र संशयः॥६०॥ ॥
सूत उवाच॥ ॥एवमुक्त्वा महादेवस्तत्रैवांतरधीयत। रामः कृतार्थमात्मानममन्यत तथैव स
ः॥ एवं मया समासेन शिवगीता समीरिता। एतां यः प्रजपेन्नित्यं शृणुयाद्वा समाहितः॥६२॥ ए
कावृत्तिनायो मर्त्यस्तस्य मुक्तिः करे स्थिता। अतः शृणुध्वं मुनयो नित्यमेतां समाहिताः॥६३॥

तः सन् नित्यं एतां गीतां प्रजपेत्। यो वा मर्त्यः शृणुयात्तस्य मुक्तिः करे स्थिता। अवश्यं भविष्यतीत्यर्थः॥६२॥६३॥

अनायासेनेतियोयुष्माकंमुक्तिर्नभविता नविता भविष्यतीत्यर्थः॥ अनायासमेव विशदयति॥ कायक्लेश
मनः

अनायासेनवोमुक्तिर्नविनानात्रसंशयः। कायक्लेशोमनःक्षोभोधनहानिर्नचात्मजः॥६४॥
पीडास्तिश्रवणेदेवयस्मात्कैवल्यमाप्नुयात्॥ शिवगीतामतोनित्यंशृणुध्वमृषिसत्तमाः॥६५॥
॥ऋषयऊचुः॥ अद्यप्रभृतिनःसूतत्वमाचार्यःपितागुरुः। अविद्यायाःपरंपारंयस्मात्तारयितासि
नः॥६६॥ उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदःपिता। तस्मात्सूतात्मजःत्वत्तःसत्यंनान्योस्तिनो
गुरुः॥६७॥

क्षोभोधनहानिश्चेत्यादिरात्मनःपीडानास्तीतिसंबंधः। शृणुध्वंशृणुत॥६५॥६६॥६७॥ ॥ १३५

प्रययुरिति। बहिःसंध्योपासनस्यविशिष्टफलत्वादितिभावः। यदाहव्यासः गृहेत्वेकगुणासंध्यागो
ष्ठेदशगुणास्मृता। शतमाहस्रिकानद्यामनंताविष्णुसन्निधौ। बहिःसंध्यादशगुणागर्तप्रस्रव
णेषुच॥ स्यात्तीर्थेशतगुणाप्यनंताजाह्नवीतटेति॥ शातातपोपि। अनृतंमद्यगंधंचदिवामैथु
नमेवच॥ पुनातिवृषलस्यान्नंबहिःसंध्यामुपासितेति॥ यत्तु त्रिवचनं। संध्यात्रयंतुकर्तव्यंद्वि
जेनात्मविदासदा। उभेसंध्येतुकर्तव्येब्राह्मणैःस्वगृहेष्वपि चेति। तस्यायमाशयः यद्यपिबहिरेव

व्यासउवाच॥ ॥इत्युक्त्वाप्रययुःसर्वेसायंसंध्यामुपासितुं॥ स्तुवंतःसूतपुत्रंतेसंतुष्टाग
मतीतटं॥६८॥ ॥इतिश्रीपद्मपुराणेशिवगीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे
शिवराघवसंवादेमोक्षयोगोनामषोडशोध्यायः॥१६॥ ॥श्रीरस्तु॥ ॥शुभमस्तु॥

संध्यासंध्यात्रयंप्रशस्तंतथापिगृहविहरणघंगलोपप्रसक्तिस्तदाश्रौतस्यविहरणस्याव
श्यानुरोधेनद्वेसंध्येगृहेप्यनुष्ठेयेइति। स्फुटंचैतन्माधवादिनिबंधेष्विति दिक्॥ यस्योयल्लीलाव्हि
रस्त्रिभुवनविचरंपूरयित्वाप्रशस्तान्लोकानुत्संघ्यभीत्वासुरहराचितंब्रह्मणोदंडसमंतात्॥
निर्यातोभातिविद्युज्जनदापोतद्भूत्योवितनरुरवयात्तपन्सर्वदेवान्॥६९॥ ॥इतिश्रीमद्धि

शुद्धाद्वैतसिद्धांतप्रतिष्ठापनैकधुरंधरश्रीकेसरीवेंकटाद्रिनायकविरचितायां शिवगीता
व्याख्यायां षोडशोध्यायः॥१६॥ ॥समाप्तः॥ ॥शिवगीतासनाजिसंपूर्णम्छे॥ ॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥१॥ ॥श्री॥
॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥
॥ ॥लेखकपाठकयोः शुभं भवतु॥ ॥कल्याणमस्तु॥ ॥शुभं भवतु॥ ॥श्री॥